श्रीमद्दाचार्य विरचिते

वेदान्तविजये

तृतीयः

# सद्विद्याविजयः

श्रीमत्परमहंसेत्यादि बिरुदाङ्कितैः

श्रीयदुगिरि यतिराजसम्पत्कुमार रामानुजमुनिभिः

प्रत्यवेक्षितः

प्रकाशितः

कल्यब्दाः ५०३८, शालिवाहशकाब्दाः १८५९.

धातुवत्सरे–उत्तरायणे.

१९३६.

[मूल्यं १–८–०.

SA 28A

श्रीमहाचार्य विरचिते

वेदान्तविजये

तृतीयः

# सद्विद्याविजयः


श्रीमत्परमहंसेत्यादि विरुदाङ्कितैः

श्रीयदुगिरि यतिराजसम्पत्कुमार रामानुजमुनिभिः

प्रत्यवेक्षितः



प्रकाशितः

कल्यब्दाः ५०३८, शालिवाहशकाङ्काः

धातुवत्सरे—उत्तरायणे.

१९३६.

[मूल्यं १–८–०.

# SADVIDYA VIJAYA

SA 28 A

(III Part)

IN

VEDANTHA VIJAYA

By

MAHACHARYA

EDITED BY

HIS HOLLINESS SREE YATHIRAJA
SAMPATHKUMARA RAMANUJAMUNI OF MELKOTE.

Printed At The Sreevathsa Press
Triplicane, Madras.

1937.

[PRICE Rs. 1-8-0.

## विषयसूची.


| भङ्गारंभ पुटाङ्कः. | | विषयाः |
|---|---|---|
| पुटम्, | ७८ | भावरूपाज्ञानभङ्गः. |
| ,, | ८२ | तिरोधानभङ्गः. |
| ,, | ९२ | अविद्याश्रयभङ्गः. |
| ,, | १०२ | अविद्यालक्षणभङ्गः. |
| ,, | १०९ | अविद्याप्रकाशभङ्गः. |
| ,, | ११० | अविद्यानिवर्तकभङ्गः. |
| ,, | ११८ | अविद्यानिवृत्तिभङ्गः. |

## प्रस्तावना.

विशिष्टाद्वैतसिद्धान्तग्रन्थानां प्राचीनाचार्यैः प्रणीतानां खिलभूतानां नाममात्रतो विदितानां मार्गणे क्रियमाणे घटिकाचलाभिजनेन तत्रभवता महाचार्येण विरचितो वेदान्तविजयाख्यो गुरुशरीरो वादग्रन्थः द्वित्रस्थलेषु निश्चितसद्भावः अवागम्यत। विशिष्य अन्वेषणे कृते एकत्रापि न समग्रशरीरो गोचरीभूतः, प्रत्युत अंशांशतः आत्मानमादर्शयति स्म। स चायं प्रधानविच्छित्तिभिः पञ्चभिः अङ्गुलीभिरिव वाग्देवतायाः पाणिर्वावदूकानां प्रतिपक्षविक्षेपाय अभयप्रदो जागर्ति। ताश्च विच्छित्तयः विजयशब्देनाख्यायन्ते। यथा—'गुरूपसत्तिविजयः, ब्रह्मविद्याविजयः, सद्विद्याविजयः, अद्वैतविद्याविजयः, परिकरविद्याविजयः' इति॥

एवमेतेषु तृतीयस्सद्विद्याविजयः मुद्रणेन प्रकाशनायाधिकृतः। अपरः श्रीमहाचार्यशिष्येण सुदर्शनाचार्येण निर्मितः 'विजयमङ्गलदीपिकाख्यो ग्रन्थश्च। आद्यस्य संवादाधारभूतान्येतानि मातृकान्तराणि। (१) कुतश्चित्क्रीतः ताळ—पत्रात्मकः: (२) मदरास् नगरस्थितराजकीयकोशागारस्थितं मातृकाद्वयम्. (३) अडैयार् कोशागारस्थितं मातृकाद्वयमसमग्रम्. (४) मैसूर् नगरस्थराजकीयकोशागारास्थितं मातृकात्रयम्. (५) मुसलपाक्कम् तिरुवेङ्कटाचार्यसकाशादधिगतं मातृकाद्वयम्, इत्येतेषु दशसु मातृकाकोशेषु आद्यमातृकानुसारेण प्रतिच्छन्दः साधितः; विजयमङ्गलदीपिकायाश्च तन्मातृकान्तरतः॥

## सद्विद्याविजयः.

अस्मिन् सद्विद्याविजये सप्तभिः अवान्तरवस्तुविच्छेदैः भङ्गाभिशब्दितैः धातुभिरिव शरीरं समाकलितं संस्थानं प्रतीयते। ते च भङ्गाः—(१) भावरूपाज्ञानभङ्गः, (२) तिरोधानभङ्गः, (३) अविद्याश्रयभङ्गः, (४) अविद्यालक्षणभङ्गः, (५) अविद्याप्रकाशभङ्गः, (६) अविद्यानिवर्तकभङ्गः (७) अविद्यानिवृत्तिभङ्गः इति॥

अथ च ग्रन्थशुद्धये द्वित्रकृत्वः सावधानं परिशीलने क्रियमाणे अवगते च सन्निवेशे, तृतीये चतुर्थे सप्तमे च एवं त्रिषु भङ्गेषु मिथः संसृष्टिसङ्कराभ्यां बहुधा विपर्यासः प्रत्यभात् । अन्यदेव ग्रन्थसंस्थानं दुस्साधसमीकारं व्याकुलतामतनिष्ट । ततश्च मातृकान्तरसम्पादनेन संवादे कृते विपर्यासस्थानमानादिकं विशदीभूतम् । ग्रन्थस्य निरवद्यं शरीरं च । तदेतत् विपर्यासस्थानमानादिकं सविस्तरं विलिख्य समीकारप्रकारं च उल्लेखपत्रेण साकं प्रतिच्छन्दः सनाथितः ॥

शोधनप्रार्थनाविप्रलंभः.

अथ विद्वत्संप्रतिपत्या ग्रन्थस्य निराकुलतायै उल्लेखपत्रेण साकं प्रतिच्छन्दः, लौकिकमहितस्थानासादितबिरुदावलीचीरपट्टिकावीज्यमानपाण्डित्यप्रशस्तेः कस्य-चिद्विदुषः हस्ते सशताभ्यर्थनप्रणयं समर्पितश्शोधनाय । स चापि प्रीयमाणः प्रति-जज्ञे । व्यतीता च मासचतुष्टयी । अजनिष्ट काचन सम्भावना हृदयमुल्लासयन्ती यथा—एतावता कालेन सम्यक् संशोधितो ग्रन्थो वरीवर्तीति । अनुपदं प्रति-च्छन्दं प्रत्यानीय प्रतिपत्रं मार्गणे क्रियमाणे शोधनचिह्नलेशोऽपि नालक्ष्यत । प्रत्युत कतिपयवाक्यविख्यापितः स्वाशयः उल्लेखपत्रपृष्ठे विलिखितः अवागम्यत ॥

उल्लेखपत्रम् .

पूर्वं प्रस्तुते प्रतिच्छन्दे दृश्यमानो ग्रन्थविपर्यासो यथा—

अविद्याश्रयभङ्गे—

अस्मिन् भङ्गे विपर्यस्तस्थलस्य प्रतिपत्तये ।
त्रिधा विभज्य ग्रन्थस्य शरीरं संप्रकाश्यते ॥

आद्यो भागः, यथा—(पु. ९२) 'कोऽयमविद्याश्रयः' इत्यादि, 'विरोध-स्यालङ्कारत्वात्' इत्यन्तम् । द्वितीयो भागः—(पु. ९७, पं, ३) 'किन्निमित्त च मिथ्यार्थानुपपत्त्या' इत्यादि, 'तत्रैव भ्रमं जनयति' इत्यन्तम् । तृतीयो भागः—(पु. ९९, पं. २४) 'नच धर्मिद्वये सति एवं व्यवस्था युज्यते' इत्यादि, 'त्वदभिमतं नचिदाश्रयं नाचिदाश्रयं चेति' इत्यन्तम् । अत्र प्रथम

द्वितीय भागयोर्मध्ये ग्रन्थान्तरस्य अद्वैतविद्याविजयस्य १कोऽपि भागः प्रवेशितः। अथ तृतीयभागस्य—'नच धर्मिद्वये' इत्यादेःस्थाने, (पु. १०६, पं ७) 'मतान्तरेऽपि किमेकाज्ञानपक्षे' इत्यादिः, 'तस्य परिणामित्वासिद्धेः' इत्यन्तः अविद्यालक्षणभङ्गस्य उत्तरभागः सन्दानितः। भङ्गश्च निगमितः ॥

अविद्यालक्षणभङ्गे—स्थानसंप्रतिपत्तिसिद्ध्ये द्विधा विभागः प्रकाश्यते। यथा आद्यो भागः—(पु. १०२) 'अपि च इयमविद्या न पारमार्थिकी' इत्यादिः, 'आवरणे अतिव्याप्तेश्च' इत्यन्तः। उत्तर भागः (पु. १०६, पं. २) यथा— 'न च धर्मिद्वये सति' इत्यादिः 'परिणामित्त्वासिद्धेः' इत्यन्तः। अस्य उत्तर भागस्य स्थाने (पु. ११९, पं. १९) 'कपालमालापसरणे' इत्यादिः 'व्यावर्तमानत्वाद्यन्वयात्' इत्यन्तः अविद्यानिवृत्तिभङ्गस्य उत्तर भागः समारोपितो भङ्गश्च निगमितः ॥

अविद्यानिवृत्तिभङ्गेऽपि द्विधा विभागः क्रियते—आद्यो भागः (पु.११७) यथा—'अपि च अज्ञाननिवृत्तिरपि दुर्निरूपा' इत्यादिः 'भूतलाद्याश्रित उपेयते' इत्यन्तः। उत्तर भागः (पु. ११९, पं. १९) यथा—'कपालमालापसरणे' इत्यादिः, 'व्यावर्तमानत्वाद्यन्वयादिति' इत्यन्तः। अस्य उत्तरभागस्य स्थाने (पु. ९९, पं. २४) 'नच धर्मिद्वये सति' इत्यादिः, 'न चिदाश्रयं नाचिदाश्रयं चेति' इत्यन्तः अविद्याश्रयभङ्गस्य उत्तरभागः समनुस्यूतो भङ्गश्च निगमितः ॥

इत्येवं त्रिषु भङ्गेषु मिथस्संसृष्टिसङ्करौ।
अवेक्ष्येते वितन्वाते विदुषामपि विभ्रमम् ॥

ईदृशं वैशसं सम्यक् समीकारक्रमं च तम्।
विलिख्योल्लेखपत्रेण प्रतिच्छन्दस्सनाथितः ॥

विन्यस्तश्शोधनार्थाय सविस्रम्भं विपश्चिति।
नैव तेन प्रतिच्छन्दे दृष्टिलेशोऽपि पातितः ॥

---

१. 'अज्ञानशब्दस्य सदृशेतरधर्मे' इत्यादि, 'अद्वैतविवक्षायाम्' इत्यन्तम्

प्रत्युतोल्लेखपत्रान्ते लिखितान्यमृताक्षरैः ।
वाक्यान्याशयशंसीनि कानिचिद्देशभाषया ॥

यथा—प्रतिपाद्यवस्तुप्रकरणसंज्ञाविपर्यासः शक्यशङ्कः, ग्रन्थो विपर्यस्त इति न सुवचम्, ग्रन्थकाराणां लेखनशैली एवमेवानुभूतचरी, साम्प्रतिकः प्रतिच्छन्द एव निरवद्यशरीर इति ॥

अस्मिन्निचुळितं भावं गभीरे वाक्यविस्तरे ।
कोविदा एव जानीयुरिति जोषं स्थितिः श्रिता ॥

अपरो विप्रलंभः ॥

पूर्वप्रस्तावितः विजयमङ्गलदीपिकाग्रन्थः विशिष्टाद्वैतसिद्धान्तप्रवर्तनाचार्यपदे शिष्यैः आरोपितप्रतीतेः कस्यचित् पण्डितवरस्य प्रियभाषिणः हस्ते सोपग्रहं साभ्यर्थनं शोधनाय न्यासीकृतः । प्रत्याशया यापितश्च मासद्वयाभ्यधिकः कालः । अत्रान्तरे पण्डितवरनिवासग्रामवर्तिनः सम्प्रतिपन्नात् सहृदयात् लेख एकः प्राप्तः। तत्रैवं सन्देशसङ्ग्रहः—'यथा शोधनाय न्यासीकृतो ग्रन्थः अकृतविलंबं यदि ततो न प्रत्यानीयेत तर्हि अणकनाशं नश्येदेव सः, त्यज्यतां तदधिगमप्रत्याशा' इति। ततस्स अनुपदमानायितः। विविच्यावलोकने कृते शोधनवार्ता तु दूरेतराम् । पत्राण्यपि तदीयदृष्टिपातसुकृतमपि नालभन्त । सम्पुटबन्धः परं विस्रंसितो व्यदृश्यत ॥

विप्रलंभद्वये दृश्यमानमन्तरम् .

प्रथमे सहजं मौढ्यं ग्रन्थग्रन्थकृतां सताम् ।
ब्रुवता विदुषोत्सर्गाद्विप्रलंभो विशेषितः ॥

द्वितीये रक्षितं स्वस्य पाण्डित्यं मौनमुद्रया ।
अत्र ताभ्यामपि द्वाभ्यां ग्रन्थो नैवावलोकितः ॥

एवं शोधनसाहाय्यं तयोः कृतवतोर्द्वयोः ।
अव्याजविदुषां गोष्ठ्यां प्रकल्प्या प्रथमासिका ॥

## मुद्रणाय धनसहायस्थानत्रयम् .

(१) मदरास् सिंगं सेट्टि, यतीन्द्रसेट्टि धर्मद्रव्याधिकरणम् , (२) मदरास् श्रीमतः आसूरि पार्थसारथि अय्यङ्गार् महाशयस्य धर्मदाराः श्रीरङ्गमाम्बा, (३) वेदान्तवर्धिनी सभा (अन्त्यं स्थानद्वयं तिरुवल्लिक्केणीस्थम् .)

एवमेतेषां धनसहायेन ग्रन्थोऽयं विदुषां मुदे समग्रो मुद्रितः, इतःपरं चतुर्थः अद्वैतविद्याविजयः संशोधनायाधिकृतः उदाराशयानां धर्मधनदातॄणां अवलम्बेन अचिरात् मुद्रामधितिष्ठेदिति विश्वसिमः ॥

## ग्रन्थकारः.

घटिकाचलाभिजनः सर्वतन्त्रनिष्णातः महाचार्य इति प्रसिद्धाभिधानः श्रीमान् रामानुजाचार्यः। अयमाचार्यः भगवतो रामानुजमुनेः पूर्वाश्रमसम्बन्धिनो भागिनेयस्य वाधूलान्वयस्य श्रीदाशरथिगुरोः वंशे कृतावतारः। बहवः प्रबन्धा अनेन विरचिता इत्यवगम्यते। तेषु साम्प्रतमवगता एते—

(१) चण्डमारुताभिख्या, शतदूषणीव्याख्या.

(२) वेदान्तविजयाभिधानः गुरुशरीरो वादग्रन्थः.

(३) उपनिषन्मङ्गलदीपिका, उपनिषदां व्याख्या.

एषु तृतीयस्तु नाद्यापि गोचरीभवति। अस्य ग्रन्थकर्तुर्यदन्यदपदानादिकमितिवृत्तं विशिष्य ग्रन्थान्तरे प्रकाशयिष्यते ॥

## अयमत्र निर्गळितोऽर्थः.

ग्रन्थस्त्वप्रहतः चिराज्जडकृतादुच्चावचो लेखनात् ।
संवादो बहुमातृकानुगमनात् शुद्धं प्रबन्धं व्यधात् ॥

प्राप्तं मुद्रणसिद्धये वसु लघु स्थानत्रयादर्थितात् ।
शोध्यन्तां स्खलितान्यबोधपतितान्यार्यैस्समर्थैः स्वयम् ॥

## ग्रन्थप्रतिपाद्यार्थसङ्ग्रहः.

व्यामोहेन कुदृष्टिभिः कलुषितां छान्दोग्यषष्ठोदिताम् ।
सद्विद्यां बहुशास्त्रविद्बहुमतैः व्याख्याय सद्भिः क्रमैः ॥

भित्वा सप्तविधान् परोक्तकुहनाक्षेपान् विशुद्धैर्नयैः ।
तामेतां समचीकशद्धनगुरुः हृद्यां सतीं ब्रह्मणः ॥ इति.

श्रीमतां तत्रभवतां विद्वन्मूर्धन्यानां तिरुपति श्रीरङ्गाचार्यस्वामिनां अनुग्रहेण समासदितवैदुष्येण मुसलपाकं तिरुवेङ्कटाचार्येण अस्य ग्रन्थस्य शोध साहाय्यकमाचरितम् ॥

# FOREWORD

LIKE High Court Judges in Full Bench, who, considering the same facts and weighing the same arguments, arrive at different Judgments according to their different temperaments and understanding, the Brahmin Philosophers of India, considering the same phenomena of life and basing on the same authority to the Vedas, have propounded conflicting theories of the Universe. Thus Sri Sankara, a great thinker and a marvellous personality, declares that nothing but Brahman, or the "Eternal Spirit" exists, and that we and the whole Universe are an illusion caused by *Maya*. Another Great Brahmin thinker, equally serious and sincere, has come to the conclusion that God and the world both exist, and that the assumption of a third factor called *Maya* is unwarranted. The aim of manhood according to the former is "to reach a condition wherein mind becomes perfectly blank losing all its activities". According to the latter, in the words of Dr. Rabindranath Tagore "Conscious union in love with the Eternal Person manifested in all persons is our central aspiration."

The author of the following work was Ramanuja a distinguished scion of the family of the great Sri Ramanuja's sister and brother-in-law. His high attainments had won him the title of "Mahacharya", and he is presumed to have been a resident of Sholingapur or Ghatikachala in South India, somewhere in the 15th century. In a remarkable work known as "Vedanta Vijaya", he opposes the views of Sri Sankara's Adwaitism and reainforces the conclusions of Sri Ramanuja. The work is in five parts, of which the third part or "Sadvidya Vijaya" is contained in the following pages. It deals with the Doctrine of *Maya*, and in seven bright chapters of masterly logic examines it in its Various aspects, and exposes its unreliability as a philosophical tenet.

Dr. Sir Radhakrishnan, the interpreter of Eastern Philosophy to the West and of Western Philosophy to the East, writing in the "Golden Book of Tagore", speaks of the importance of logic in Western Philosophy. "From the Socratic insistence on the concept to Russell's mathematical logic, the History of Western thought has been the supreme illustration of the primacy of the logical". "In Hegal, logic ceases to be a mere theory of thought,

but becomes an account of reality". "What is rational is real, and what is real is rational". And "No fact" says Edward Caird, which is in its nature incapable of being explained or reduced to law, can be admitted to exist in the intelligible Universe."

The following pages show that to Indian Philosophers also Logic has been the touch-stone of philosophical conclusions from the long past. The author puts the several aspects of the Doctrine of *Maya* in the crucible of Logic seven times and exhibits its failure at each test.

We owe the book to the tireless endeavours of His Holiness Sri Yatiraja Swamy of Melkote, who at 80 years of age still maintains youthful ardour in the cause of Learning, and is placing the world of scholars more and more under his debt.

The work is the result of the collation of no less than ten manuscripts, one purchased by him, two available in the Madras Government Library, two in the Theosophical Library at Adyar, three more of the Government Oriental Library at Mysore, and another two owned by Mr. Tiruvenkatachar of Musalapakkam.

To the authorities and owners of the above, the Swamy acknowledges His obligations, and also to the Trustees of The Singam Setty Yatheendra Setty Charities, to Sri Srirangammal, wife of late Diwan Bahadur M. O. Parthasarathy Iyengar, and to the Committee of the Sri vedaVedanthavardhini Sabha of Madras, for financial aid towards the printing and publication.

Besides 'Vedanta Vijaya', the larger work of which this is part, the author is known to have written two more valuable works, "Upanishan-Mangala Deepika," or a commentary on the Upanishads, and "Chandamarutha," a work on Logic. The former manuscript has not yet come to light. Scholars who peruse the author's present work will no doubt be able to judge the possibilities of the two works which are yet in obscurity. It is hoped that the present work will prove a valuable addition to Visishtadwaita Literature and will arm its dialacticians in combating the arguments of present-day exponents of the Doctrine of *Maya.*

Mysore
27th June, 1936.

G. R. JOSYER, M.A., F.R.E.S.,
F.M.U.,

श्रीः

# ॥ छान्दोग्योपनिषत् ॥

## षष्ठप्रपाठकः

श्वेतकेतुर्हाऽऽरुणेय आस तꣳ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥ १ ॥ स ह द्वादशवर्ष उपेत्य चतुर्विꣳशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तꣳ ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः ॥ २ ॥ येनाश्रुतꣳ श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति ॥३॥ यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातꣳ स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ ४ ॥ यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्याद्वाचाऽऽरंभणं विकारो नामधेयं लोहमित्येव सत्यम् ॥ ५ ॥ यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातꣳ स्याद्वाचाऽऽरम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवꣳ सोम्य स आदेशो भवतीति ॥ ६ ॥ न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवाꣳस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥ ७ ॥

इति षष्ठप्रपाठके प्रथमः खण्डः

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ॥ १ ॥ कुतस्तु खलु सोम्यैवꣳ स्यादिति होवाच कथमसतः सज्जायेतेति । सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥२॥ तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत । तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥ ३ ॥ ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥

इति षष्ठप्रपाठके द्वितीयः खण्डः

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति ॥ १ ॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ॥ २ ॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरोत् ॥ ३ ॥ तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ४ ॥

इति षष्ठप्रपाठके तृतीयः खण्डः

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥१॥ यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ २ ॥ यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचाऽऽरम्भणं विकारो नाधधेयं त्रीणि रूपाणीत्येव सत्यम् ॥३॥ यद्विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥४॥ एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदांचक्रुः ॥५॥ यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदाञ्चक्रुर्यदु शुक्लमिवाभूदित्यपाꣳ रूपमिति तद्विदाञ्चक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः ॥६॥ यद्वविज्ञातमिवाभूदित्येतासामेव देवतानाꣳ समास इति तद्विदाञ्चक्रुर्यथा खलु नु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ७ ॥

इति षष्ठप्रपाठके चतुर्थः खण्डः

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माꣳसं योऽणिष्ठस्तन्मनः॥१॥ आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः ॥ २ ॥ तेजोऽशितं

त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥३॥ अन्नमय ᳪ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४ ॥

इति षष्ठप्रपाठके पञ्चमः खण्डः

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति ॥१॥ एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति॥२॥ अपाᳪ सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति ॥ ३ ॥ तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ॥ ४ ॥ अन्नमयᳪ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ५ ॥

इति षष्ठप्रपाठके षष्ठः खण्डः

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माऽशीः काममपः पिबाऽऽपोमयः प्राणो न पिबतो विच्छेत्स्यत इति ॥१॥ स ह पञ्चदशाहानि नाऽऽशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूᳪषि सामानीति स होवाच न वै मां प्रतिभान्ति भो इति ॥२॥ तᳪ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवᳪ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥ ३ ॥ स हाऽऽशाथ हैनमुपससाद तᳪ ह यत्किञ्च पप्रच्छ सर्वᳪ ह प्रतिपेदे ॥४॥ तᳪ होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधायं प्राज्वलयेत्तेन ततोऽपि बहु दहेत् ॥५॥ एवᳪ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टाऽभूत्साऽन्नेनोपसमाहिता प्राज्वाली तयैतर्हि वेदाननुभवस्यन्नमयᳪ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ६ ॥

इति षष्ठप्रपाठके सप्तमः खण्डः

उद्दालको हाऽऽरुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनᳪ स्वपितीत्याचक्षते स्वᳪ ह्यपीतो भवति ॥ १ ॥ स यथा शकुनिः सूत्रेण

प्रबद्धो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनꣳ हि सोम्य मन इति ॥ २ ॥ अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाऽऽप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ३ ॥ तस्य क्व मूलꣳ स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ ४ ॥ अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ५ ॥ तस्य क्व मूलꣳ स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥६॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ७ ॥

इति षष्ठप्रपाठके अष्टमः खण्डः

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसान्समवहारमेकताꣳ रसं गमयन्ति ॥ १ ॥ ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति ॥ २ ॥ त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ ३ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

इति षष्ठप्रपाठके नवमः खण्डः

इमा: सोम्य नद्य: पुरस्तात्प्राच्य: स्यन्दन्ते पश्चात्प्रतीच्यस्ता: समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ॥ १ ॥ एवमेव खलु सोम्येमा: सर्वा: प्रजा: सत आगम्य न विदु: सत आगच्छामह इति त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठप्रपाठके दशमः खण्डः

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनाऽऽत्मनाऽनुप्रभूत: पेपीयमानो मोदमानस्तिष्ठति ॥१॥ अस्य यदेकाꣳ शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्व: शुष्यति ॥ २ ॥ एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

इति षष्ठप्रपाठके एकादशः खण्डः

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति ॥ १ ॥ तꣳ होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

इति षष्ठप्रपाठके द्वादशः खण्डः

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार तꣳ होवाच यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥ १ ॥ यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध

तथा चकार तच्छश्वत्संवर्तेत तꣳ होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

इति षष्ठप्रपाठके त्रयोदशः खण्डः

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥ तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाऽऽचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठप्रपाठके चतुर्दशः खण्डः

पुरुषꣳ सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥ अथ यदाऽस्य वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मां भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठप्रपाठके पञ्चदशः खण्डः

पुरुषꣳ सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥ १ ॥ अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधः सत्येनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥ २ ॥ स यथा तत्र नादाह्येतैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

इति षष्ठप्रपाठके षोडशः खण्डः

श्रीमते रामानुजाय नमः.

# श्रीमद्वाधूलमहाचार्यवरैरनुगृहीतेषु पञ्चसु विजयेषु

तृतीयः

## सद्विद्याविजयः.

वाधूलश्रीनिवासार्यतनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम् ॥
वेद्यता ब्रह्मविद्याभिर्हरेरिति निरूपितम् ।
तेन तत्रैव जिज्ञासा सद्विद्यालक्ष्मशोधिनी ॥

उक्तं भगवतः सर्वविद्यावेद्यत्वम् । अतस्स एव जिज्ञास्यः । जिज्ञास्यलक्षणमुक्तं "यतो वा इमानी" ति । तत्र च जगत्कारणत्वं लक्षणमभिसंहितम् । तच्च सद्विद्यायां प्रतिपन्नम् । तत्र चोपोद्धातेन प्रथमखण्डेन पितापुत्राख्यायिकया प्रतिपिपादयिषितार्थोऽवतार्यते । अनन्तरं षड्भिः खण्डैः प्रतिपिपादयिषितार्थः प्रतिपाद्यते । अनन्तरं च नवभिः स एवार्थः स्थाप्यते । केन सिद्धोऽयं विभागः ? उच्यते । सद्विद्यान्त इव [1]सप्तमखण्डान्तेऽपि "तद्धास्य विजज्ञाविति विजज्ञाविती" ति पित्रा पुत्रस्योत्पिपादयिषितं ज्ञानं सम्यगेव निर्वृत्तमिति ह्यवगम्यते । न चावा-[2]न्तरार्थस्य ज्ञातव्यतापरमिदमिति वक्तुं [3]शक्यम् । पूर्वोत्तरखण्डेष्ववान्तरार्थेषु [4]तद्दर्शनात् "उद्दालको हारुणि" रिति पुनरुपदेशारम्भप्रतीतेश्च पूर्वप्रक्रान्त उपदेशः परिसमाप्त इत्यवगम्यते । तस्मात् प्रथमखण्डो नवखण्डी च [5]मध्यमषट्कशेषभूतौ । तत्र विवक्षितार्थस्य साधिष्ठताज्ञापनार्थं पितापुत्राख्यायिकामाह "श्वेतकेतु" रित्यादि । आरुणेयः अरुणस्य गोत्रापत्यं पौत्र इत्यर्थः । "उद्दालको हारुणिश्श्वेतकेतुं पुत्र" मिति वक्ष्यते । अननूच्य—अनूक्तिः स्वाध्यायाध्ययनम् । स्वाध्यायमनधीत्येत्यर्थः । श्वेतकेतुरुपेत्येत्युपनीतत्वं गम्यते । उपनयीतेति प्रयोजकव्या-

१. क—सप्तमखण्डेऽपि. २. घ—न्तरार्थस्य ज्ञाततापर. ङ—न्तरार्थज्ञाततापर. ३. ख—शक्यते. ४. घ—तद्दर्शनात्. ५. क-ख-ग—मध्यमखण्ड.

पारान्तर्गतप्रयोज्यव्यापारस्य उपपूर्वेणैतिना प्रत्यभिज्ञानेन गुरुकुलान्युपेत्येत्यवगमात्। "महामनाः" कर्ममीमांसोपचितमनाः, "अनूचानः" अधीतवेदाङ्गः। 'स्तब्धः' अव्यापारः। अलम्पटः—परिपूर्णः। उद्दालकः पुत्रस्नेहेन ब्रह्मोपदिदिक्षुः तस्य ब्रह्मजिज्ञासामुत्पादयितुमाह—'श्वेतकेतो' इत्यादि। तमादेशं—प्रसिद्धं नियन्तारम्। उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात् तच्छब्दः प्रसिद्धिपरः[1]। "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" "यः पृथिवीमन्तरो यमयति" इत्यादिषु प्रसिद्धिर्द्रष्टव्या। आदेश इति कर्तुरपि साधकतमत्वात् स्वातन्त्र्यमविव[2]क्षित्वा साधकतमत्वविवक्षया वस्तुतः कर्तर्येव[3]करणे घञ्, 'विवक्षातः कारकाणि भवन्ती'ति न्यायात्। कर्मणि घञङ्गीकारेणोपदेश्यपरत्वाभ्युपगमे [4]प्रकृत्य-स्वारस्यम्। आङ्पूर्वस्य दिशेः प्रशासनार्थत्वात्।

किञ्च—धर्मादेरप्युपदेश्यत्वेन तस्य ब्रह्मासाधारण्यासिद्धेः, अप्राक्ष्य इत्यनेनै[5]वोपदेश्यत्वसिद्धेश्च आदेशशब्दो व्यर्थः। किञ्च "सदेव सोम्येद" मिति वक्ष्यमाणत्वेन नपुंसकपदान्तरनिर्देशे स्वरसेऽपि पुंलिङ्गनिर्देशो नियन्तृप्रतीत्यर्थ एव। नियन्तृपरस्यादेशपदस्य "एष त आत्माऽन्तर्याम्यमृतः" "स त आत्माऽन्तर्याम्यमृतः" "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्यत्र पर्यवसानेन तत्प्रसिद्धिसापेक्षस्य निर्देशस्य पुंलिङ्गत्वोपपत्तेः।

अपिच तमादेशमिति तच्छब्दः प्रसिद्ध्यर्थ इत्युक्तमेव। नियन्तृत्वं हि बहुश उपदिश्यते न तथोपदेश्यत्वम्। अतो नियन्तैवादेशशब्दार्थः। [6]प्रकरणानुसारादपि नियन्तृपरत्वमेव युक्तम्। अत्रोपादानत्वमात्रप्रतिज्ञायां—"तदैक्षत, असृजत" इत्यवक्तव्यं स्यात्। तत्तेजोऽभवदित्यादि हि वाच्यम्। अत उत्तरत्र कर्तृत्वाभिधानादिहापि तदुक्तेरपेक्षितत्वादपेक्षितविधानन्यायात् तदभिधानमेव युक्तम्। 'उत तमादेश'मित्याक्षेपाभिप्रायम्। ब्रह्मज्ञानं हि स्तब्धताहेतुः। तदभावेऽपि सा विस्मयनीयेति भावः। "येनाश्रुत" मिति "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवती"ति मैत्रायणीयश्रुत्यनुसारात् उपादान[7]प्रकरणानुगु-

१. घ—'तत्तत्परेणेतरं विषमत्वं प्रयाति' इति अक्षराणि दृश्यन्ते. २. ङ—क्षित-साधक. ३. घ—कारके. ४. घ—प्रकृत्यर्थ स्वारस्यं? ५. ङ—वोद्देश्यत्व. ६. घ—प्रकरणादपि. ७. घ—प्रकरणाच्च.

ण्याच्च येन श्रुतेनाश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः। विज्ञानं निदिध्यासनम्। अश्रुतत्वं स्थूलकारणविशिष्टरूपेण, श्रुतत्वं सूक्ष्मरूपेणेति हृदयम्। आवृत्या ज्ञाततां दृढीकर्तुं श्रवणादित्रयमुपन्यस्तम्। इति पितोवाचेत्यन्वयः। अन्यज्ञानेनान्यस्य ज्ञातत्वासम्भवं मन्वानः पुत्रः पृच्छति 'कथमिति' गुरुराह यथेत्यादि। अत्रापि मृत्पिण्डादेर्ज्ञातत्वं विवक्षितम्। रूपभेदात् नामधेयभेदाच्च कार्यद्रव्यभेदाद्दृष्टान्तेऽप्यसंभवाशङ्कां परिहरति—'वाचारम्भणमि'ति। अध्ययनेन वसतीतिवत् प्रयोजनतया हेतुत्वं वाचेति विवक्षितम्। विकारग्रहणाज्जलाहरणादिव्यवहारोऽप्युपलक्ष्यते। वाग्व्यवहारार्थं जलाहरणादिव्यवहारार्थं च पृथुबुध्नोदराकारादिर्विकारो घटादिनामधेयं च मृत्पिण्डेन; आरम्भणम् आरभ्यते स्पृश्यते, कर्मणि ल्युट्। तत्र प्रत्यभिज्ञायुक्तिमाह—'मृत्तिकेत्येवे'ति। प्रातर्या मृत्तिकेहोपलब्धा सैवेदानीं घटादिरभूदित्यबाधिता प्रत्यभिज्ञा दृश्यते। इतीति प्रत्यभिज्ञां द्योतयति—[१]'मृत्तिकेत्येव सत्य' मित्यन्तेन। [२]व्यवहारानुकरणाभिलापरूपेण तद्धेतुभूता प्रत्यभिज्ञा लक्ष्यते। सत्यम्-अबाधितम्। लोहमणिः—स्वर्णपिण्डः। नखनिकृन्तनेनेति—चिकीर्षिताकारप्रागवस्थमाकारसाम्यादुच्यते। प्रतिज्ञावाक्ये कर्तृत्वं ब्रह्मज्ञानेन कृत्स्नस्य ज्ञातत्वं च प्रतिज्ञातम्। तत्र [३]द्वितीये शङ्का दृष्टान्तेन [४]परिहृता। पुनर्गुरुकुलप्रस्थापनशङ्कयाऽऽह—[५]"न वै' इति। "म" इति स्वकीयकुमारेभ्योऽपि निरवधिकव्यामोहविषयत्वं सूच्यते। तत् ब्रवीत्विति दृष्टान्ते उपादानोपादेय[६]भावात् ज्ञातता युज्यते। इह तु कथमिति भावः। एवं प्रथमखण्डेन कारणत्वमवतारितम्।

[७]अथ कारणत्वमाह—सदेवेति। समष्टिव्यष्टिसर्गौ। [८]व्यष्टिसर्गार्थं त्रिवृत्करणं विकारस्य नामधेयस्य च स्वपर्यन्तत्वसिद्धये नामरूपव्याकरणयोरनुप्रवेशाधीनतां, जीवस्य कार्यत्वसिद्धये अनुप्रवेशस्य जीवद्वारकतां त्रिवृत्करणोपपत्तिं [९]जीवस्य शरीर-

---

१. क-ख—मृत्तिकेवेति एव सत्यं. घ—मृत्तिकैवेत्येतत्सत्यं. २. घ—व्यवहाराभिलाप. ३. ङ—द्वितीयाशङ्का. ४. क-घ—समाहिता. ५. घ—"न वा" ङ—"स वा". ६. घ—भावाज्ञानता. ७. घ—अधिकरणत्व. ८. घ—व्यष्टिसर्गमिव त्रिवृत्करणमविकार. ९. घ—जीवशारीरद्वारक.

द्वारकसत्कार्यत्वसिद्धये शरीरस्य [१]भूतत्रयमयत्वं सूक्ष्म[२]निर्गममाप्यायकत्वं चोपपाद्य विशिष्टोपादानत्वं [३]प्रसाध्योपसंहरति षड्भिः खण्डैः।

द्वितीयखण्डेन समष्टिसृष्टिमाह—सदेवेति। अप्ययपूर्वत्वात् सृष्टेः प्रथमतो लयमाह। अनेन सर्गप्रलययोः प्रवाहानादित्वं सूच्यते। तेन सतोऽनादित्वसिद्ध्या सत्कार्यवादः स्थाप्यते। अन्यथा सतः स्वरूपतः कार्यत्वे कथं सत्कार्यवादः सिध्येत्। इदं परिदृश्यमानं चेतनाचेतनात्मकं विभक्तनामरूपं स्थूलं कार्यं [४]अग्रे सर्गात् प्राचीने प्रलयकाले अद्वितीयं कर्त्रन्तरनिरपेक्षम्, एकम्—अविभक्तनामरूपतया कार्यावस्थानिबन्धनबहुत्वशून्यं सत् आसीदित्यर्थः। सत एव कर्तृत्वस्य कार्यरूपेण बहुभवनस्य च वक्ष्यमाणत्वात् प्रकरणानुसारेण एकाद्वितीयपदयोरर्थ-उक्तः। प्रतिज्ञायामादेशपदेन नियन्तृतयाऽवगतस्यैवोपादानत्वोक्तेः, इदमिति प्रसिद्ध कार्यनिर्देशाच्च श्वेतकेतुर्महामनाः सदिदमिति विशिष्टग्रहणमिति स्वयमेव ज्ञास्यतीत्यभिप्रायेण वैशिष्ट्यं न कण्ठरवेणोक्तम्। ततश्चेदं सदासीदित्यस्य स्थूलचिदचिद्विशिष्टं सूक्ष्मचिदचिद्विशिष्टमासीदिति पर्यवसितोऽर्थः। सच्छब्देन निर्देशो वादिनिराकरणार्थः।

मिथ्यावादिमतमनूद्य दूषयति—"तद्धैक"इति। तत् तत्र इदमद्वितीयं कार्यशून्यम्। अत एवैकं सद्विलक्षण[५]मज्ञानमासीत्। [६]तस्मादसतोऽज्ञानात् प्रातिभासिकात् [७]व्यावहारिकसत्ताशून्याद्व्यावहारिकं सज्जायत इत्यर्थः। कथमसतः सज्जायेतेति [८]अज्ञानस्यैवमसिद्धिरसतस्सदुत्पत्त्यसंभवश्च विवक्षितौ। सच्छब्देन मिथ्यात्वनिरासोऽभिप्रेतः। निरासश्चाद्वैतविद्याविजये द्रष्टव्यः। [९]असदेवेदमग्र आसीदिति तन्त्रावृत्त्यन्यतरेण नैयायिकमतानुवादः [१०]"कुतस्तु खलु सोम्ये"ति तन्निरासश्चाभिप्रेतः। शून्यवादानुवादस्तु न संभवति। असत्त्वस्य कालविशेषानपेक्षत्वात् "सज्जायत" इति तैरनङ्गी[११]कारात्—न च लय उक्तः।

---

१. घ—भूतत्रयत्वं. २. घ—निर्गमागमाप्यायितृत्वं. ३. क-ख-ग—प्रसिद्धयोप. ४. घ—'अग्रे' इति पदं न. ५. घ—मज्ञानमभूत्. ६. घ—तत्सदसतो. ७. घ—व्यावहारिक सदजायत. ङ—व्यावहारिकं संज्ञायते. ८. घ—अज्ञानस्यैवासिद्धिः. ९. घ—असद्वेदमग्र आसीत्. १०. घ—कुतस्तु खलु सोम्येदमग्र आसीदिति. ११. क-ख-ग—तैरनङ्गीकाराच्च लय उक्तः.

अथ कर्तृत्व[1]मुपादानत्वं चाह—तदैक्षतेति। ईक्षणात् स्यामिति चोभयसिद्धिः। तत् सत्—सूक्ष्मचिदचिद्विशिष्टं ब्रह्म तेजः—तेजोऽवस्थं बहु स्याम्, तत्तेज ऐक्षतेति पूर्वोत्तरानुसारात्। तस्मादित्यौचित्यद्योतनम्।

[2]सदेवेदमासीदिति स्थूलस्य लय उक्तः। [3]सृष्टिरप्यस्यैव वाच्या। तत् कथंभूता सृष्टिरुच्यत इति शङ्कां परिहरन् व्यष्टिसृष्टिं तृतीयखण्डेनाह—तेषामिति। अण्डजं जीवजमुद्भिज्जमित्येतेषां विभागानां बीजानि त्रीण्येव तेजोबन्नान्येव। व्यष्टिसृष्ट्यर्थमेव भूतसृष्टिरुक्तेति भावः। व्यष्टिसृष्टि[4]सङ्कल्पमाह—सेयमिति। ननु सत ईक्षणमनुपपन्नमचेतनत्वात्। चेतनत्वेऽपि निरुक्तेक्षणानुपपत्तिरिति शङ्कां देवताशब्देन परिहरति। सा आदेशपदेन निर्दिष्टा इयं सत्पदेन निर्दिष्टा। तिस्रो देवताः—अत्र देवताशब्देन देवताशरीरत्वात् भूतान्युच्यन्ते। नामरूपयोः स्वपर्यन्तत्वसिद्धये अनुप्रवेशकीर्तनमनुप्रवेशस्य नामरूपव्याकरणार्थत्वद्योतनार्थम्। [5]ल्यपा समानकर्तृकत्वनिर्देशः। अनुप्रवेशस्य हि [6]तादर्थ्ये नामरूपव्याकरणयोः स्वपर्यन्तत्व एव सिध्यति। जीवस्यापि कार्यत्वसिद्धये तद्द्वारकमनुप्रवेशमाह—अनेनेति। अनेन जीवेनात्मनाऽनुप्रविश्याहं [7]नामरूपे व्याकरवाणीत्यर्थः। जीवपदं स्वपर्यन्तम्। अतः स्वपर्यायेणात्मशब्देन सामानाधिकरण्योपपत्तिः। अनेन जीवेनानुप्रवे[8]शस्तद्द्वारकस्वानुप्रवेशश्च विवक्षितः।

नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।
नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः॥ इति

त्रिवृत्करणं विना भूतानां [9]कार्याक्षमत्वात् नामरूपव्याकरणार्थं त्रिवृत्करणसङ्कल्पमकरोदित्याह—तासामिति॥ कार्यसङ्कल्पानन्तरं [10]कारणसङ्कल्पो युक्त एव। सेयं देवतेति-अत्र पाठक्रमो [11]न नियामकः, किन्त्वर्थस्वभाव एव। स च कार्यकारणभाव एव; व्याकरणस्य कार्यत्वं सङ्कल्पप्राथम्यादवगतमेव। एवमनुप्रवेश-

---

१. घ—मुपादानत्वाच्चाह. २. घ—इदं सदासीदिति. ३. घ—सृष्टिरप्येवं वाच्या. ४. घ—सङ्कल्पमेवाह... ५. घ—"ल्यपा" इदं न. ६. घ—स्वतादात्म्यं नामरूपयोः. ७. घ—'नामरूपे' इदं न. ८. घ—नुप्रवेशस्य तद्द्वारक. ङ—नुप्रवेशस्तद्द्वारक. ९. घ—कार्यत्वाक्षमत्वात्. १०. कारणत्वसङ्कल्पो. ११. घ—न क्रमनियामकः.

तथा चकार तच्छश्वत्संवर्तेते तꣳ होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

इति षष्ठप्रपाठके त्रयोदशः खण्डः

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥ तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाऽऽचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठप्रपाठके चतुर्दशः खण्डः

पुरुषꣳ सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥ अथ यदाऽस्य वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मां भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति षष्ठप्रपाठके पञ्चदशः खण्डः

पुरुषꣳ सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥ १ ॥ अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधः सत्येनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥ २ ॥ स यथा तत्र नादाह्येतैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

इति षष्ठप्रपाठके षोडशः खण्डः

श्रीमते रामानुजाय नमः.

# श्रीमद्वाधूलमहाचार्यवर्यैरनुगृहीतेषु पञ्चसु विजयेषु

तृतीयः

## सद्विद्याविजयः.

वाधूलश्रीनिवासार्यतनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम् ॥
वेद्यता ब्रह्मविद्याभिर्हरेरिति निरूपितम् ।
तेन तत्रैव जिज्ञासा सद्विद्यालक्ष्मशोधिनी ॥

उक्तं भगवतः सर्वविद्यावेद्यत्वम् । अतस्स एव जिज्ञास्यः । जिज्ञास्यलक्षणमुक्तं "यतो वा इमानी" ति । तत्र च जगत्कारणत्वं लक्षणमभिसंहितम् । तच्च सद्विद्यायां प्रतिपन्नम् । तत्र चोपोद्घातेन प्रथमखण्डेन पितापुत्राख्यायिकया प्रतिपिपादयिषितार्थोऽवतार्यते । अनन्तरं षड्भिः खण्डैः प्रतिपिपादयिषितार्थः प्रतिपाद्यते । अनन्तरं च नवभिः स एवार्थः स्थाप्यते । केन सिद्धोऽयं विभागः ? उच्यते । सद्विद्यान्त इव [१]सप्तमखण्डान्तेऽपि "तद्धास्य विजज्ञाविति विजज्ञाविती" ति पित्रा पुत्रस्योत्पिपादयिषितं ज्ञानं सम्यगेव निर्वृत्तमिति ह्यवगम्यते । न चावा[२]न्तरार्थस्य ज्ञातव्यतापरमिदमिति वक्तुं [३]शक्यम् । पूर्वोत्तरखण्डेष्ववान्तरार्थेषु [४]तद्दर्शनात् "उद्दालको हारुणि" रिति पुनरुपदेशारम्भप्रतीतेश्च पूर्वप्रक्रान्त उपदेशः परिसमाप्त इत्यवगम्यते । तस्मात् प्रथमखण्डो नवखण्डी च [५]मध्यमषट्कशेषभूतौ । तत्र विवक्षितार्थस्य साधिष्ठताज्ञापनार्थं पितापुत्राख्यायिकामाह "श्वेतकेतु" रित्यादि । आरुणेयः अरुणस्य गोत्रापत्यं पौत्र इत्यर्थः । "उद्दालको हारुणिश्श्वेतकेतुं पुत्र" मिति वक्ष्यते । अननूच्य—अनूक्तिः स्वाध्यायाध्ययनम् । स्वाध्यायमनधीत्येत्यर्थः । श्वेतकेतुरुपेत्येत्युपनीतत्वं गम्यते । उपनयीतेति प्रयोजकव्या-

---

१. क—सप्तमखण्डेऽपि. २. घ—न्तरार्थस्य ज्ञाततापर. ङ—न्तरार्थज्ञाततापर. ३. ख—शक्यते. ४. घ—तद्दर्शनात्. ५. क-ख-ग—मध्यमखण्ड.

पारान्तर्गतप्रयोज्यव्यापारस्य उपपूर्वेणैतिना प्रत्यभिज्ञानेन गुरुकुलान्युपेत्येत्यवगमात्। "महामनाः" कर्ममीमांसोपचितमनाः, "अनूचानः" अधीतवेदाङ्गः। 'स्तब्धः' अव्यापारः। अलम्पटः—परिपूर्णः। उद्दालकः पुत्रस्नेहेन ब्रह्मोपदिदिक्षुः तस्य ब्रह्मजिज्ञासामुत्पादयितुमाह—'श्वेतकेतो' इत्यादि। तमादेशं—प्रसिद्धं नियन्तारम्। उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात् तच्छब्दः प्रसिद्धिपरः[१]। "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" "यः पृथिवीमन्तरो यमयति" इत्यादिषु प्रसिद्धिर्द्रष्टव्या। आदेश इति कर्तुरपि साधकतमत्वात् स्वातन्त्र्यमविव[२]क्षित्वा साधकतमत्वविवक्षया वस्तुतः कर्तर्येव[३]करणे घञ्, 'विवक्षातः कारकाणि भवन्ती'ति न्यायात्। कर्मणि घञङ्गीकारेणोपदेश्यपरत्वाभ्युपगमे [४]प्रकृत्य-स्वारस्यम्। आङ्पूर्वस्य दिशेः प्रशासनार्थत्वात्।

किञ्च—धर्मादेरप्युपदेश्यत्वेन तस्य ब्रह्मासाधारण्यासिद्धेः, अप्राक्ष्य इत्यनेनै[५]वोपदेश्यत्वसिद्धेश्च आदेशशब्दो व्यर्थः। किञ्च "सदेव सोम्येद" मिति वक्ष्यमाणत्वेन नपुंसकपदान्तरनिर्देशे स्वरसेऽपि पुंलिङ्गनिर्देशो नियन्तृप्रतीत्यर्थ एव। नियन्तृपरस्यादेशपदस्य "एष त आत्माऽन्तर्याम्यमृतः" "स त आत्माऽन्तर्याम्यमृतः" "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्यत्र पर्यवसानेन तत्प्रसिद्धिसापेक्षस्य निर्देशस्य पुंलिङ्गत्वोपपत्तेः।

अपिच तमादेशमिति तच्छब्दः प्रसिद्ध्यर्थ इत्युक्तमेव। नियन्तृत्वं हि बहुश उपदिश्यते न तथोपदेश्यत्वम्। अतो नियन्तैवादेशशब्दार्थः। [६]प्रकरणानु-सारादपि नियन्तृपरत्वमेव युक्तम्। अत्रोपादानत्वमात्रप्रतिज्ञायां—"तदैक्षत, असृजत" इत्यवक्तव्यं स्यात्। तत्तेजोऽभवदित्यादि हि वाच्यम्। अत उत्त-रत्र कर्तृत्वाभिधानादिहापि तदुक्तेरपेक्षितत्वादपेक्षितविधानन्यायात् तदभिधानमेव युक्तम्। 'उत तमादेश'मित्याक्षेपाभिप्रायम्। ब्रह्मज्ञानं हि स्तब्धताहेतुः। तदभावेऽपि सा विस्मयनीयेति भावः। "येनाश्रुत" मिति "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवती"ति मैत्रायणीयश्रुत्यनुसारात् उपादान[७]प्रकरणानुगु-

---

१. घ—'तत्तत्परेणेतरं विषमत्वं प्रयाति' इति अक्षराणि दृश्यन्ते. २. ङ—क्षित' साधक. ३. घ—कारके. ४. घ—प्रकृत्यर्थ स्वारस्यं? ५. ङ—वोद्देश्यत्व. ६. घ—प्रकरणादपि. ७. घ—प्रकरणाच्च.

ण्याच्च येन श्रुतेनाश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः। विज्ञानं निदिध्यासनम्। अश्रुतत्वं स्थूलकारणविशिष्टरूपेण, श्रुतत्वं सूक्ष्मरूपेणेति हृदयम्। आवृत्त्या ज्ञाततां दृढीकर्तुं श्रवणादित्रयमुपन्यस्तम्। इति पितोवाचेत्यन्वयः। अन्यज्ञानेनान्यस्य ज्ञातत्वासम्भवं मन्वानः पुत्रः पृच्छति 'कथमिति' गुरुराह यथेत्यादि। अत्रापि मृत्पिण्डादेर्ज्ञातत्वं विवक्षितम्। रूपभेदात् नामधेयभेदाच्च कार्यद्रव्यभेदाद्दृष्टान्तेऽप्यसंभवाशङ्कां परिहरति—'वाचारम्भणमि'ति। अध्ययनेन वसतीतिवत् प्रयोजनतया हेतुत्वं वाचेति विवक्षितम्। विकारग्रहणाज्जलाहरणादिव्यवहारोऽप्युपलक्ष्यते। वाग्व्यवहारार्थं जलाहरणादिव्यवहारार्थं च पृथुबुध्नोदराकारादिर्विकारो घटादिनामधेयं च मृत्पिण्डेन; आरम्भणम् आरभ्यते स्पृश्यते, कर्मणि ल्युट्। तत्र प्रत्यभिज्ञायुक्तिमाह—'मृत्तिकेत्येवे'ति। प्रातर्या मृत्तिकेहोपलब्धा सैवेदानीं घटादिरभूदित्यबाधिता प्रत्यभिज्ञा दृश्यते। इतीति प्रत्यभिज्ञां द्योतयति—[1]'मृत्तिकेत्येव सत्य' मित्यन्तेन। [2]व्यवहारानुकरणाभिलापरूपेण तद्धेतुभूता प्रत्यभिज्ञा लक्ष्यते। सत्यम्-अबाधितम्। लोहमणिः—स्वर्णपिण्डः। नखनिकृन्तनेनेति—चिकीर्षिताकारप्रागवस्थमाकारसाम्यादुच्यते। प्रतिज्ञावाक्ये कर्तृत्वं ब्रह्मज्ञानेन कृत्स्नस्य ज्ञातत्वं च प्रतिज्ञातम्। तत्र [3]द्वितीये शङ्का दृष्टान्तेन [4]परिहृता। पुनर्गुरुकुलप्रस्थापनशङ्कयाऽऽह—[5]'न वै' इति। "म" इति स्वकीयकुमारेभ्योऽपि निरवधिकव्यामोहविषयत्वं सूच्यते। तत् ब्रवीत्विति दृष्टान्ते उपादानोपादेय[6]भावात् ज्ञातता युज्यते। इह तु कथमिति भावः। एवं प्रथमखण्डेन कारणत्वमवतारितम्।

[7]अथ कारणत्वमाह—सदेवेति। समष्टिव्यष्टिसर्गौ। [8]व्यष्टिसर्गार्थं त्रिवृत्करणं विकारस्य नामधेयस्य च स्वपर्यन्तत्वसिद्धये नामरूपव्याकरणयोरनुप्रवेशाधीनतां, जीवस्य कार्यत्वसिद्धये अनुप्रवेशस्य जीवद्वारकतां त्रिवृत्करणोपपत्तिं [9]जीवस्य शरीर-

१. क-ख—मृत्तिकेवेति एव सत्यं. घ—मृत्तिकैवेत्येतत्सत्यं. २. घ—व्यवहाराभिलाप. ३. ङ—द्वितीयाशङ्का. ४. क-घ—समाहिता. ५. घ—"न वा" ङ—"स वा". ६. घ—भावाज्ञानता. ७. घ—अधिकरणत्व. ८. घ—व्यष्टिसर्गमिव त्रिवृत्करणमविकार. ९. घ—जीवशारीरद्वारक.

द्वारकसत्कार्यत्वसिद्धये शरीरस्य [१]भूतत्रयमयत्वं सूक्ष्म[२]निर्गममाप्यायकत्वं चोपपाद्य विशिष्टोपादानत्वं [३]प्रसाध्योपसंहरति षड्भिः खण्डैः।

द्वितीयखण्डेन समष्टिसृष्टिमाह—सदेवेति। अप्ययपूर्वत्वात् सृष्टेः प्रथमतो लयमाह। अनेन सर्गप्रलययोः प्रवाहानादित्वं सूच्यते। तेन सतोऽनादित्वसिद्ध्या सत्कार्यवादः स्थाप्यते। अन्यथा सतः स्वरूपतः कार्यत्वे कथं सत्कार्यवादः सिध्येत्। इदं परिदृश्यमानं चेतनाचेतनात्मकं विभक्तनामरूपं स्थूलं कार्यं [४]अग्रे सर्गात् प्राचीने प्रलयकाले अद्वितीयं कर्त्रन्तरनिरपेक्षम्, एकम्—अविभक्तनामरूपतया कार्यावस्थानिबन्धनबहुत्वशून्यं सत् आसीदित्यर्थः। सत एव कर्तृत्वस्य कार्यरूपेण बहुभवनस्य च वक्ष्यमाणत्वात् प्रकरणानुसारेण एकाद्वितीयपदयोरर्थ-उक्तः। प्रतिज्ञायामादेशपदेन नियन्तृतयाऽवगतस्यैवोपादानत्वोक्तेः, इदमिति प्रसिद्ध कार्यनिर्देशाच्च श्वेतकेतुर्महामनाः सदिदमिति विशिष्टग्रहणमिति स्वयमेव ज्ञास्यतीत्यभिप्रायेण वैशिष्ट्यं न कण्ठरवेणोक्तम्। ततश्चेदं सदासीदित्यस्य स्थूलचिदचिद्विशिष्टं सूक्ष्मचिदचिद्विशिष्टमासीदिति पर्यवसितोऽर्थः। सच्छब्देन निर्देशो वादिनिराकरणार्थः।

मिथ्यावादिमतमनूद्य दूषयति—"तद्धैक"इति। तत् तत्र इदमद्वितीयं कार्यशून्यम्। अत एवैकं सद्विलक्षण[५]मज्ञानमासीत्। [६]तस्मादसतोऽज्ञानात् प्रातिभासिकात् [७]व्यावहारिकसत्ताशून्याद्व्यावहारिकं सज्जायत इत्यर्थः। कथमसतः सज्जायेतेति [८]अज्ञानस्यैवमसिद्धिरसतस्सदुत्पत्त्यसंभवश्च विवक्षितौ। सच्छब्देन मिथ्यात्वनिरासोऽभिप्रेतः। निरासश्चाद्वैतविद्याविजये द्रष्टव्यः। [९]असदेवेदमग्र आसीदिति तन्त्रावृत्त्यन्यतरेण नैयायिकमतानुवादः [१०]"कुतस्तु खलु सोम्ये"ति तन्निरासश्चाभिप्रेतः। शून्यवादानुवादस्तु न संभवति। असत्त्वस्य कालविशेषानपेक्षत्वात् "सज्जायत" इति तैरनङ्गी[११]कारात्—न च लय उक्तः।

---

१. घ—भूतत्रयत्वं. २. घ—निर्गमागमाप्यायितृत्वं. ३. क-ख-ग—प्रसिद्ध्योप.
४. घ—'अग्रे' इति पदं न. ५. घ—मज्ञानमभूत्. ६. घ—तत्सदसतो. ७. घ—व्यावहारिक सदजायत. ङ—व्यावहारिकं संज्ञायते. ८. घ—अज्ञानस्यैवासिद्धिः.
९. घ—असद्वेदमग्र आसीत्. १०. घ—कुतस्तु खलु सोम्येदमग्र आसीदिति.
११. क-ख-ग—तैरनङ्गीकाराच्च लय उक्तः.

अथ कर्तृत्व[१]मुपादानत्वं चाह—तदैक्षतेति। ईक्षणात् स्यामिति चोभयसिद्धिः। तत् सत्—सूक्ष्मचिदचिद्विशिष्टं ब्रह्म तेजः—तेजोऽवस्थं बहु स्याम्, तत्तेज ऐक्षतेति पूर्वोत्तरानुसारात्। तस्मादित्यौचित्यद्योतनम्।

[२]सदेवेदमासीदिति स्थूलस्य लय उक्तः। [३]सृष्टिरप्यस्यैव वाच्या। तत् कथंभूता सृष्टिरुच्यत इति शङ्कां परिहरन् व्यष्टिसृष्टिं तृतीयखण्डेनाह—तेषामिति। अण्डजं जीवजमुद्भिज्जमित्येतेषां विभागानां बीजानि त्रीण्येव तेजोबन्नान्येव। व्यष्टिसृष्ट्यर्थमेव भूतसृष्टिरुक्तेति भावः। व्यष्टिसृष्टि[४]सङ्कल्पमाह—सेयमिति। ननु सत ईक्षणमनुपपन्नमचेतनत्वात्। चेतनत्वेऽपि निरुक्तेक्षणानुपपत्तिरिति शङ्कां देवताशब्देन परिहरति। सा आदेशपदेन निर्दिष्टा इयं सत्पदेन निर्दिष्टा। तिस्रो देवताः—अत्र देवताशब्देन देवताशरीरत्वात् भूतान्युच्यन्ते। नामरूपयोः स्वपर्यन्तत्वसिद्ध्यै अनुप्रवेशकीर्तनमनुप्रवेशस्य नामरूपव्याकरणार्थत्वद्योतनार्थम्। [५]ल्यपा समानकर्तृकत्वनिर्देशः। अनुप्रवेशस्य हि [६]तादर्थ्ये नामरूपव्याकरणयोः स्वपर्यन्तत्व एव सिध्यति। जीवस्यापि कार्यत्वसिद्ध्यै तद्द्वारकमनुप्रवेशमाह—अनेनेति। अनेन जीवेनात्मनाऽनुप्रविश्याहं [७]नामरूपे व्याकरवाणीत्यर्थः। जीवपदं स्वपर्यन्तम्। अतः स्वपर्यायिणात्मशब्देन सामानाधिकरण्योपपत्तिः। अनेन जीवेनानुप्रवे[८]शस्तद्द्वारकस्वानुप्रवेशश्च विवक्षितः।

नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।
नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः॥ इति

त्रिवृत्करणं विना भूतानां [९]कार्याक्षमत्वात् नामरूपव्याकरणार्थं त्रिवृत्करणसङ्कल्पमकरोदित्याह—तासामिति॥ कार्यसङ्कल्पानन्तरं [१०]कारणसङ्कल्पो युक्त एव। सेयं देवतेति-अत्र पाठक्रमो [११]न नियामकः, किन्त्वर्थस्वभाव एव। स च कार्यकारणभाव एव; व्याकरणस्य कार्यत्वं सङ्कल्पप्राथम्यादवगतमेव। एवमनुप्रवेश-

१. घ—मुपादानत्वाच्चाह. २. घ—इदं सदासीदिति. ३. घ—सृष्टिरप्येवं वाच्या. ४. घ—सङ्कल्पमेवाह... ५. घ—"ल्यपा" इदं न. ६. घ—स्वतादात्म्यं नामरूपयोः. ७. घ—'नामरूपे' इदं न. ८. घ—नुप्रवेशस्य तद्द्वारक. ङ—नुप्रवेशस्तद्द्वारक. ९. घ—कार्यत्वाक्षमत्वात्. १०. कारणत्वसङ्कल्पो. ११. घ—न क्रमनियामकः.

कथनात् सद्द्वारकावस्थाश्रयतयोपादानत्वमुक्तम् । अचितः कार्यत्वमवस्थाद्वारकम् । चितः कार्यत्वमवस्थावद्द्वारकम् । परमचेतनस्य तदुभयद्वारकं सद्वारककारणत्ववत् सद्वारकमाश्रयत्वं चास्त्येव । खट्वायां शयनेऽपि प्रासादे शेत इत्यभिधानात् । जलपूर्णकुम्भवहने श्रमाधिक्योपलम्भाच्च उह्यमानगुरुत्वस्यैव श्रमप्रयोजकताया यथाप्रमाणमन्यत्र क्लृप्तत्वेन स्वैरमेव प्रयोजकान्तरकल्पनस्यानवकाशात् । न च भूतलस्य घटावस्थाश्रयत्वप्रसङ्गः । [1]यथादर्शनमपृथक्सिद्धस्य स्वापृथक्सिद्धं प्रति तदपृथक्सिद्धस्यैव स्वापृथक्सिद्धं प्रति च द्वारत्वात् । एवं च ब्रह्मणः सद्वारकावस्थाश्रयत्वान्न निर्विकारश्रुतिविरोधोऽपि । सर्वत्रापि हि निषेधो यथाप्रसक्ति[2] । अचेतने ज्ञानं नेत्युक्ते यः संबन्धश्चेतने दृष्टस्तत्संबन्धेनाचेतनेऽपि प्रसक्तौ तेन संसर्गेण निषेधः क्रियते, लौकिकेष्वेव ज्ञानं न शास्त्रार्थेष्वित्युक्तौ लौकिकेषु दृष्टविषयविषयिभावसंबन्धेनैव, वैदिकेष्वपि प्रसक्तौ तेन संसर्गेण निषेधः क्रियते । एवमिहापि येनाद्वारकसंबन्धेनाचेतने [3]विकारो दृष्टस्तेनैव संबन्धेन निषेधः क्रियते । अन्यथा उपादान[4]त्वसर्वाधारत्वश्रुतिविरोधात् । नचाद्वारकसंसर्गप्रतीतौ लक्षणा । प्रतियोग्यधिकरणाभावोपस्थापकपदेषु लक्षणाविरहात् । केन तर्हि तत्प्रतीतिः ? प्रतियोगित्वप्रतियोगितावच्छेद[5]कवन्निषेधकवाक्येनैव । एवं [6]विशिष्टस्योपादानत्वमुपादेयत्वं चोक्तम् ।

ननु किमिदं विशिष्टोपादानत्वं, न तावदुभयोः; निर्विकारत्वश्रुति विरोधात् । विकाराश्रयत्वं ह्युपादानत्वम् । अत एव न विशेष्यस्य । नापि विशेषणस्य । [7]ब्रह्मणोऽनुपादानत्वप्रसङ्गात् इति चेन्न । उभयोपादानत्वस्यैवविवक्षितत्वात् । विशेषणं [8]विशेषणोपादानं विशेष्यं विशेष्योपा[9]दानमित्युक्तरीत्या ब्रह्मणि विकाराश्रयताया द्वारसापेक्षत्वादपि विशिष्टोपादानत्वव्यपदेशः । एवं च इदमिति स्थूल[10]चिदचिद्विशिष्टं ब्रह्मरूपं कार्यं निर्दिश्य सदासीदिति तस्य स्थूलावस्थाप्रहाणेन सूक्ष्मचिदचिद्विशिष्टकारणरूपता प्रतिपाद्यते । एतत्सर्वमभिप्रेत्य नामरूपव्याकरण[11]मनुप्रवेशप्रयोज्यमुक्तम् । ननु अनुप्रविश्य व्याकरवाणीति अनु-

---

१. घ–यथा दर्शनं पृथक् सिद्धस्य स्वपृथक्. २. घ–यथा प्रसक्तिः ३. घ–विकारा दृष्टास्तेनैव. ४. उपादानत्वद्वारा सर्वा. ५. घ—वच्छेदकत्ववन्निषेधक. ६. ङ—विशिष्टस्यैवोपादान. ७. ङ–ब्रह्मण उपादानत्व. ८. ङ–विशेषोपादानम्. ९. ङ–विशेष्योपादानत्व. १०. क–ख–ग—चिदचिद्विशिष्टब्रह्मरूपम्. ११. घ—मनुप्रवेशाधीनमुक्तम्.

प्रवेशस्य सङ्कल्पविषयता प्रतीयत इति चेत् सत्यं प्रतीयते। अत एव नामरूप-व्याकरणप्रयोजकत्वसिद्धिः। अनुप्रवेशस्य साध्यत्वाभावेन प्रयोजकत्वविशिष्टवेषेणैव सङ्कल्पविषयतया विवक्षितत्वात्। प्रयोजकत्वं च रूपाश्रयत्वनामवाच्यत्वाभ्यामेव सिध्यति। न हि पितृकुलालयोरनुप्रवेशो नामरूपव्याकरणे हेतुतया दृष्टः। कार्य-प्रयोजकमेव हि त्रिवृत्करणमिह कीर्त्यते। अतः प्रकरणावगतं च प्रयोजकत्वम्। अन्यथा भूतसृष्ट्यनन्तरं कार्यसृष्टिं वक्तुं प्रथमतः सामान्येन कार्यत्रैविध्यमुखेन कार्य-मुपक्षिप्य "हन्ताहमिमा"इत्यादिना कार्यसृष्टिं प्रतिपादयितुं प्रवृत्तस्य मध्येऽनुप्रवेश-कीर्तनं स्रुघ्नान् गच्छतो मालवकपथान्वेषणवदसङ्गतमेव स्यात्। एवं दृष्टान्ते विकारो नामधेयं च स्पृश्यते न तु द्रव्यमुत्पद्यत इति यत् पूर्वमुक्तं तद्दार्ष्टान्तिके स्पष्टीकृतम्। एवं तृतीयखण्डेन व्यष्टिसृष्टिरुपपादिता ॥

एवं त्रिवृत्करणमन्यस्य [१]कार्यस्याभावं च संवादयति चतुर्थखण्डेन—"यदग्ने"रित्यादि। अपागादिति-अग्नित्वेन पराभिमतादग्नित्वावस्थाकारणादन्यस्मा-दग्नित्वमपागादित्यर्थः। पूर्वोक्तामुपपत्तिं स्मारयति—वाचारम्भणमिति। भूतत्रय-रूपाण्येवाग्नौ प्रत्यभिज्ञायन्ते। सा च प्रत्यभिज्ञा अबाधिता रूपान्तरानुपलम्भादिति भावः। गुर्वन्तरसंवादमाह—एतद्धस्मेति। तत्-कार्यकारणयोरनन्यत्वम्। एतत्-त्रिवृ-त्करणम्, विद्वांस आहुरित्यर्थः। तेभ्यस्सकाशादन्ये केचनेममर्थमवेदिषुरित्याह-"पूर्वे-महाशाला महाश्रोत्रियाः न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुरि"ति। महाशालाः-यज्वानः। महाश्रोत्रियाः-श्रुतवेदान्ताः। अविज्ञातं भूत-त्रयातिरिक्तं कार्यद्रव्यम्। न कश्चिदपि-नः-अस्माकमस्मत्पुरतः उदाहर्तुं शक्नोतीति इममर्थमेभ्यः विद्वांस इति निर्दिष्टेभ्यो विदाञ्चक्रुरित्यर्थः।

जीवस्य शरीरद्वारकं कार्यत्वमभिप्रयन् स तस्य सत्कार्यत्वसिद्धये शरीरस्य भूतत्रयमयत्वमाह पञ्चमखण्डेन। अन्नमशितमिति-तन्म इति-आयुर्घृतमितिवद्व्यप-देशः। तेनाप्यायितमित्यर्थः। सूक्ष्मस्य सारांशस्य कथं ततो निर्गम इत्यभिप्राये-णाह—भूय इति।

---

१. ङ—कार्यद्रव्यस्याभावः.

सूक्ष्मनिर्गममुपपादयति—षष्ठखण्डेन। [१]आप्यायकत्वमुपपादयति-सप्तमखण्डेन। "षोडशेति [२]अभ्याहितस्येति" वह्नेरिति शेषः। एतर्हि—इदानीम् "तद्धास्ये"ति—आचार्येण प्रतिपिपादयिषितं तमादेशमिति प्रतिज्ञातं कार्यकारणयोरनन्यत्वं कर्तुरुपादानत्वं [३]चिदचिद्विशिष्टस्योपादानोपादेयभावं च विशिष्य सोपपत्तिकं कुदृष्टिनिरसनपूर्वकं ज्ञातवानित्यर्थः। हेति—कुदृष्टिनिरसनप्रयुक्तहर्षो द्योत्यते।

श्वेतकेतोः स्वेनोत्पादितां भगवतः सर्वोपादानत्वबुद्धिं[४]वेदान्तिनोऽपहरेयुरिति पुत्रस्नेहेनापायमाशङ्क्य विशिष्टोपादानत्वं सोपपत्तिकं नवकृत्वोऽभ्यस्य द्रढयति-नवभिः खण्डैः। जीवस्य कार्यता द्विविधा—एका [५]अज्ञानावस्थाद्वारिका। [६]अपरा ज्ञानावस्थाद्वारिका। द्विविधामपि तामुपपादयत्यष्टमखण्डेन—स्वप्नान्तमिति। स्वपितीति प्रयोगप्रसिद्ध्या जीवस्य लय उच्यते। यत्र-यदा। सता सम्पन्नो भवति-ज्ञानविकासरूपस्थूलावस्थाप्रहाणेन सूक्ष्मचिदचिद्विशिष्टब्रह्मणि लीनो भवति। तदा स्वमपीतो भवति—स्थूलावस्थाप्रहाणेन स्वस्मिन् लीनो भवति। यथा शकुनिरिति—प्राणो जीवः प्राणमेवाश्रयते प्राणे निर्व्यापारं तिष्ठतीत्यर्थः।

द्वितीयं कार्यत्वमुपपादयति—अशनायेत्यादिना। तत्र स्वपितीति प्रसिद्ध्येवाशनायापिपासा[७]प्रसिद्ध्या विवक्षितं साधयति। किं तत इत्यत्राह—"तत्रैतदिति" तत्र—अशनायावस्था[८]यामेतत्। तत्कालीनः [९]शारीरो विकारः। शुङ्गमङ्कुरं कारणानुमापकमित्यर्थः। तस्येति अद्भिर्नीतं क्षीणमन्नं तत्कारणमित्यर्थः। अन्नेनेति उक्तरीत्या तन्नेतृत्वात् कारणत्वाच्चेति भावः। "सन्मूला" इति यत एवं भूतत्रयात्मकत्वं शरीरस्य भूतानां च सन्मूलत्वमतः प्रजा भूतत्रयात्मकशरीरसंसृष्टाः सन्मूलाः सत्कार्यभूताः "सदायतना" इति स्थितिरुक्ता,"सत्प्रतिष्ठा" इति लयः; "यत्रैतत्पुरुषः पिपासति नामे"ति पूर्ववद्योज्यम्। जीवस्य ब्रह्मकार्यत्वसिद्धये शरीरस्य भूतत्रयात्मकत्वमुक्त्वा तदपि [१०]त्रिवृत्कृतभूतत्रयात्मकत्वमेवेत्यभिप्रायेण त्रिवृत्करणोपपादनं स्मारयति—यथा त्विति। भूतावस्थाद्वारकं लयमुपपादयति-

१. ङ—आप्यायकत्वमुपादयेत्याह—'भूय' इति. २. घ—अभ्याख्यातस्येति. ३. ङ—चिदचिद्विशिष्टोपादानो. ४. ङ—त्रेदान्तिनोपविहरेयुरिति. ५. ङ—स्वेनोपपादितां बुद्धिम्. ६. ङ—अज्ञानद्वारिका, अपरा शरीरद्वारिका. ७. ङ—प्रसिद्धिभ्याम्. ८. ङ—यामतत्कालीनः. ९. घ—शारीरोधिविकारः. १०. घ—त्रिवृत्कृतत्रयात्मक.

अस्य सोम्येति। एवमुपादानस्यमुपपाद्य एतेत्यभिप्रायेण [1]उपसंहरति—स य इति। यस्य आदेश एषोऽणिमा सूक्ष्मावस्था; अथवा यस्य आदेशः एष सदित्युक्तः अयमणिमेत्यर्थः। ऐतदात्म्यमिदं सर्वम् एतदात्मकं सदादेशस्वरूपम् स्थूलचिद-चिद्विशिष्टं ब्रह्म सूक्ष्मचिदचिद्विशिष्टब्रह्माभिन्नमित्यर्थः। कुदृष्टिनिरविचाल्यत्वाभिप्रायेणाह—तत्सत्यमिति। स्वरूपाभेदबुद्धिं वारयति स आत्मेति। तस्य अन्तर्यामित्वेन स्थूलसूक्ष्मावस्थाद्वययोगात् अयमभेदव्यपदेश इत्यर्थः। तत्त्वमसीति विशिष्टोपादानोपादेयभावे श्वेतकेतुमेवोदाहृत्योपसंहरति दार्ढ्यार्थम्। 'स त आत्माऽन्तर्याम्यमृत' इतिवत् तत् त्वमिति पदद्वयमपि परमात्मपर्यन्तं, श्वेतकेतुपदं तु न तथा संबोधनत्वात्। युष्मदुपपदत्वात् मध्यमपुरुषः। कथं तर्हि अहमनेन संपन्न इति संपत्त्यग्रहणमित्यभिप्रायेण पृच्छति भूय इति॥

अग्रहणमुपपादयति नवमखण्डेन। यथा सोम्येति। अमुष्याहमिति अमुष्य [2]रसोऽयमेभिः सङ्गतोऽस्मीति विवेको नेत्यर्थः। सामग्रीविरह एव तस्य [3]तथा ज्ञानाभावनिबन्धनं [4]स एवेहापीति भावः। सामग्रीसंभावनामपि वारयितुं [5]जडदृष्टान्तोपादानम्। त इहेति—यथा पूर्वं सुप्तास्तद्दशायामपि व्याघ्रादयो भवन्त्येव। तथापि तद्रूपं न जानन्ति तद्वदिहापीति भावः। सुप्तोत्थितज्ञानं वा विवक्षितम्। तदेति सुप्तोत्थितकालः परामृश्यते। अत्रापि पक्षे स्वापकाले व्याघ्रादि-रूपवदेव सत्संसर्गमपि न जानन्तीति भावः। स य एषोऽणिमेति पूर्ववत्। कथ-मागमनाग्रहणमिति पृच्छति—भूय इति॥

तदुपपादयति दशमखण्डेन। इमास्सोम्येति। इयमहमस्मीति अस्मात्स-मुद्रादागताऽहमिति न जानन्तीत्यर्थः। स य एष इति पूर्ववत्। [6]भूतावस्था विशिष्टस्य लय उक्तः। तत्र जीवस्यैव कथं मरणं वदतीत्यभिप्रायेणाह—भूय इति। तदुपपादयति एकादशेन। अस्य सोम्येति स य इति पूर्ववत्। अणिम्नः कथं महत्त्वमित्यभिप्रायेणाह भूय इति। तदुपपादयति द्वादशेन। न्यग्रोधेति—यदि परमात्मा कार्यकारणानुगतः कथं तर्हि तदनुपलम्भः। अनुपलम्भे च तत्र

१. उपपादयति. २. पुंसोऽहमे. ३. तस्य यदा ज्ञानाभावा. ४ स्वदेशे हापीति. ५. जगद्दृ. ६. भूतावस्थाद्वय विशिष्टस्य.

तस्यानुगतत्वे किं ज्ञानमित्यभिप्रायेणाह—भूय इति। तदुपपादयति त्रयोदशेन। स य इति पूर्ववत्। लवणवदिह ज्ञानोपायः क इत्यभिप्रायेणाह भूय इति। तदुपपादयति चतुर्दशेन। यथा सोम्य पुरुषमिति। आचार्यवानिति। आचार्यवानुपदेशेन तं सदादेशं वेद, तद्विदो मम सत्संपत्तौ शरीरवियोगपर्यन्तमेव विलम्ब इत्यपि जानाति। तज्ज्ञानस्य मोक्षसाधनतया आचार्येणाभिधानादिति भावः। न विमोक्ष्य इति मोक्षतया किमभिप्रेतमित्यभिप्रायेणाह भूय इति। विवक्षितमाह पञ्चदशेन। पुरुषं सोम्येति। स य इति पूर्ववत्। इतः परमप्युपपाद[1]नीयमस्तिचेत् उपपादयेत्यभिप्रायेणाह भूय इति। इदं ब्रह्मणः कर्तृत्वं विशिष्टोपादानत्वं च तप्तपरशुग्रहणेन श्रद्धापयितव्यमित्याह—चरमखण्डेन। पुरुषं सोम्योतेति स यथेति। तथा विशिष्टोपादानवार्यापि तच्छ्रद्धापनाय तप्तपरशुग्रह[2]णेन श्रद्धापयितव्य इत्याह। स य इति पूर्ववत्। कर्तुर्विशिष्टोपादान[3]तया—आदेशं येनाश्रुतमित्युपक्रमः। ऐतदात्म्यमिदं सर्वं स आत्मेत्युपसंहारः [4]तस्यैवाभ्यासः। अपूर्वत्वं प्रसिद्धम्। अथ संपत्स्य इति फलम्। आख्यायिका अर्थवादः। दृष्टान्तप्रदर्शनानुप्रवेश[5]कथनादिरुपपत्तिः। एवं षड्विधतात्पर्यलिङ्गोपेतया सद्विद्यया कर्तुर्विशिष्टोपादानभावः समर्थितः। श्रुत्यन्तराण्यपि इमामेव सद्विद्यामनुरुन्धते॥

विशिष्टोपादानत्वे षड्विधतात्पर्यलिङ्गकथनम्॥

असद्वा इदमग्र आसीत्, स्थूलावस्थं ब्रह्म तच्छून्यं सूक्ष्मावस्थमासीत्। ततः असतः सूक्ष्मावस्थादित्यर्थः। सत् स्थूलावस्थं कार्यकारणयोरभेदं विशिष्टोपादानत्वं कर्तृत्वं चाह—'तदात्मानं स्वयमकुरुते'ति। अनेन 'तत्तेजोऽसृजते'त्यादौ तेज आदिपदानां भगवत्पर्यन्तत्वं प्रख्यापितम्। तत् असत् सूक्ष्मावस्थम्। एवं 'आत्मा वा इदं' 'ब्रह्म वा इदम्' 'एको ह वै नारायणः' ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः', 'आत्मन आकाशस्संभूतः' 'यतो वा इमानि भूतानि जायन्ते' 'तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्' इत्यादिवाक्यान्यप्येतदर्थकानि॥

---

१. दर्शनीयं चेत्. २. ग्रहणेन न दह्यतेति भावः। स य इति पूर्ववत्. ३. पादनताया आदेशम्. ४. अस्यैवाभ्यासः. ५. कीर्तनादि.

ननु 'आत्मनः' यतो वा इमानि भूतानि इत्याभ्यां कथमुपादानत्वसिद्धिः। न च पञ्चम्या तत्सिद्धिः। तस्या अनेकार्थत्वात्। अपादानार्थत्वेऽपि 'ध्रुवमपायेऽपादान'मित्यपादानसंज्ञासिद्धेः [1]'जनिकर्तुःप्रकृति'रित्यनेनापादानसंज्ञायामपि प्रकृतिग्रहणस्य कारणमात्रार्थकत्वेन उपादानत्वासिद्धेः। अन्यथा पुत्रात्प्रमोदो जायत इत्यत्रानुपपत्तेः। अत एव न्यासकृता, ध्रुवपदानुवृत्त्या जनिकर्तृसंबन्धिनोऽपादानसंज्ञायां प्रत्यासत्या [2]अनुपादानस्यैव स्यात्। प्रकृतिग्रहणात् सर्वत्र भव(त्येव)ति। तेन पुत्रात् प्रमोदो जायत इत्यादि सिध्यतीत्युक्तम्॥ अत एव—

'यदिन्दोरन्वेति व्यसनमुदयं वा निधिरपा
मुपाधिस्तत्रायं जयति जनिकर्तुः प्रकृतिता॥' [3]इति

मुरारिणा कारणमात्रे प्रकृतिपदं प्रयुक्तमिति चेदुच्यते। जनिकर्तृसूत्रं प्रत्याचक्षाणो भाष्यकार एव सूत्रस्येममर्थं मत्याह। [4]ध्रुवमपायेऽपादानमिति सूत्रेणैतद्विषयसिद्ध्या हीदं सूत्रं प्रत्याचख्यौ। 'अयमपि योग[5]श्शक्यो वक्तुम्। कथं 'गोलोमाविलोमभ्यो दूर्वा जायन्ते' इति 'अपक्रामन्ति तास्तेभ्य'इत्यादि प्रत्याख्यानभाष्यम्। यदिदं हेतुमात्रार्थं स्यात्, तदा पुत्रादौ ध्रुवमपाय इति सूत्राप्रवृत्तेः सूत्रस्य तदर्थत्वान्न प्रत्याख्यानावकाशः। पुत्रात् प्रमोदो जायते इत्यत्र का गतिरितिचेत्— प्रक्रियामञ्जरीपदमञ्जर्यादिषु उक्तो [6]'विभाषा गुणे स्त्रिया'मिति विभाषेति योगविभागः। नन्वेवं तत एव 'यतो वा' इत्यत्रापि पञ्चम्यस्त्विति चेत्, योगविभागस्योत्प्रेक्षितत्वेन प्रत्यक्षविध्यपेक्षया दुर्बलत्वात् तद्विषयत्वं हि [7]प्रयोगान्यथानुपपत्तिकल्प्यं बाहुलकविधिविषयत्ववत्। [8]इह तु जनिकर्तुः प्रकृतिरिति प्रत्यक्षशास्त्रसिद्धापादानविषयत्वोपपत्तेर्नान्यथानुपपत्तिः। मुरारिप्रयोगात् प्रकृतिपदं कारणमात्रार्थकमिति तु अयुक्तम्। चन्द्रस्य समुद्रैकदेशपरिणामित्वेऽपि बाधकाभावात्। यथाकथञ्चित् रसोत्पत्त्यर्थकाव्यप्रयोगमात्रादर्थसिद्धौ—

---

१. पाणिनि १–४–३०. सिद्धिः जनिकर्तुः प्रकृतिरित्यपि नापादानसंज्ञा विधायकः प्रकृति—अपादानत्वसिद्धेः. २. उपादान, अपादान. ३. अनर्घराघवनाटके. ४. पाणिनि १–४–२४. ५. शक्यते वक्तुम्. ६. पाणिनि २–३–२५. ७. प्रयोजनान्यथा. ८. इह च जमि.

'कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः'—

इति श्रीहर्षप्रयोगाच्चक्रभ्रमहेतुत्वस्य गुणत्वं दण्डस्य समवायिकारणत्वं च स्यात् ॥

वस्तुतस्तु—मुरारिवचनेनोदाहरणं हरिचन्दनपङ्कस्नेन तत्तायस्पर्शन्यायं [१]स्मारयति। तथाहि—चन्द्रार्णवयोः समानधर्मताया दर्शनात् जनिकर्तारं चन्द्रं प्रति प्रकृतित्वरूपमुपादानत्वं जयतीतिहि श्लोकार्थः; नतु कारणत्वं जयतीति। न हि कार्यसाधर्म्यं कारणत्वं प्रयोजकं किन्तु उपादानत्वमेव। एवं च अत्र अर्णव-[२]जन्यर्थत्वप्रसिद्धिमुपजीव्य समानधर्मत्वेन उपादानत्वमुत्प्रेक्ष्यते॥

यच्चोक्तं—'ध्रुवमपाये अपादानम्' इत्यपादानसंज्ञेति तन्न। अपायहेतु-क्रियां प्रत्यवधित्वेन [३]कारकस्य अपादानसंज्ञाविधानात्। अत्र च क्रियाया अश्रवणादपायाभावाच्च। नच शृङ्गाच्छरो जायते—इत्यादावप्यपरिणतभागसत्वात् तस्य अपायावधित्वादपादानत्व इहापि तद्वदेव संभवतीति वाच्यम्। तद्वदेवैक-देशोपादानत्वसिद्धेः। विभोरात्मनः अपायायोगाच्च। स्मृतीतिहासपुराणान्यपि एतन्निष्ठानि। तत्प्रपञ्चः परिकरविजये द्रष्टव्यः॥

इमं सद्विद्याराद्धान्तमसहमानाः प्रकारान्तरमपि निर्वोढुमसमर्थाः परस्परं निघ्नन्ति। तत्र केचित्—अनुपादानशब्देन [४]उपादानतां प्राहुः। केचित् उपादान शब्देन। पूर्ववादिनस्तावदाहुः—विशेष्यस्य विशेष्यविशेषणयोर्वा उपादानत्वे निर्वि-कारत्वश्रुतिविरोधः। विशेषणस्योपादानत्वे तु न ब्रह्मण उपादानत्वसिद्धिरिति न ब्रह्मोपादानमिति॥

येनाश्रुतमिति श्रुत्यर्थः॥

केचन सद्विद्यामनुरुन्धाना इव प्राहुः। [५]'सादृश्यप्राधान्याभ्यां प्रति-ज्ञादृष्टान्तौ। तथाहि—येनाश्रुतमिति येन श्रुतेन ब्रह्मणा अश्रुतं श्रुतं, ब्रह्मणि ज्ञाते तत्सादृश्यात् सर्वं ज्ञातं भवतीत्यर्थः। ब्रह्मज्ञानेन कृत्स्नफलसिद्धेरितरत् सर्वं

१. स्पर्शान्वयम्. २. जन्यत्वप्रसिद्धि. ३. कारणस्य. ४. अनुपादानताम्. ५. सदृश्य प्राधान्याप्राधान्याभ्याम्.

ज्ञातप्रायमित्यर्थः । प्रथमे दृष्टान्तमाह यथेति । अत्रापि सादृश्यात् ज्ञानं विवक्षितम् । द्वितीये 'तत्पूर्वपिण्डेनिवदावृतेन' 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि' त्यनेन दृष्टान्तोपन्यासः । मृदित्येतस्मिन् पदे ज्ञाते सर्वं मृण्मयं मृत्पदापभ्रंशभाषापदानि ज्ञातप्रायाणि । भाषापदानि हि अव्यापकानि । संस्कृतं तु सर्वदेशव्यापकम् । अतः तत्तद्देशे तेन तेनापभ्रंशेन यो यो व्यवहारो भवति तस्य सर्वस्यापि [1]संस्कृतेनैव करणसंभवात् अपभ्रंशो ज्ञातप्राय इत्यर्थः । उक्तार्थमुपपादयति—वाचारम्भणमिति । अपभ्रंश[2]रूपं नामधेयं वाचा आरभ्यते तस्माद नित्यम् । मृत्तिकेति पदं तु नित्यम् । अपभ्रंशस्तु तत्पुरुषवागुपज्ञत्वान्न व्यापकः [3]संस्कृतं तु अपुरुषोपज्ञत्वात् व्यापकमित्यर्थ इति ॥

उपादानशब्दार्थः ॥

अपरे तु—उपादानपदेनानुपादानतामाहुः । मिथ्याभूतस्य जगतो मिथ्याभूता माया उपादानं । सालक्षण्यात् । यथा घटस्य मृत् ब्रह्माधिष्ठानतयोपादानम् । उपादानत्वं च विकाराश्रयत्वं स्वसमानसत्ताकविकाराश्रयत्वं परिणामितयोपादानत्वम् 'असमानसत्ताकविकाराश्रयत्वं विवर्ताधिष्ठानतयोपादानत्वं । कार्यं च कार[4]णाद्भिन्नं कार्यत्वादेव । प्रातर्या मृत् मया दृष्टा सैवेदानीं घटादिरभूदिति प्रत्यभिज्ञया कार्यं कारणादभिन्नं च । अभेदश्चानिर्वचनीयः । तादात्म्यमेव वा सामानाधिकरण्यनिमित्तम् । तच्च भिन्नत्वे सति अभिन्नसत्ताकत्वम् । इदमपृथक्सिद्धमात्रसाधारणम् । अत एव शुक्लो घट इति सामानाधिकरण्यम् । तस्मात् माया ब्रह्मण उपादानमित्याहुः ॥

ते च सद्विद्यामनुरुन्धाना इव स्वोत्प्रेक्षितार्थे कथञ्चित् सद्विद्यां पातयन्ति । आदेशशब्द उपदेश्यपरः। येनाश्रुतमित्यादि ब्रह्मस्वरूपे ज्ञाते प्रपञ्चस्वरूपं ज्ञातमेव । मिथ्यार्थस्याधिष्ठानमेव हि स्वरूपम् । तदतिरिक्तस्वरूपाभावात् । दृष्टान्तेऽपि मृत्पिण्ड मृण्मयादीनामपि ब्रह्मण्यध्यस्ततया मृदादिस्वरूपे ज्ञाते तत्कार्यस्वरूपं ज्ञातमेव । वाचारम्भणमिति वागालम्बनं व्यावहारिकमित्यर्थः। मृत्तिकेत्येव सत्यमिति मृत्तिकास्वरूपेणैव सत्यमित्यर्थः । तद्व्यतिरेकेण [5]सत्ताविरहादिति ॥

१. संस्कृतेनैव संभवात्. २. अपभ्रंशभूतम्. ३. संस्कृतपदं तु. ४. णाभिन्नम्. ५. सत्ताविवरणादिति.

अत्रोच्यते---बहुश्रुतिस्मृतिविरुद्धं ब्रह्मणोऽनुपादानत्वम्। श्रुतय उदाहृताः। स्मृतयः परिकरविजये द्रष्टव्याः। [1]उपादानत्वं च निर्व्यूढम्। यश्च वाक्यार्थ उक्तः सोऽनुपपन्नः। सादृश्यस्य साधारणतया तन्निबन्धनज्ञानहेतुतयाऽपि साधारण्येन ब्रह्मणि विशेषाभावात् 'तमादेशमप्राक्ष्य' इत्यसाधारण्येन ब्रह्मनिर्देशानुपपत्तेः। दृष्टान्तवैयर्थ्याच्च। सदृशज्ञानात् सदृशज्ञाननियमश्चासिद्धः। तत्सदृश इति ज्ञानस्य तादधीन्यमात्रविवक्षाप्यनुपपन्ना। विसदृश इति ज्ञानस्यापि तादधीन्येन सादृश्ये विशेषाभावात् ब्रह्मणोऽत्यन्तविसदृशत्वाच्च। वस्तुत्वादिना सादृश्यस्य सर्वसाधारण्यात् बहुधर्मैः सादृश्यस्य घटादावेव संभवात् ब्रह्मणि तदसंभवात्। किञ्च श्रुतं मतं विज्ञातमिति हि उच्यते। ब्रह्मज्ञाने सति कथञ्चित् तत्सादृश्यादन्यस्य ज्ञाततासंभवेऽपि ब्रह्मणि श्रुतत्वादौ सति न ह्यन्यत्र सादृश्यमात्रात् श्रुतत्वादिसंभवः। [2]श्रुतपदस्य ज्ञातपरत्वे मतादिपदानामपि तथात्वे पौनरुक्त्यम्। प्राधान्यपरत्वेऽपि ज्ञातप्रायत्वविवक्षायामौपचारिकत्वं स्पष्टम्। किञ्च श्रुतपदेन युगपच्छ्रुतत्वश्रुतप्रायत्वरूपमुख्यामुख्यार्थबोधनासंभवात् श्रुतपदावृत्तिस्तन्निबन्धनवाक्यावृत्तिश्च प्रसजेत्। यथा सोम्यैकेनेत्यस्यावृत्तिश्चानुपपन्ना। 'तनूर्वर्षिष्ठे' त्यत्र तु अयाशयारजाशयेत्यनयोः साकाङ्क्षत्वादावृत्तिरुपपन्ना। मृदादिशब्दानामशब्दानुशासनत्वादर्थपरत्वेन शब्दपरत्वमनुपपन्नम्। मृत्पिण्डमृन्मयमृत्तिकाशब्दानां लोहमणिलोहशब्दयोर्नखनिकृन्तनकार्ष्णायसशब्दयोश्च मिथो व्याघातः। व्याकरणाध्ययनसाध्यत्वात् संस्कृतस्य तदेव व्यापकम्। किञ्च वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्यत्र कां गतिं यास्यसि?। तत्र त्वदीय[3]कुसृष्टयभावेन तद्वैरूप्यमिहानुपपन्नम्। यच्च तेनैवोक्तं बहु स्यामिति तत्तत्कार्यानुप्रवेशार्थं विग्रहविशिष्टरूपेण बहुभवनमुच्यत इति। तत्तुच्छं। स्वरूपेण बहुभवनाप्रसिद्धेः कार्यविशिष्टरूपेण बहुभवनस्य वक्तुं शक्यत्वाच्च। 'यस्य पृथिवी शरीरम्' इत्यादिना सर्वेषां विग्रहत्वप्रसिद्धेः कार्यरूपविग्रहविशिष्टरूपेण बहुभवनं सङ्कल्प्यत इति कुतो नेष्यते। किञ्चैवं सति सङ्कल्पसर्गयोः परस्परवार्तानभिज्ञत्वप्रसङ्गः। तथाच नामरूपे व्याकरवाणीति नामरूपे व्याकरोदिति त्रिवृतं करवाणीति त्रिवृतमकरोदिति च सङ्कल्पितप्रकरणविरोधः।

---

१. उपा—निर्व्यूढं, इदं कचिन्न. २. श्रुतशब्दस्य. ३. कुदृष्टयभावेन.

'तत्तेज ऐक्षत' 'बहु स्यां' 'ता आप ऐक्षन्त' 'बह्व्यः स्याम' इति कथं सङ्कल्पकीर्तनम्। ब्रह्मणि लक्षणायां स एव दोषः। एवमुत्तरत्राप्यस्वारस्यं द्रष्टव्यम् ॥

द्वितीयपक्षे उपादानशब्देनानुपादानत्वप्रतिपादनं स्पष्टमेव। अधिष्ठानस्यानुपादानत्वात्। न हि शुक्तिः रजतोपादानं रजतानाश्रयत्वात् रजताभेदेनैव हीदमर्थस्य प्रतीतिः। कार्याश्रयत्वं ह्युपादानत्वं त्वयोक्तम्। यच्च भेदाभेदोपपादनं तत् त्वयैव भेदाभेदवादनिराकरणाद्विरुद्धम्। नच विषमसत्ताकयोरङ्गीकारादविरोधः। इह भेदाभेदयोः विषमसत्ताकत्वासिद्धेः ॥

ननु भेदः पारमार्थिकः अभेदोऽनिर्वचनीयः। न चाद्वैतक्षतिः। [१]भेदो ब्रह्मस्वरूप एवेत्यङ्गीकारात् इति चेन्न। घटस्यापि पटवत् घटभेदप्रसङ्गात्। भेदवादिनापि तथैव वक्तुं शक्यतया भेदखण्डनासंभवाच्च। नच प्रातिभासिकरूपेणाभेदः व्यावहारिकभेदे अन्यरूपेण भेदः, अभेदस्याबाधितप्रत्यभिज्ञासिद्धतया प्रातिभासिकत्वानुपपत्तेः। भेदस्य प्रातिभासिकत्वे कार्यत्वानुपपत्तेः। नच यौक्तिकत्वात् भेदो व्यावहारिकः। अभेदस्य प्रतीतिमात्रसिद्धत्वात् प्रातिभासिक [२]इति वक्तुं शक्यम्, वाचारम्भणश्रुत्यैव कार्यभेदसाधकयुक्तिनिरासात्। यच्च सद्विद्यानिपातनं तत् सद्विद्याकरग्रहविचक्षणे [३]परमपुरुषे सम्प्रति कथमिव भवेत्। तथाहि–उक्त आदेशशब्दार्थः परोक्तार्थानुपपत्तिश्च। येनाश्रुतमिति अधिष्ठानस्य मिथ्यावस्तुस्वरूपत्वं मानाभावादसिद्धम्। नच स्वरूपान्तराभावो मानम्। मिथ्यावस्तुन एव मिथ्यावस्तु स्वरूपत्वात्। यदि तत्तस्य स्वरूपं न भवेत् तर्हि तन्निस्स्वरूपमेव स्यात्। नहि वायोः रूपान्तराभावात् पृथिव्यादिरूपमेव तदीयमित्यङ्गीक्रियते। किन्तु नीरूपमेव। किञ्च [४]मिथ्यात्वादेव यथा मिथ्यार्थस्वरूपं न स्यात् तथा मिथ्यात्वादेव स्वरूपसापेक्षोऽपि न स्यात्। अश्रुतामताविज्ञातपदानां स्वरूपेण लक्षणा च स्यात्। अश्रुतादिपदार्थात [५]प्रपञ्चरूपात् ब्रह्मणोऽन्यत्वे सति अनृतजडपरिच्छिन्नव्यावृत्तं हि आवर्तयसि' यथा सोम्येति' पिण्डघटयोः कथमेकसत्ताकत्वं, भिन्नकार्यत्वात्। 'किञ्च कथं नु भगवःस आदेश' इति पृष्टवन्तं प्रति ह्ययं दृष्टान्त उच्यते। दृष्टान्तश्च पूर्वं [६]विज्ञातः। अद्वै-

१. भेदो ब्रह्मस्वरूपमित्यङ्गीकारात्. २. इति युक्तं वक्तुम्. ३. पुरुषोत्तमे. ४. मिथ्या–तथा–इदं क्वचिन्न. ५. प्रपञ्चात्. ६. निर्ज्ञातः.

तोपदेशार्थश्चायमारम्भ इति तव मतम्। एवं च प्रपञ्चमिथ्यात्वस्य प्रागनवगमात् दृष्टान्ते मृत्पिण्डघटयोः [1]ब्रह्मैव स्वरूपमित्यनवगमात् कथं दृष्टान्तः। दृष्टान्तस्यापरिज्ञानादेव वाचारम्भणमिति तदुपपादनं इति चेत्। प्रपञ्चमिथ्यात्वज्ञानात् प्राक् त्वदुक्ततद्वाक्यार्थस्याप्यपरिज्ञानात्। किञ्च मृत्पिण्डमृण्मयलोहमणिलोहमयनखनिकृन्तनकार्ष्णायसपदानां लक्षणा च स्यात्। तथा मृत्तिकादिपदत्रयस्यापि ब्रह्मण एव सर्वेषां स्वरूपत्वात् यस्य कस्यापि स्वरूपे ज्ञानेऽपि सर्वेषां स्वरूपं ज्ञातमेवेति विशिष्य [2]प्रतिबन्धुक्तिर्निर्निबन्धना। कारणस्वरूपमेव कार्यस्वरूपमिति चेत्। विशेषणत्वे मृत्पिण्डस्यापि घटस्वरूपत्वप्रसङ्गः। उपलक्षणत्वे पूर्वोक्तदोषस्तदवस्थः। किञ्च ब्रह्मज्ञानेन सर्वस्य स्वरूपज्ञाने प्रतिपादिते ब्रह्मणोऽधिष्ठानत्वे तत्र प्रपञ्चस्याध्यस्तत्वे च सत्येव ब्रह्मज्ञानेन [3]प्रपञ्चस्वरूपस्य ज्ञातता सेत्स्यतीति बुद्ध्या श्वेतकेतुः प्रपञ्चमिथ्यात्वं ज्ञास्यतीति मत्वा खलु एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। तत्र कथमस्य दृष्टान्तस्यानुगुण्यम्। यथा सोम्यैकया रज्ज्वा सर्वं सर्पभूदलनाम्बुधारादि विज्ञातं स्यादित्युक्तिर्हि तदनुगुणा। किञ्च मिथ्यात्वे प्रतिपिपादयिषिते वाचारम्भणमित्येवालम्। मृत्तिकेत्येव सत्यमिति एवं वाक्यत्रयं व्यर्थम्। मृत्तिकापदस्य मृत्तिकामात्रपरत्वे एवकारेण घटव्यावृत्तिरनुपपन्ना। मृद्घटयोः सत्त्वे विशेषाभावात्। स्वरूपपरत्वेऽपि तथैव। मृत्तिकापदं स्वरूपपरं व्यावर्त्यं, मृन्मयमात्रम् इत्युक्तौ न मृत्तिकाग्रहणे निमित्तं पश्यामः। यदि तत्कार्यसत्त्वप्रतीतिगमनिकोच्यते इति न वैयर्थ्यं। तर्हि विकारस्वरूपमेव सत्यमित्येव वाच्यम्। कारणस्य सत्यत्वं कार्यस्य मिथ्यात्वं च खलु प्रतिज्ञाभिप्रेते। तथैव दृष्टान्तेऽपि विवक्षितमिति दृष्टान्तानुगुण्यमिति चेन्न। तथा सति मृत्तिका सत्या न घट इत्यनुपपत्तेः। उभयोर्मिथ्यात्वस्य व्यावहारिकसत्यत्वस्य चाविशेषात्। इतिपदं च व्यर्थम्। मृत्तिका सत्येति हि वाच्यम्॥

व्यावहारिकत्वस्वरूपकथनम्॥

वाचारम्भणपदेन [4]व्यावहारिकत्वलाभश्चातिक्लिष्टः। कटकादिकार्यक्षमत्वं हि व्यावहारिकत्वं न तु वाग्विषयत्वं। [5]प्रातिभासिकेऽपि सत्त्वात्। यदि व्याव-

१. दृष्टान्ते मृत्पिण्डघटयोः ब्रह्मणैव रूपम्. २. प्रतिबन्धुक्ति. ३. प्रपञ्चस्वरूपं च.
४. व्यावहारिकलाभश्च. ५. प्रातिभासिकस्यापि.

हारिकपदं रूढं तदा सुतरां तदर्थस्य वाचारम्भणशब्देनोपस्थापनासंभवः। नामधेयग्रहणं च व्यर्थम्। सिद्धान्ते तु नामभेदात् कार्यद्रव्यभेदशङ्कानिरासः प्रयोजनम्। यच्चेदमुच्यते —ब्रह्मणि ज्ञाते [1]सर्वमिदं कार्यं मिथ्यात्वेन ज्ञातं भवतीति [2]तदपि मन्दम्। घटादिज्ञानानामपि ब्रह्मविषयतया तेषु सत्स्वपि मिथ्यात्वज्ञानासिद्धेः। ब्रह्मणोऽद्वितीयत्वज्ञानविवक्षायां मिथ्यात्वज्ञानपर्यवसानादात्माश्रयः। कस्मिन् खलु विज्ञाते इदं सर्वं [3]विज्ञातं भवतीति वाक्ये प्रपञ्चस्य ब्रह्मज्ञानविषय[4]तया स्वरसतः प्रतीतेः। तज्ज्ञानबाध्यत्वोक्तिरनुपपन्ना दृष्टान्तानुपपत्तिश्च स्पष्टा ॥

सदेव सोम्येति वाक्यानां परमते अस्वारस्यप्रदर्शनम् ॥

सदेव सोम्येदमग्र आसीदिति प्रपञ्चमिथ्यात्वमुच्यत इत्यप्यनुपपन्नम्। अग्रे इदं सदासीदिति तदानीं सत्त्वेनावगतस्य पूर्वकालेऽपि सत्त्वप्रतीत्या सर्वकालसत्त्वस्यैव प्रपञ्चस्य प्रतिपादनात्। सत्पदेन ब्रह्मोपस्थापनेऽपि कथं तदभेदोक्तिः। अध्यासकाल एव तदभेदात्। यद्यधिष्ठानाध्यस्यमानभावेन तादात्म्यात् सा, तदा अग्र इत्यनुपपन्नम्। इदानीमप्यधिष्ठानाध्यस्यमानभावात्। वस्तुतः इदानीमेवाधिष्ठा[5]नाभेदः अध्यासकाल एव तदभेदात्। तत्त्वावेदकवाक्यस्य भ्रमोत्पादकत्वं चानुपपन्नम्। अग्रे नासीदित्यर्थाङ्गीकारे लक्षणा, मिथ्यात्वासिद्धिश्च—न हि कालविशेषासत्त्वमात्रेण मिथ्यात्वसिद्धिः ॥

नच सजातीयविजातीयस्वगतभेदशून्यवस्तुप्रतिपादनान्मिथ्यात्वसिद्धिः। किं सदनुवादेन सजातीयादिभेदशून्यत्वं विधीयते? किं वा सजातीयादिभेदशून्यवस्त्वनुवादेन प्रपञ्चाभेदः?। नाद्यः तदा खलु 'सदेवाग्र एकमेवाद्वितीयमासीत् [6]नान्यदग्रे एकमेवाद्वितीयमासीदित्यर्थः स्यात्। तत्र इदं पदानन्वयस्स्पष्टः। सदेवेत्येवकारस्य विधीयमानार्थस्य तत्कालेऽन्यत्र व्यवच्छेदपरतया तस्य [7]त्वदभिलषितार्थपरत्वभङ्गः। न द्वितीयः। प्रपञ्चस्य विद्यमानतादशायामेवाधिष्ठानतादात्म्यं न पूर्वमित्युक्तत्वात् ॥

---

१. सर्वमिदं मिथ्यात्वेन. २. तदपि न. ३. विदितम्. ४. तायाः. ५. नभेदः. ६. नान्यदग्रे इति वाक्यं क्वचिन्न. ७. तत्पदलक्षितार्थ.

एकशब्दार्थः ॥

तस्मात् प्रलयकाले प्रपञ्चजातमेकमेवाद्वितीयं सदासीदित्यन्वयः। एवं एकमेव बहुस्यामिति वक्ष्यमाणबहुत्वावस्थाशून्यमेव [1]अद्वितीयं कर्त्रन्तरनिरपेक्षं सदासीदित्यर्थः। बहु स्यामित्यनुसारादेकशब्दार्थनिर्णयः। [2]उपादानत्वबोधनेन कर्त्रन्तरस्य घटादिवदाकाङ्क्षितत्वात्। अद्वितीयो देवदत्त आस्त इति सजातीयपुरुषान्तरनिषेधवत् सत्सदस्यादेशपदार्थोपस्थापकतया कर्तृपरत्वेनाद्वितीयशब्दस्य [3]कर्त्रन्तरनिषेधपरत्वादाकाङ्क्षासत्पदाभ्यामद्वितीयपदस्यार्थनिर्णयः। 'तद्धैक आहु'रित्यस्य परोक्तार्थपरत्वं प्रागेव [4]दूषितम्। मिथ्यावादिनिराकरणपरत्वं च प्रागेवोक्तम्। बहु स्यामित्यनुपपन्नम्। [5]न तावन्निर्विशेषस्यायं सङ्कल्पः एक[6]तत्त्वावेदनादीश्वरस्य भ्रमाभावेन प्रपञ्चे बहुस्यामिति स्वाभेदभ्रमासंभवात्। तेजसोऽपाञ्च ईक्षणकर्तृत्वप्रतिपादनं चानुपपन्नम्। किञ्चैवं मिथ्यात्वतात्पर्ये कर्तृत्वोपवर्णनं व्यर्थम्। अतः कर्तृत्वोपादानत्वयोः प्रतिपादन एव तात्पर्यम्। तत्रैव कृत्स्नानुगुण्यं प्रागेवोपपादितम्॥

एवं प्रथमखण्डे आदेशपिण्डमणिपदत्रयम्, अश्रुतादिपदत्रयम्, मृत्पिण्डादिपदत्रयं, मृन्मयादिपदत्रयं, वाचारम्भणपदत्रयं, नामधेयपदत्रयं, मृत्तिकादिपदत्रयमिति, चतुर्विंशतिपदान्यस्वरसानि[7]। [8]अज्ञातत्वाद्वैरूप्याच्च दृष्टान्तवाक्यत्रयमस्वरसम्, न हि पराभिलषितार्थानुगुणो दृष्टान्त इत्युक्तमेव॥

द्वितीयखण्डे—सदिदमग्र आसीत्, सज्जायते, सत्त्वेव इदमग्र आसीत्, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत, तत्तेज ऐक्षत, बहु स्यां प्रजायेयेति, तदसृजत, ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति, ता असृजन्तेत्यादिपदान्यस्वरसानि॥

तृतीयखण्डेऽपि अनुप्रविश्य नामरूपे व्याकरवाणि, अनुप्रविश्य नामरूपे व्याकरोदिति ब्रह्मणः सङ्कल्पकर्तृत्वे अनुपपन्ने इति प्रागेवोक्तम्। ईश्वरस्य तु जीवाद्भिन्नत्वात् सन्धानकर्तृत्वानुपपत्तिः॥

---

१. एकस्मिन् कोशेऽधिकः. २. उपादानत्वाबोधनेन. ३. अर्थान्तरनिषेध. ४. निरस्तम्. ५. न तावन्निर्विकल्पस्यायम्. ६. तत्वादेव। नापीश्वरस्य, तस्य भ्रमाभावेन. ७. अत्र चतुर्विंशतिसंख्यापूर्तये पदत्रयमेकमपेक्षितम्. ८. अनिर्ज्ञातत्वात्.

चतुर्थखण्डेऽपि[1] अपागादग्नेरग्नित्वमित्यादेर्मिथ्यार्थपरत्वे अग्नेरग्नित्वमपागादिति अग्निमङ्गीकृत्य तत्र धर्मनिषेधोऽनुपपन्नः। त्रीण्येव रूपाणीत्येव सत्यमित्यपि न मिथ्यात्व[2]साधकमनुपपन्नं च। त्रीणि रूपाणीत्येव सत्यमित्यत्र त्रिरूप्यधिष्ठानसद्विवक्षायां तल्लक्षणैव दोषः। कार्याधिष्ठानस्य सतोऽपि सत्यत्वाद्विशेषोक्त्यसम्भवश्च। न्यग्रोधफलमित्यादि—द्वादशे खण्डे श्रद्धत्स्व सोम्येत्युच्यते। अत एतदर्थ एव प्रकरणे प्रतिपाद्यत इत्यवगम्यते॥

नच अत्र अधिष्ठानत्वं प्रतिपाद्यते, किन्तु परिणामित्वम्। अणिम्नो महान्न्यग्रोधस्तिष्ठतीति अभिधानात्। न्यग्रोधफलेऽपि वृक्षो न दृश्यते, नापि तदन्तर्गतासु अण्वीषु धानासु। तस्मादण्व्या धानाया एवायं परिणामो वृक्ष इति परिणामोपपादने हि तात्पर्यं गम्यते। यदि सूक्ष्मे स्थूलाध्यासोपपादने तात्पर्यं स्यात् तदा हि [3]काचाद्यधिष्ठानलिपिस्थूलाध्यासादिरुदाहर्तव्यः। तस्मात् पूर्वोक्तस्वारसिकवाक्यार्थानुरोधात् कर्तुर्विशिष्टोपादानत्वपरा सद्विद्या॥

असद्वा इत्यादेः परोक्तार्थनिरासः॥

'असद्वा इदमग्र आसीत्' इत्यत्र असदिति कार्यस्वरूपासत्त्वमेवोच्यते। 'आत्मानमकुरुत' इति विग्रह[4]विशिष्ट रूपेण सृष्टिरुच्यत इति कस्यचित् व्याख्यानमनुपपन्नम्। तदित्यसतः परामर्शात् कर्तृत्वानुपपत्तेः। 'आत्मन आकाशस्सम्भूत' इति प्रकृत आत्मा परामृश्यत इति चेत्—न। तदिति नपुंसकानुपपत्तेः। 'सच्च त्यच्चाभव'दिति सत्त्वादिगुणाभिव्यक्तिपरमित्यनुपपन्नम्। ब्रह्मणः सत्त्वादिगुणासिद्धेः। सदिति स्वरूपविकारशून्यो जीव उच्यते। त्यदिति स्वरूपविकारवदचेतनमुच्यते। सृष्टिकथनात् सत्त्यद्भावस्य अनुप्रवेशाधीनत्वकथनाच्च विवर्ततात्पर्याभावोऽवगम्यते। सृष्ट्यनुप्रवेशसत्त्यद्भावानां समानकर्तृकत्वमात्रं विवक्षितम्। एवं च निर्विकारत्वश्रुतेरुपादानत्वश्रुतेश्च सद्वारकमुपादानत्वं सिध्यति। कर्मणोऽपूर्वद्वारा स्वर्गसाधनत्ववत्॥

उपादाननिरूपण खण्डनम्॥

यदाह नवीनः—अवस्थान्तरयोगित्वं [5]नोपादानत्वम्। तद्विविकारवत् कारणत्वं, परिणामित्वं वा—नाद्यः—यत्किञ्चिद्विकारसमवायित्वस्य निमित्तसाधा-

१. यदग्नेरित्यादेः. २. तन्निषेधोऽनुपपन्नः. ३. काचाद्यधीनलिपि. ४. विशिष्टवेषेण. ५. नोपादानत्वम्, तन्निर्विकारवत्कारणत्वम्.

रणत्वात् तद्विकारसमवायित्वस्यानिमित्तसाधारणत्वात् तद्विकारसमवायित्वस्याप्येकसमवायवादे तत्र सत्त्वात्। तन्नानात्वेऽपि अनित्यमृद्घटादेर्नित्यसंबन्धासम्भवः। संबन्धस्य सम्बन्ध्याश्रयत्वनियमात्। अनित्यत्वे च भावकार्यस्य सोपादानत्वनियमात्। तदुपादाने तत्समवायित्वसत्त्वे[१]ऽनवस्था उपादानलक्षणाव्याप्तिः ॥

न द्वितीयः—तद्धि न तात्त्विकरूपान्तराभेदः—अभेदेरूपान्तरत्वस्य परमते व्याघातात्, तस्मात् परमते नोपादानत्वलक्षणं सम्भवति। अस्मन्मते तु यदभिन्नं कार्यमुत्पद्यते तत्कारणमुपादानम्। अभेदश्च, मृद्घट इति सामानाधिकरण्यानुभवसिद्धः। अयं घट इत्यत्र स्वप्रकारीभूतधर्मद्वयविशिष्टाभेदविषयत्वस्य क्लृप्तत्वात्। स चाभेदः प्रकृते तादात्म्यम्। तच्च भिन्नत्वे सत्यभिन्नसत्ताकत्वम्। अस्ति हि मृद्घटयोरेतत्तादात्म्यम्। भेदाभावे कार्यकारणभावायोगात्। उपादानोपादेययोः[२]सत्ताभेदायोगाच्च। दण्डघटयोस्तु नैवम्। भेदे भासमानेऽपि दण्डाधिष्ठानात्तदुपहितात् तत्सत्त्वात् घटसत्ताया अन्यत्वात्। अन्यत्वं च दण्डाद्यभावेऽपि सन् घट इत्यनुभवात् दण्डो घट इत्यननुभवाच्च सिद्धम्। [३]अयुतसिद्धसामानाधिकरण्यानुभवमात्रे इदमेव तादात्म्यं विषयः। [४]नन्वेवमेकाश्रितरूपरसादीनां घटसत्ता, एकैव सत्तेति रूपरसादेरन्योन्यं सामानाधिकरण्यानुभवप्रसङ्ग इति चेन्न—रूपाद्यवच्छिन्नघटसत्तायाः रसादिसत्तात्मकत्वाभावात् ॥

ननु मृद्घटयोर्भेदे कथमेकसत्ताकत्वं, दण्डघटयोरदर्शनादिति चेत्—न। दण्डघटभेदवन्मृद्घटभेदस्य सत्ताभेदावच्छेदकत्वाभावात्। रूपरसयोरप्यन्योन्यं [५]भेदस्सत्तावच्छेदकः, न तु तयोराश्रयाद्भेदः। अथवा कश्चिदनिर्वचनीयो धर्मः तादात्म्यम्। अतो [६]यदभिन्नं कार्यमुत्पद्यते तत्कारणमुपादानम्। एवं च जगद्विवर्ताधिष्ठानं ब्रह्माप्युपादानम्। विवर्तस्य अधिष्ठानाभिन्नत्वात् ब्रह्मणः कारणत्वाच्च।

---

१. न तदवस्था, असत्वे. २. सत्ताभेदाभावाच्च. ३. अयं तु सामानधिकरण्यमात्रे. ४. नन्वेवम्. ५. भेद सत्ताभेदकत्वम्. ६. यदवच्छिन्नम्.

अभेदश्च सन् घट इति प्रतीतिसिद्धः। सद्रूपाधिष्ठानतादात्म्यविषयत्वात्तस्याः। नहि सदिति घटस्वरूपमेव [1]प्रतीयते, तस्य पटादावननुगतत्वात्। नापि सत्ताजातिवैशिष्ट्यम्। अतिरिक्तसत्ताकल्पने गौरवात्। प्रतीतेरधिष्ठानतायां सत्तादात्म्यविषयत्वेनाप्युपपत्तेः। सामान्यादौ [2]सद्बुद्ध्ययोगाच्च। नच बाधायोग्यत्वं सत्त्वं सामान्याद्यनुगतमितिवाच्यम्। तस्या एव सत्तायाः लाघवानुगृहीतानुभवेन नह्यस्ति द्वैतसिद्धिः। आत्मैव सिद्धोऽद्वितीय इत्यादि श्रुत्या च आत्ममात्रतया सिद्धत्वात्। अन्यथासिद्धानुभवेन श्रुत्यर्थान्यथाकरणायोगात्। नापि प्रमाणयोग्यत्वम्। अबाधितानुभवस्य प्रमाणत्वे बाधायोग्यत्वपर्यवसानात्। यथार्थानुभवत्वे मिथ्यारजतादिसाधारण्यात्। तस्मात् कार्यभिन्नं ब्रह्म कारणं चेत्युपादानं भेदश्चाधिष्ठानतयेति ब्रह्मविवर्तभूतं जगदिति॥

अत्रोच्यते—समवायानङ्गीकारात् आश्रयाश्रयिभावाङ्गीकाराच्च अवस्थान्तरयोगित्वमित्यत्र न कश्चि[3]द्दोषः। [4]एवं परिणामित्वमपीति तदपि [5]सुस्थम्। रूपान्तरवदभेदो वा परिणामित्वं। रूपान्तरं च कार्यावस्था। समवायाङ्गीकारेऽपि स्वसमवेतकार्याश्रयत्वमुपादानत्वमिति विवक्षितत्वात् न कश्चिद्दोषः। भूतलादिः घटोपादानं मा भूदिति समवेतपदं तात्त्विकरूपान्तराभेदः परिणामित्वमित्यसङ्गतम्। रूपान्तरस्य तात्त्विकत्वे अद्वैतहानेः। स्वसमानसत्ताकत्वविवक्षायां यदभिन्नं कार्यमुत्पद्यते इत्यत्र वक्ष्यमाण दोषोऽनुसन्धेयः। [6]सिद्धान्ते त्वेतदपि पूर्वत्रैव पर्यवसितम्। यदभिन्नं कार्यमुत्पद्यते तत्कारणमुपादानत्वमित्यत्रापि न दोषः। उपादानस्यैव सद्वारकोत्पत्तेः। स्वपक्षे तु एतदयुक्तम्—कार्यकारणयोर्भेदाङ्गीकारात्॥

ननु भिन्नत्वे सत्यभिन्नसत्ताकत्वलक्षणाभेदोऽस्ती[7]त्युक्तम्। सत्यमुक्तं—दुरुक्तं तु तत्। तस्य मृद्घट इति सामानाधिकरण्यानुभवसिद्धत्वाभावात्। अयं घटः अयं कम्बुग्रीव इति सामनाधिकरण्यानुभपविषयस्यैव एतत्सामाधिकरण्यानुभव विषयत्वात्। त्वयैवाभेदस्य मृद्घट इत्यत्र सामानाधिकरण्यानुभवविषयत्वे अयं

---

१. पृच्छ्यते. २. सतिसत्य. ३. द्विशेषः. ४. एतदेवम्. ५. तदविरुद्धम्.
६. सिद्धान्ते त्विदमपि. ७. त्युक्तमितिचेन्न.

घट इत्यत्र, स्वप्रकारीभूतधर्मद्वयविशिष्टाभेदविषयत्वस्य क्लृप्तत्वादिति हेत्वभिधानात् अभेदबुद्ध्या तादात्म्यबुद्धिसाधनात् हेतुसाध्ययोरसाङ्गत्यं च स्पष्टम् ॥

नच तादात्म्यमेव सर्वत्र सामाधिकरण्यबुद्धिगोचरः । सोऽयं देवदत्तः—तत्त्वमसि, इत्याद्यनुपपत्तेः । किञ्च—तादात्म्यस्य सामानाधिकरण्यप्रतीतिगोचरत्वे मृद्घटौ भिन्नौ अभिन्नसत्ताकौ चेति प्रयोगस्स्यात् । [१]संसर्गमर्यादया भानाङ्गीकारात् । यदि न तथा प्रयोगः तदा मृद्घटावभिन्नाविति प्रयोगो न स्यात् । किञ्च—तादात्म्यं हि तत्स्वरूपत्वम् । तच्च तत्स्वरूपाभिन्नत्वम् । इदं [२]कथमभेदसत्ताभेदघटितस्वरूपं स्यात् । यदि तादात्म्यशब्दो रूढ इत्युच्येत, एवमपि मृदात्मको घट इति प्रयोगो न स्यात् । मृत्स्वरूपं यस्येति हि तदर्थः । किञ्च कार्यकारणयोः भेदे सङ्घीभवन्ति ब्राह्मणाः इत्यत्रेव तन्तवः पटीभवन्तीति 'तस्मात् कर्तरि च्विः' न स्यात् । जायमानात् पटाद्भिन्नतया सम्पद्य कर्तृत्वाभावात् अवयविभङ्गे त्वदुक्त गुरुत्वाधिक्यप्रसङ्गश्चावर्जनीयः । अपिच—असत उत्पत्त्यसम्भवात् । घटस्य सूक्ष्मरूपेणावस्थानं त्वयैवोच्यते, तत्र [३]अजातस्य सूक्ष्मरूपस्य जातस्य घटस्य च अभेदः [४]कथमुपपद्यते ॥

नचात्र भेद एव । असत उत्पत्तिप्रसङ्गात् , सूक्ष्मरूपकल्पनावैयर्थ्याच्च । तथाच द्रव्यस्य पिण्डरूपेण प्रागवस्थानं, पश्चात् घटरूपेणोत्पत्तिरित्येव युक्तमुचितम् । किञ्च मृत्पिण्डो घट आसीदिति प्रतीतिर्न स्यात् । पुनरावृत्तिः सुवर्णपिण्डः खादिराङ्गारसवर्णे कुण्डले भवतः इति च भाष्यम् ॥

पिण्डरूपं कारणं घटरूपकार्यात् भिन्नमेवेति हि तव मतम् । नच तत्र [५]तादात्म्यसंभवः । तत्राभिन्नसत्ताकत्वासिद्धेः । सा च [६]पिण्डभावेऽपि घट इत्यनुभवात , घटाभावेऽपि पिण्ड इत्यनुभवाच्च सिद्धा । किञ्च, कार्यत्वाद्भेदः कथं साध्यते, पूर्वकाले अविद्यमानस्य कार्यस्य पूर्वकालीनेन अभेदायोगात् , इतिचेत् । कथं तर्हि घटस्यैव सूक्ष्मरूपेणावस्थानम् । स्थूलरूपविशिष्ट[७]वेषेण कार्यत्वोक्तौ मृद एव घटत्वविशिष्टवेषेण कार्यत्वसम्भवे किमजागलस्तनेन सूक्ष्मरूपेण ॥

---

१. अर्कसंसर्ग क. २. कथं भेदसत्ता. ३. आज्ञातस्य. ४. कथमुत्पद्यते, कथमुपपद्यते. ५. तादात्म्यभावः. ६. पिण्डावस्थाभावे. ७. विशेषण.

अपि च भिन्नत्वे सति अभिन्नसत्ताकत्वं सामनाधिकरण्यप्रयोजकमिति कुत्र दृष्टम्। इदं रजतमिति मिथ्यारजतवाक्य इति चेन्न, तत्राभेदस्यैव प्रतीतेः। नच अयुतसिद्धसामानाधिकरण्यार्थम्। अयुतसिद्धेरेव तन्निबन्धनत्वकल्पनस्योचितत्वात्। शुक्लो घट इत्यत्र शुक्लपदस्य द्रव्यपर्यन्ततया तत्राप्यभेदस्यैव प्रतीतेः। किञ्च सर्वेषां ब्रह्मण्यध्यस्ततया सर्वसामानाधिकरण्यप्रसङ्गः॥

ननु सर्वे पदार्थास्सत्ताभेदकाः घटरूपयोस्तु न मिथः सत्ताभेदकत्वमितिचेत्—न—एवं विभागे मानाभावात्। नच सामा[१]नाधिकरण्यतदभावप्रतीतिभ्यामेव तत्सिद्धिः। शुक्लो घट इति प्रतीतेरितिवाच्यं, रूपी घट इति प्रतीत्या शुक्ल इति प्रतीतेपि द्रव्यपर्यन्तत्वसिद्धेः। किञ्च, घटतद्रूपयोः मिथस्सत्ताभेदकत्वे घटतत्प्रमातृ चैतन्ययोरभेदो न स्यात्। तदभावे च घटो ज्ञानमिति सामाधिकरण्यप्रसङ्गः। किञ्च, कोऽयमभिन्नसत्ताकत्वमित्यत्र सत्तासम्बन्धः। न तावत्तादात्म्यमेव, आत्माश्रयात्। सन् घट इति सामानाधिकरण्यानुपपत्तेश्च। न हि सत्तया सत्ताया भेदघटित तादात्म्यसम्भवः। अत एवाधिष्ठानाध्यस्तभावस्सम्बन्ध इति निरस्तम्॥

अनिर्वचनीयः कश्चिद्धर्मस्तादात्म्यमित्यपि न। तस्याभेदादन्यत्वे सामानाधिकरण्यनिमित्तत्वाभावात्। अनन्यत्वे त्वया भेदाङ्गीकारेण तस्मिन् सति तदयोगात्। उभयोस्तुल्यसत्ताकत्वात्॥

ननु भेदो व्यावहारिकः। यौक्तिकत्वादभेदः प्रातिभासिकः इतिचेत् न। यथा सोम्येति श्रुतिविरोधात्। न हि प्रातिभासिकाभेदमात्रेण अन्यज्ञानेनान्यस्य ज्ञातता सम्भवति। न ह्यस्ति द्वैतसिद्धिरित्याद्यर्थश्च अद्वैतविद्याविजये द्रष्टव्यः। विशिष्टोपादानत्वं समर्थयन्त्या सद्विद्यया भावरूपाज्ञानं, असत्यात् सत्योत्पत्तिः अवयव्यन्तरं [२]विवर्त इत्येतानि निरस्तानि॥

विशिष्टोपादनत्वमुपपाद्य कृत्नेन तत्त्वमसीत्युपसंहारेण उपादानत्वनिबन्धन सामानाधिकरण्येन जीवब्रह्माभेदानवगमात् तदुपपादकतया भेदमिथ्यात्वाकलनात् न मिथ्यावस्तुसिद्ध्यर्थं अज्ञानं कल्पनीयमित्यवगम्यते। तथा विशिष्टोपादानत्व-

---

१. नाधिकरण्यप्रतीति तदभावाविवर. २. न विवर्तते.

समर्थनादेव प्रपञ्चनिषेधकश्रुतीनामपि स्वातन्त्र्यनिषेधे तात्पर्यविगमात् न तन्मुखे नापि अविद्याकल्पनमित्यवगम्यते ॥

भावरूपाज्ञानवादः ॥

आह—प्रत्यक्षानुमानार्थापत्तिश्रुतिभिर्भाव[१]रूपाज्ञानमेष्टव्यम्। प्रत्यक्षं तावत् 'अहमज्ञो मामन्यं च न जानामि' [२]'त्वदुक्तमर्थं न जानामि' 'शास्त्रार्थं न जानामि' इत्यादि। आसां च प्रतीतीनां ज्ञानाभावविषयत्वं कारणीभूतधर्मिप्रतियोगिज्ञानाभ्यां व्याहन्यते। तदभावे च तदसम्भवः स्पष्टः। सुप्तोत्थितस्य एतावन्तं कालं न किञ्चिदहमवेदिषमिति परामर्शो दृश्यते। स च साक्षिणा सुषुप्तिकाले भावरूपाज्ञानं विना नोपपद्यत इति सौषुप्तिकानुभवबलादपि भावरूपाज्ञानसिद्धिः। अनुमानमपि विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावातिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति, कार्यान्यथानुपपत्तिरपि मानम्। मिथ्याभूतस्य कार्यस्य मिथ्योपादानं विना अनुपपत्तेः। श्रुतिश्च—'अनृतेन हि प्रत्यूढाः' इत्यादिरिति—

अत्रोच्यते—अहमज्ञ इति कृत्स्नाज्ञानप्रतीतिस्तावदसिद्धा। कृत्स्नाविषयत्वेन वा, कृत्स्नज्ञानविरोधित्वेन वा भावरूपाज्ञानस्येऽपि ग्रहणासम्भवात्। न ह्यन्तःकरणतद्धर्मादेः अतीतादेश्च अज्ञानविषयत्वं त्वया अङ्गीक्रियते साक्षिरूपज्ञानविरोधित्वं वा? परोक्षज्ञानविरोधित्वं वा। किञ्च, इयं प्रतीतिः किं सर्वकालीना? उत किञ्चित्कालीना। नाद्यः, असिद्धेः। घटादिग्रहदशायां तदसम्भवात्। द्वितीये [३]'किं राजवृत्तान्तं न जानासि' इति प्रश्नस्थलादौ 'अहं न जानामि' इत्युत्तरानुरोधेन योऽज्ञानानुभवः कल्प्यते स एव विवक्षितः उतान्यः? नान्त्यः। सर्वकालीनत्वापर्यवसानेन उक्तोत्तरत्वात्। यदा प्रश्नो नास्ति, नापि घटादिज्ञानं तद्दशायां तादृशज्ञानं सम्भवतीति चेन्न। अहमर्थस्य सर्वदा भासमानतया तादृश[४]ज्ञानयोग्यकालासिद्धेः। यद्यपि भावरूपाज्ञानस्य प्रमाणज्ञानेनैव विरोधः। नाहमर्थानुभवरूप साक्षिणा। तथापि त्वयैव घटापरोक्षज्ञानाभावेऽपि तत्परोक्षज्ञाने सति तेनैव प्रतिबन्धात्

---

१. रूपमज्ञानमेष्टव्यम्. २. त्वदुक्तं न जानामि त्वदुक्तमर्थं नजानामि (ख).
३. रामवृत्तान्त. ४. मानयोग्य (क).

नाज्ञानानुभव इत्युक्तत्वात् परोक्षज्ञानस्य अज्ञानेनाविरोधेऽपि सामान्यावगाहनस्यैव प्रतिबन्धप्रयोजकत्वादिहाप्यहमर्थे भासमाने न जानामीत्यनुभवोऽनुपपन्नः। एवं च प्रतियोगिविषयज्ञानाज्ञानाभ्यां ज्ञानाभावपक्षे यद्दूषणमुक्तं तत् भावरूपाज्ञानपक्षेऽपि समानमापद्यते। साक्षिणि प्रतियोगितद्विषयज्ञाने सत्यपि प्रदर्शितरीत्या ज्ञानानुभवसम्भवात्। प्रतियोगिविषयज्ञानाभावे च अज्ञानानुभवासम्भवः स्फुट एव। भावरूपत्वेऽपि अज्ञानत्वेन अनुभवदशायां प्रतियोगितद्विषयज्ञानसापेक्षत्वमवर्जनीयमेव। एतेनैव प्रत्यक्षस्यैव अज्ञानविरोधित्वेऽपि प्रत्यक्षमेव च ज्ञानसामान्यात्मना भासत इति निरस्तम्॥

किञ्च, परोक्षस्य वा अपरोक्षस्य वा यत्किञ्चिज्ज्ञानस्य सर्वदाऽऽवश्यकत्वात् सुषुप्तेरन्यत्र नाज्ञानानुभवसम्भवः। सौषुप्तिकाज्ञानानुभवस्तु निरसिष्यते। आद्यस्तु राजवृत्तान्तज्ञानाभावविषयः। राजवृत्तान्तं विशिष्य न जानामीत्यर्थः। एतेन 'शास्त्रार्थं न जानामि, त्वदुक्तमर्थं न जानामीत्यादिकमपि विशेषज्ञानाभावविषयतया व्याख्यातम्। यद्यपि राजवृत्तान्ततया शास्त्रार्थतया त्वदुक्तार्थतया ज्ञानमस्त्येवेति सामान्येन निषेधासम्भवः। तथापि विशिष्य ज्ञानाभावाद्विशेषज्ञानाभावो गृहीतुं शक्यत एव॥

ननु विशेषाणां ज्ञानाभावे कथं तद्गोचरज्ञानाभावग्रहः। विशेषग्रहणाभावे तद्गोचरज्ञाना[१]ग्रहणेन तदभावग्रहासम्भवात्। सति च विशेषज्ञाने तदभावासिद्धेः कथं तद्ग्रहः। किञ्च—विशिष्य न जानामीति विशिष्यापि ज्ञानमस्त्येव। अन्यथा विशिष्य न जानामीति ज्ञानायोगादिति चेन्न॥

[२]अविशिष्य विशेषप्रकारकज्ञानाभावस्य [३]ग्राह्यत्वात्। एतज्ज्ञाने च विशेषत्वप्रकारेण विशेषोपस्थितिरेवान्वयव्यतिरेकाभ्यां हेतुः। सा च विशेष्यभूतविशेषप्रकारिकैव। विशेषत्वं प्रति विशेषस्य विशेष्यत्वात्, अत एव हि शास्त्राध्ययनेन विशेष्यभूतविशेषप्रकारकज्ञानोदयेऽसति शास्त्रार्थं न जानामीति ज्ञानाभावोपपत्तिः। यदि भावरूपाज्ञानमस्य ज्ञानस्य विषयः तदा तस्य सत्त्वात् कथं तज्ज्ञाना

---

१. ग्रहेण. २. अविशेष्य विशेष. ३. ग्राहकत्वात्.

भावः। परोक्षज्ञानेन अज्ञानग्रहः प्रतिबध्यते। सौरप्रभयेव चन्द्रप्रभाग्रह इति चेन्न। तथा सति प्रागपि शास्त्रार्थं न जानामीति ज्ञानं न स्यात्। शास्त्रार्थत्वेन शास्त्रार्थपरोक्षज्ञानस्य प्रागपि सत्त्वात्। अविशेष्यविशेषप्रकारकपरोक्षज्ञानमेव प्रतिबन्धकमित्युक्तौ तादृशज्ञानाभाव एव ग्राह्यः सिद्धेनैवोपपत्तेः॥

किञ्च—अज्ञानस्य साक्षिणः तयोरधिष्ठानाध्यस्यमानसम्बन्धस्य च अनादित्वात् का प्रतिबन्धकथा। अपिच—वनं पश्यतः अयं पनसः अयमशोकः [१]इति विशेषज्ञानाभावदशायां, अस्ति मया अत्र वृक्षो विशिष्य [२]न ज्ञायत इत्यनुभवः। [३]तत्र च ज्ञानाभाव एव विषयो वाच्यः। न च तत्र विशेषगोचरभावरूपाज्ञानमेव विषयोऽस्त्विति वाच्यम्। तव तत्रैककोटिकानवधारणस्यैवेष्टतया तत्र अज्ञानग्रहणासम्भवात्। अत एव अनभ्यासदशापन्नजलज्ञाने एककोटिकानवधारणतया त्वदभिमते जलं न जानामीति ज्ञानाभावः। का तर्हि मम चन्द्रे गतिरिति चेत् धूमादि मार्ग एवेति ब्रूमः॥

किञ्च—मम शास्त्रार्थज्ञानसामग्री नास्तीति अस्ति प्रतीतिः। त्वदुक्तरीत्या शास्त्रार्थज्ञानसत्वात् न तत्सामग्र्यभावस्सम्भवति। विशेषज्ञानसामग्रीविरहेऽपि त्वदुक्तव्याघातादेव गृहीतुं न शक्यते तत्र कां गतिं यास्यसि। यदि तत्र सामग्री भावरूपा इष्यते तदा काममङ्गीकुरु भावरूपमज्ञानमपि॥

अपि च—कश्चित् कश्चिदाह—'शास्त्रार्थमुपदिशेति' अपर आह—'अनधिकारी भवान्, न तवोपदेष्टव्यः शास्त्रार्थः' [४]इति। शास्त्रार्थं शास्त्रार्थं इत्येव विशिष्याप्युपदिशति। विशिष्य नोपदेष्टव्य' इति तत्र भावरूपानुपदेशेन विना कथं भावरूपाज्ञानसिद्धिः॥

किञ्च—ब्रह्मसूत्रारम्भानुरोधेन जिज्ञासा तावदुरपह्नवा, त्वदिष्टा च सा। तत्र ज्ञानस्याग्रहणे तदिच्छाया असम्भवात्, ज्ञानस्य च विषयनिरूप्यत्वात् [५]विषयज्ञानाज्ञानयोः जिज्ञासा अनुपपन्नैव। यदि च विशिष्य न जानामीति तथा

---

१. इत्यादि. २. न ज्ञायते. ३. अत्र च. ४. इति। उपदिशति च. ५. विषयाज्ञाना.

ज्ञातव्यमिति जिज्ञासानुरोधेन ज्ञाते [१]जिज्ञासासम्भवेन च [२]विशेषत्वेन ज्ञातैर्विशेषैरेव ज्ञाननिरूपणेन जिज्ञासोपपत्तिरिति कल्प्यते। तदा विशिष्य न जानामीति प्रत्ययानुरोधेन [३]विशेषत्वेन ज्ञातैर्विशेषैरेव ज्ञाननिरूपणे [४]विशेषज्ञानाभावोपपत्तिरिति कल्प्यताम्। यदि च जिज्ञासाविषयज्ञाननिरूपणं साक्षिभास्यैरेव विशेषैः, साक्षिभानं च न जिज्ञासाविरोधीति कुदृष्ट्या पश्यसि तदा अभावप्रतियोगिनिरूपणमपि साक्षिणैवेति कुतो न पश्यसि ॥

ननु- ज्ञाननिरूपकविशेषविषयक[५]साक्ष्यात्मकज्ञाने सति विशेषज्ञानाभावज्ञानं न सम्भवति। जिज्ञासा तु साक्षिरूपज्ञानस्य संशयानिवर्तकत्वात् सम्भवतीति चेन्न— इच्छा तावत् इष्टतावच्छेदकप्रकारकज्ञानसाध्या, तत्र च इष्टतावच्छेदकं नार्थविशेष विषयत्वम्। साक्षिरूपतादृशज्ञानस्य सिद्धत्वात्। इष्टतावच्छेदकावच्छिन्नसिद्धौ तेन रूपेण इच्छाया असम्भवात्। तथा चावधारणत्वं दृष्टान्तावच्छेदकं [६]तेन रूपेण ज्ञानेच्छा जिज्ञासेति पर्यवसन्नम्। तथा चाभावपक्षेऽप्यनवधारणात्मकसाक्षिणा विशेषज्ञानेऽपि अवधारणरूपज्ञानाभावविषयत्वमस्त्विति तुल्यम्। साक्षिणस्संशयानिवर्तकत्वं च असिद्धम्। शुक्तिरजतज्ञानेन संशयनिवृत्तिदर्शनात् ॥

किञ्च—साक्षिणा शास्त्रार्थस्य ज्ञाने शास्त्रश्रवणानन्तरमिव तदर्थः प्रागपि व्यवह्रियेत ज्ञानवदेव। तस्मात् [७]सर्वत्राविशिष्यविशेषप्रकारकज्ञानावलम्बनेनैव परिहार इति ॥

किञ्च—अज्ञानमिति—न जानामीति च ज्ञानाभावत्वेनैव प्रतीयमानत्वात् कथं भावरूपाज्ञानसिद्धिः ॥

अत्र यदुक्तमभावत्वेनानुभावोऽसिद्ध एव। अधर्म इत्यादाविव विरोधित्वेनैवानुभवात्। अत एवाज्ञानमिति प्रयोगः। अभावार्थकत्वे समासानुपपत्तेः। अन्यथा घटाज्ञानमितिवत् वायौ [८]पृथिव्यरूपमिति प्रयोगापत्तिरिति ॥

---

१. जिज्ञासाया असंभवेन. २. विशेषत्वेनैव. ३. विशेषत्वेनैव. ४. विशेषाभावोपपत्ति विशेषज्ञानाभावज्ञानोपपत्ति. ५. साक्षात्कारकज्ञाने. ६. इष्टतावच्छेदकरूपेण. ७. अविशेष्य. ८. पृथिवीरूपम्.

तन्न । अद्वेषागमनाभोजनाकारणादिशब्दानामबाधासिद्धय[१]नवधारणादि शब्दानां च लौकिकैः परीक्षकैश्चाभावविषयतया प्रयोगात् । त्वयापि हि कार्यानुत्पाद प्रयोजकमित्याद्युच्यते । एवं धात्वर्थयोगिनो नञः सर्वत्राभावविषये प्रयोगदर्शनात् अज्ञानमित्यनुभवव्यवहारयोरभाव[२]विषयत्वमेव । अस्तुवान्यत्राभावे प्रयोगाभावः। तथापि नास्ति न करोति नेच्छतीत्यादावाख्यातान्वितनञोऽभाववाचित्वमेव दृश्यते। यदि नामान्वितनञो विरोधिविषयत्वमिति त्वयो[३]च्येत, तर्हि उभयविधप्रयोगस्यापि 'मयि ज्ञानं नास्ति मय्यज्ञान'मित्यादौ दर्शनादुभयोरैकार्थ्ये वक्तव्ये [४]कस्मिन्नर्थे उभयोरैकार्थ्यमिति विशये क्लृप्तत्वादभाव एवेत्युचितम् । नच तत्र —मय्यज्ञान- मिति वा अहमज्ञ इति वा अज्ञानानुभवे सति पश्चात्तेन [५]ज्ञानाभावानुमानात् मयि ज्ञानं नास्तीति व्यवहार इति वाच्यम् । अज्ञानस्य ज्ञानसामान्याभावव्याप्तेरसिद्धेः। यच्च पृथिव्यरूपमिति प्रयोगापादनं तद्वायुत्वस्य रूपविरुद्धतया अज्ञानशब्दस्य विरोधिपरत्वेऽपि तुल्यम् । वायुत्व एव रूपविरोधविवक्षया प्रयोगसंभवात् ॥

[६]यच्चोक्तं अभावत्वमपि भावरूपाज्ञानस्यास्त्येव । चैतन्ये कल्पितस्य तदभा- वात्मकत्वात् । यो यदभावात्मकः स तदभाव इति व्याप्तेरिति । तन्न । प्रतियोगिता- वच्छेदकस्यान्योन्याभावात्यन्ताभावत्वेऽपि अन्योन्याभावस्य तदत्यन्ताभावत्वासिद्धेः। ननु यो यद्भावप्रतियोगिकोऽभावः स भावस्तदत्यन्ताभाव इति विवक्षितम् । अतो न व्यभिचारः । अन्योन्याभावस्य भावत्वाभावात् । अविद्या च भावरूपेति [७]स्वाभावात्मकाभावाधिष्ठानाभाव इति चेन्न । व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगिनि तदत्यन्ताभावत्वाभावे[८]न व्यभिचारात् । यः प्रतियोगिविरोधियद्भावप्रतियोगिको ऽभावः स तदभाव इति विवक्षितम् । विरोधित्वं च यद्यपि न प्रतियोग्यनधिकर- णाधिकरणत्वम् । व्यधिकरणधर्मा[९]वच्छिन्नप्रतियोगिनि व्यभिचारात् । ब्रह्मणि निराश्रये तादृशविरोधित्वाभावाच्च । तथापि [१०]प्रतियोग्यधिकरणानधिकरणत्वं तद्विव- क्षितम् । नचैवं सत्याकाशस्य स्वात्यन्ताभावाभावत्वाभाव[११]प्रसङ्गो दोषः इष्टत्वात् ।

---

१. द्वयनावरणादि. २. विषयत्वमेव अस्तु नान्यत्र. ३. उच्यते. ४. कतरस्मिन्. ५. ज्ञानाभावात् मयि. ६. यच्चेदमुक्तम्. ७. स्वाभावाधिष्ठाना. ८. भावत्वेन. ९. वच्छिन्नाभावत्वप्रति. १०. प्रतियोग्यनधिकरणानधिकरणत्वम्. ११. प्रसङ्गः, को दोषः.

अथवा प्रतियोगिविरोधीति स्थाने प्रतियोगितासमानाधिकरणधर्मावच्छिन्नत्वं विवक्षितम्। तेन न कोऽपि दोष इति चेत् पटाभावस्य स्वस्मिन् घटाभावव्यवहारजनकतया घटाभावत्वेन तत्प्रतियोगिनि घटे पटाभावाभावत्वाभावेन व्यभिचारात्। अधिकरणान्तरे अभावव्यवहारालम्बनं यो भावप्रतियोगिकाभाव इति [१]चेद्विवक्षितं तर्हि ब्रह्मणोऽधिकरणान्तरे अभावव्यवहारानालम्बनत्वात् नाविद्या ब्रह्मणो भावः॥

किञ्च प्रतियोगितावच्छेदकावच्छिन्नप्रति[२]योगिज्ञानमभावज्ञानकारणमिति त्वयैवोक्तं ज्ञानाभावत्वेन प्रतीते ज्ञानत्वं प्रतियोगितावच्छेदकं वक्तव्यं, तथा च साक्षिणोऽपि ज्ञानत्वात् तस्मिन् सति कथं तदभावः, स्वयंप्रकाशतया तस्मिन् प्रकाशमाने च कथं तदभावज्ञानम्। किञ्च ब्रह्मणोऽविद्याभावत्वाभावाच्च न तन्मूलमविद्याया ब्रह्माभावत्वम्। अधिष्ठानस्याध्यस्ताभावात्मकत्वस्य निराकरिष्यमाणत्वात्॥

किञ्च यद्यभावत्वमिष्यते कथं तर्हि भावत्वं ज्ञानसामान्यविरोधित्वनिर्वाहाय; लाघवार्थं च भावत्वमिष्यत इति चेन्न। किमहमज्ञ इति ज्ञानसामान्यविरो[३]धित्वं तन्निर्वाहाय भावत्वं कल्प्यत इति विवक्षितम्, उत सामान्याभावत्वादेव—नाद्यः धर्मिप्रतियोगिज्ञानयोः सत्त्वेन ज्ञानसामान्यविरोधित्वप्रतीतेरसंभवात्। न द्वितीयः। स्वरूपासिद्धेः। व्याप्यत्वासिद्धेः व्यभिचाराच्च। लाघवं चासिद्धम् अक्लृप्तत्वात्॥

अपिच—अज्ञानस्य चैतन्याश्रयत्वेनान्तःकरणाश्रयत्वाभावात् कथमहमज्ञ इति प्रतीतिस्तद्विषयः स्यात्। अत्र यदुक्तमन्तःकरणस्याज्ञानाश्रयचिदैक्याध्यासात् तथा प्रतीत्युपपत्तिरिति। तन्न। अहमर्थाज्ञानयोरुभयोरपि [४]चैतन्याध्यस्तत्वाच्चैतन्याभेदेन प्रतीयमानयोः परस्पराधाराधेयभावप्रतीतेरसंभवात्। अन्यथाऽहमर्थस्यैवाज्ञाननिष्ठतया प्रतीतिप्रसङ्गात्॥

नन्वज्ञानं चिदधिष्ठानं चिदाश्रयं च—अहमर्थस्तु चिदधिष्ठानक एव। अतश्चिदाश्रयतया अज्ञानस्य प्रतीतौ चिदभिन्नतया प्रतीयमानाहमर्थाश्रयत्वप्रतीतिरुपपद्यत इति चेन्न। अभेदे सति भेदगर्भाश्रयाश्रयिभावायोगात् तयोः सत्ताभेदासिद्धेः॥

---

१. चेद्विवक्ष्यते. २. योगिज्ञानाभावज्ञानमत्र करणमिति. ३. धित्वं प्रतीयते तन्निर्वाहाय. ४. चैतन्याभेदेनाध्यस्त.

किञ्च—एवं सति घटोऽज्ञ इति प्रतीतिप्रसङ्गः। किञ्च त्वन्मते जडविषयाज्ञानाभावात् घटं न जानामीति घटविषयत्वेनाज्ञानानुभवः कथं [१]भावरूपाज्ञानविषयः स्यात्। अज्ञानविषयचैतन्याभेदात्, तदुपपत्तिरिति चेन्न—शुद्धचैतन्यस्यैव घटाद्यधिष्ठानत्वात्। तेनैव घटस्याभेदः प्रतीयते। अज्ञानविषयावच्छिन्नचैतन्यस्य ततो भेदान्नाज्ञानविषयाभेदप्रतीतिः संभवति॥

नन्वधिष्ठानचैतन्यस्याज्ञानविषयचैतन्येन वास्तवाभेदादज्ञानविषयचैतन्याभेदप्रतीतिः संभवतीति चेत्—तर्हि अज्ञानविषयपटावच्छिन्नचैतन्याभिन्नशुद्धचिदभिन्न तया घटज्ञानदशायामपि घटं न जानामीति प्रतीतिप्रसङ्गः। घटापरोक्ष[२]ज्ञानमेवाज्ञानप्रतिबन्धकमिति चेन्न। वनं गत[३]स्येमं वृक्षं न जानामीत्यज्ञानानुभवस्य इदमिति ज्ञानेन प्रतिबन्धप्रसङ्गात्। नचेदमिति ज्ञानेन पनसत्वावच्छिन्नाज्ञानानुभवो न प्रतिबध्यत इति परेण वक्तुं शक्यते। नापीदमिति भानदशायामेव पनसत्वादिभानाभावस्याङ्गीकारात् एककोटिकानवधारणात्मकं तज्ज्ञानमस्त्येव। अयं पनसो नवेति सन्देहानुसारेणानवधारणात्मकत्वस्य वक्तव्यत्वात्। नच पनसत्वमेव न गृह्यते [४]व्यक्तिसामग्रीवेद्यत्वाज्जातेः। नच वाच्यताषिषयः संशयः पनसशब्द वाच्य इत्य[५]ग्रहादिति हि परेणोच्यते, नचावधारणमेवाज्ञानानुभवप्रतिबन्धकं अनभ्यासदशापन्नजलज्ञानेन तवानवधारणतयाऽभिमतेनाज्ञानानुभवप्रतिबन्धदर्शनात् अपि च सुखं न जानामि—शुक्तिरूप्यं न जानामीत्यादेः सुखाद्यज्ञानाभावेन ज्ञानाभावविषयत्वमेव वाच्यमित्यन्यत्रापि तथा॥

यदत्रोक्तं स्वस्य विद्यमाने सुखे विशेषतोऽनुभवनियमेन न जानामीत्यनुभवोऽसिद्ध एवेति चेत्—तन्न। विशेषतोऽनुभवेऽपि, अशोकादाविव सुखं न जानामीत्यनुभवस्य, तत्सन्देहजिज्ञासाप्रश्नप्रतिवचनानां चा [६]दर्शनात्। संभवन्ति हि तत्र द्रव्यत्वगुणत्वनिर्धारणे सन्देहादयः। यत्र [७]सुखप्रातिमासिकादिविषयमेव वाक्यं प्रयुक्तं श्रोतुर्वाक्यादर्थज्ञानं न जातं, तत्र तस्य त्वदुक्तं न जानामीत्यनुभवो

---

१. भावरूपस्य अज्ञानस्य. २. ज्ञानमेवाज्ञात्रा अभेदज्ञानप्रतिबन्धकमिति. ३. स्ववनं वृक्षम्. ४. वृत्तिसामग्री. ५. 'ग्रहणादिति हि परेणो' इदं क्वचिन्नास्ति. ६. दर्शनात् असम्भवः तर्हि तत्र द्रव्यत्वगुणत्वनि. ७. सुखप्रतिभासिकादि.

दुरपह्नवः। स च ज्ञानाभावे[1]नैवोपपन्नः। किञ्च—अनागतं न जानामीति कथं प्रतीतिः। तदावारकाज्ञानाभावात्। तथाऽतीतं न जानामीत्यनुभवोऽप्यनुपपन्नः॥

यच्चोक्तं ज्ञाननिवर्त्यत्वमेव ज्ञानविरोधित्वम्। एवञ्च ज्ञाननिवर्त्यत्वेनैवाज्ञानं गृह्यत इति, तन्न। ज्ञानस्य तु तदानीमभावेन ततो निवृत्तेरसिद्धेः कथं प्रत्यक्षेण तद्ग्रहः। घटाज्ञानादौ [2]घटज्ञाननिवर्त्यत्वदर्शनादनुमिनोतीति चेन्न। आश्रयासिद्धेः। केनापि रूपेण तस्याज्ञानात् स्वरूपासिद्धिश्च। हेतोः तत्राज्ञानात् व्याप्यत्वासिद्धिश्च। घटाज्ञानेऽपि ज्ञाननिवर्त्यत्वादर्शनात्। अज्ञानत्वस्य ज्ञाननिवर्त्यत्वात्मकतया ज्ञाननिवर्त्यत्वग्रहणात् पूर्वं तदाकारेण तस्यानुपस्थितेः। आकारान्तरस्य चाभावात्। किञ्च—यदि ज्ञाननिवर्त्यत्वं गृह्येत तदा अहमज्ञ इतिवत्, अहं ज्ञाननिवर्त्यत्ववानिति व्यवहारापत्तिः। किञ्च ज्ञानस्य कारणत्वाकारणत्वसन्देहे कारणत्वाभावनिश्चये च न जानामीति ज्ञानं दृश्यते। नच तद्दशायां त्वदुक्तज्ञाननिवर्त्यत्वात्मकविरोध[3]ग्रहसंभवः। किञ्च न गच्छामीत्यादौ गमनादिनिवर्त्यत्वप्रतीतिमनङ्गीकुर्वतः कथमेतदङ्गीकारः। अपि च प्रकृष्टप्रकाशतया चन्द्रग्रहेऽपि प्रकृष्टप्रकाशश्चन्द्र इत्युपदेशात् प्राक् चन्द्रं न जानामीति प्रतीतिरनुभवसिद्धा—नच सा भावरूपाज्ञानविषया। प्रत्यक्षेण चन्द्रज्ञानादेव तदज्ञानासंभवात्। संस्थानविशेषात्मकं चन्द्रत्वमपि हि दृष्टमेव, त्वदिष्टं च। तथा सत्यमिष्टम्। अत एव चन्द्रानवधारणमेककोटिकमिष्यत इति चेन्न। एककोटिकानवधारणे सति तद्विषयगोचराज्ञानानुभवा[4]संभवात्। अन्यथाऽनभ्यासदशापन्नानुभवे सति जलं न जानामी[5]त्यनुभव प्रसङ्गात्। अतस्तत्र प्रकृष्टप्रकाशाद्यसाधारणधर्मावच्छेदेन चन्द्रपद[6]वाच्यत्वग्रहाभावश्चन्द्रं न जानामीत्यनुभवविषयो वाच्यः। एवञ्च एवमेव सर्वत्र ज्ञानविशेषाभावस्तत्र तत्र योग्यो विषयः॥

अपि च अस्ति तावत् सार्वलौकिकीयं प्रतीतिः। इममर्थं सामान्येन जानामि विशेषवानित्यपि जानामि विशिष्य तु न जानामीति। [7]अस्याः प्रतीतेर्न भावरूपाज्ञानं विषयः। विशिष्य न जानामीति प्रतीत्यनुपपत्तेः। अर्थस्यैवा-

१. नैवोपपाद्यः. २. ज्ञाननि. ३. ग्रहणसम्भव. ४. ज्ञानानुभवात्. ५. जानामीत्यभावप्रसङ्गात्. ६. वाच्यत्वाग्रह. ७. जानामीतिप्रतीतेः.

ज्ञानविषयतया इमं न जानामीति प्रतीतेरिव भवितुं योग्यत्वात्। विशेषाणा[१]मज्ञान-विषयत्वे तेषामज्ञाने कथं तन्निरूपितवेषेणाज्ञानप्रतीतिः—[२]विशेषत्वेन अज्ञातानां साक्षिणा ज्ञातानां वा ज्ञाननिरूपकत्वं भावरूपाज्ञानपक्ष इवाभावपक्षेऽपि सुवचम्॥

यच्चोक्तम्—न जानामीति प्रतीतेर्ज्ञानाभावविषयत्वे घटो न जानातीति प्रयोगस्साधुस्स्यादिति—तत्र बाढमित्युत्तरं, अर्थासत्वात्, अनुशासनविरोधाभावाच्च, नत्वप्रयोगात् असाधुतावश्यंभावाच्च। नच अनुशासनविरोधोऽस्ति। तस्मादर्थाभाव निबन्धनैवासाधुता, इति चेन्न—

दूषणसङ्ग्रहकारिका॥

घटो नेच्छति न द्वेष्टि न दुःख्यति न सुख्यति।
न गच्छति न जागर्ति न शेते न च भाषते॥
इत्यादावप्यसाधुत्वं वस्त्वभावप्रसङ्गतः॥
अप्रसङ्गान्निषेधस्य व्यतिरेकोपपादने।
[३]घटे विधिर्निषेधो न तथैवेति विभावय॥
जानाति घट इत्येवं विप्रलब्धेन चोदितः।
प्रयुङ्क्ते च न जानाति घट इत्येव संसदि॥
त्वत्पक्षे तु प्रसङ्गोऽयं दुर्वार इति निश्चिनु॥
भावाज्ञानस्य विरहान्न प्रयोगो भवेद्यदि।
अहमर्थेऽपि तेनैव न प्रयोगो भवेद्ध्रुवम्॥
एकस्मिन्नेव चैतन्ये द्वयोरध्यसनाद्यदि।
[४]अज्ञानमहमर्थे स्यात् प्रतीतेर्विषयत्वतः॥
घटे तथैव दृश्येत चैतन्याध्यसनात्तयोः॥
इयानेव विशेषोऽत्र प्रसङ्गविरहाद्घटे।
न निषेधो मम स्यात्ते स्यात् प्रयोगो घटे ध्रुवम्॥

---

१. विशेषाणामज्ञानं अज्ञानविषयत्वे. २. विशेष्यत्वेन ज्ञातानाम्. ३. घटेऽपिधी-निषेधान. ४. अज्ञानमहमर्थः स्यात्.

न जानातीति भावस्य गोचरत्वं यतो मतम् ।
ततस्स्याद् ध्रुवमेवं च स्वदोषो रोपितः परे ॥

यच्चेदमुच्यते—

अनुभूयते तावज्ज्ञानेन अज्ञानं निवृत्तमिति, गीतं च भगवता—
'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।' इति,
ततश्च अभावस्य ज्ञाननिवर्त्यत्वाभावात् भाव एव अज्ञानमिति ।

तन्न—

निवृत्तिप्रतियोगित्वं ज्ञानाधीनं यतस्ततः ।
ज्ञानान्निवृत्तमज्ञानमिति [१]धीरूपपद्यते ॥
अध्यक्षरूपया बुद्ध्या ज्ञातो घट इतीर्यते ।
नाध्यक्षाज्ज्ञानमन्यद्धि तत्र सिध्यति तद्धिया ॥
रामेण पुत्रवान् पङ्क्तिरथश्च समुदीर्यते ।
ज्ञानेन तु तदज्ञानमित्येतत् कर्मगोचरम् ॥
मिथ्याज्ञानग्रहो वाऽपि तेन स्यान्नेतरस्य हि ।
ज्ञानान्निवृत्तमज्ञानमिति धीर्भावगोचरा ॥
न सेत्स्यति परोक्षेऽपि तद्धियस्स्फुटमीक्षणात् ॥

यच्चोक्तम् — सुप्तोत्थितपरामर्शसिद्धसौषुप्तिकप्रत्यक्षविषयो भावरूपाज्ञानमिति—तदसारम्—स्वरूपेणैवाज्ञानानुभवे न किञ्चिदहमवेदिषमिति परामर्शानुपपत्तिः । साक्षिणा विषयव्यावृत्तस्यैवाज्ञानस्य सुषुप्तावनुभवे विषयव्यावृत्तमेव सुप्तोत्थितेन [२]परामृश्येत । ननु स्मर्यत एव—न किञ्चिदहमवेदिषमितीति चेन्न । घटत्वादिविशेषरूपेण प्रतीतेरापादनात् [३]न च तत्रापादकाभावः । विशेषाकाराणामपि साक्षिणा भानात् । अस्त्येव घटं नाज्ञासिषमिति परामर्शोऽपीति चेत्—इतः पूर्वं कदाऽप्यननुभूतस्यापि प्रातिस्विकरूपेण परामर्शप्रसङ्गात् । अन्यथा एतावन्तं कालं न किञ्चिदवेदिषमिति कालस्यापि प्रातिस्विकरूपेण परामर्शाभावापत्तेः ।

१. धीर्नोपपद्यते. २. परामृश्यते, तत् स्मर्यते. ३. न चात्रापादका.

साक्षिणा सर्वेषां स्फुरणेऽपि साक्षिविषयत्वादपरामर्शे अज्ञानपरामर्शोऽपि न स्यात्। अज्ञानविषयत्वादपरामर्शे न किञ्चिदवेदिषमिति किञ्चिदित्यपि परामर्शो न स्यात्। सुखमहमस्वाप्समिति [१]स्वरूपेणानन्दपरामर्शोऽपि न स्यात्। संसारदशायामानन्दावरणस्य त्वदिष्टत्वात्। न च सुषुप्तिकाले तदावरण[२]निवृत्तिश्शङ्कितुं शक्या। तदानीं प्रमाणज्ञानविरहात्॥

अथ स्यात् संस्कारेण विना परामर्शानुपपत्तेः संस्कारस्य च कादाचित्कज्ञानसाध्यत्वात् सुषुप्तौ प्रमाणज्ञानविरहेऽपि अविद्यावृत्तिरिष्यते। सा चाविद्याकारिका, विषयावच्छिन्नाकारिका, विषये किञ्चित्त्वाकारिका, तत्कालाकारिका, तदधिकरणत्वाकारिका च। अतस्तदधीनोऽयं सुसंपन्नः परामर्श इति नातिप्रसङ्गगन्धोऽपि, साक्षिमात्रादेव परामर्श इत्यनभ्युपगमात् इति॥

नैवं, तद्वृत्तेर्दशाविशेषसाध्यत्वे तद्दशासहकारान्निरुक्तपरामर्शोपयोग्यनुभवस्य ज्ञानाभावगोचरस्य मनसैवोपपत्तौ परामर्शान्यथानुपपत्त्या कथं भावरूपाज्ञानानुभवकल्पना, परामर्शबलात् तावन्मात्रगोचराविद्यावृत्तिकल्पनवत् तावन्मात्रे मनोव्यापारकल्पने बाधकाभावात्। न च प्रतियोगिज्ञानस्यावश्यकत्वात् तस्मिन् सति कथं तदभावग्रह इति वाच्यम्। प्रातिस्विकरूपप्रकारकज्ञानाभावानामेव ग्राह्यत्वसम्भवात्। किञ्चित्त्वेनोपस्थितानां च पदार्थानां अभावप्रतियोगिभूतज्ञाननिरूपकत्वात्। कथमन्यथा भावरूपाज्ञानपक्षेऽपि गतिः, तत्रापि हि किञ्चित्त्वस्य अज्ञानविषयत्वे परामर्शानुपपत्तेः, प्रातिस्विकरूपेण अज्ञानविषयाणामेव किञ्चित्त्वेनोपस्थितानामज्ञाननिरूपकता वाच्या। ननु न किञ्चिदवेदिषमिति प्रतीतेः किञ्चित्त्वेनैवाज्ञानविषयता। न च अज्ञानविषयस्य स्मरणासम्भवः। परोक्षानुभूतानामपि स्मरणदर्शनादिति चेन्न। तथा सति परोक्षस्थल इव तत्प्रकाशे तद्गोचराज्ञानग्रहणासम्भवात्। अज्ञाने सत्यपि परोक्षज्ञाने सति नाज्ञानग्रह इति हि तव राद्धान्तः। तस्मादाकारान्तरेण अज्ञानविषयान्तराणामेव आकारान्तरेणोपस्थितानामज्ञाननिरूपकतेति वाच्यम्। तत् ज्ञानाभावपक्षेऽपि समानमेव॥

---

१. स्वरूपानन्द. २. निवृत्तिश्शक्यते वक्तुम्—निवृत्तिश्च दृश्यते.

किञ्च—अन्तःकरणस्य सुषुप्तौ लयाङ्गीकारात् तदाश्रयतया तदानीमज्ञानानुभवासम्भवात् कथं तथा परामर्शः ॥

किञ्च—एतावन्तं कालं न किञ्चिदवेदिषं, एतावन्तं कालमपि घटं नावेदिषं इति अस्ति प्रतीतिः। अतः कथं प्रागज्ञानाधिकरणतया कालग्रहः। यदि काल इदानीमनुमेयः कथं तत्समयसम्बन्धितया अज्ञानपरामर्शः। यदि सोऽपि इदानीमनुमेयः तदा ज्ञानाभाव एवानुमीयताम्। तत्काले भावरूपाज्ञानसम्बन्धसाधकतया अभिमतानामेव हेतूनां ज्ञानाभावसंबन्धसाधकत्वसंभवात् ॥

किञ्च—घटमनुभूय विस्मृतवतः एतावन्तं कालं [1]घटं नावेदिषं इति ज्ञानं दृश्यते। नचायमज्ञानपरामर्शः। घटानुभवकालेऽपि घटाज्ञानानुभवात्। तत्र च अनुमानस्यैव गवेषणादन्यत्रापि तदेव युक्तम् ॥

किञ्च—शुक्तिरजतज्ञानानन्तरमेतावन्तं कालम् इदं रजतं नावेदिषमित्यस्ति प्रतीतिः। तत्र चानुमानमेव शरणम् ॥

किञ्च—इदानीमुत्पन्नघटादिज्ञानानन्तरमेतावन्तं कालमिदं नावेदिषमित्यस्ति प्रतीतिः। तत्रानुमानेन विना का गतिः। विषयस्य स्वकाल एव चैतन्यावच्छेदकतया तदभावदशायां तदवच्छिन्नचैतन्याज्ञानासम्भवात्। [2]तस्मादिहाप्यनुमानमेव युक्तम्। सम्भवति चेन्द्रिय [3]प्रसादेन तदुपरमानुमानात् ज्ञानाभावानुमानम्। यदुक्तं शोभनस्वप्नादपि मनःप्रसादोऽस्तीति। तन्न—शोभनस्वप्न[4]दर्शनजन्यस्य दुस्स्वप्नदर्शनेऽपि दृश्यमानस्य स्वानुभवसाक्षिकस्य इन्द्रियप्रसादविशेषस्य लिङ्गत्वात् बहु[5]व्यापृतस्य हस्तादेरुपरमाधीनप्रसादविशेषदर्शनात्तादृशप्रसादे[6]नेन्द्रियप्रसादोपरमानुमानात्। प्रसादश्च [7]कार्यविशेषक्षमताविशेषः। अस्मरणादप्यननुभवानुमानं संभवति। यद्यपि पथि गच्छतस्तृणानुभवेऽप्यनन्तरं न तत्स्मरणनियमः। तथापि तत्रैव गमनत्वरया वृक्षादिमहत्तर[8]दर्शनात् जिज्ञासितवस्तुदर्शनाद्वा संस्कारोत्पत्तिप्रतिबन्धाभावादिहानुमानमुपपद्यत एव। लोकव्यवहारसिद्धं चास्मरणलिङ्गम्।

---

१. रजतमिदं नावेदिषं इत्यज्ञानं दृश्यते. २. तस्मात्कार्यानुमानमेव. ३. प्रसादात्तदुप. ४. दर्शनाजन्यस्वप्नदर्शनेपि. ५. व्यावृत्तस्य. ६. नेन्द्रियोपरमानुमानात्. ७. कार्यविशेषक्षमता, कार्यक्षमताविशेष. ८. दर्शनात्, इति क्वचिन्न.

लोके हि किमयमर्थस्त्वया दृष्ट इति पृष्टः कञ्चित्कालं मनः प्रणिधाय नाहं तत् स्मरामि अतो नानुभूत इत्याह। तस्मात् सुप्तोत्थितपरामर्शानुरोधेनापि न भाव-रूपाज्ञानसिद्धिः ॥

या चेयमनुमानजीर्णकन्था—विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावातिरिक्त-स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् अत्र धारावाहिकज्ञाने द्वितीयादिव्यवच्छेदार्थं विवादाध्यासितशब्दः स्वरूपभूतज्ञानव्यावृत्त्यर्थं भ्रान्तिभूतज्ञानव्यावृत्त्यर्थं च प्रमाणशब्दः कारणप्रतीतिव्युदासाय ज्ञानशब्दः स्वप्रागभावस्वोत्पादकादृष्टस्वोत्पत्तिप्रतिबन्धका-[1]दृष्टवेद्यगतव्यक्त्यभिव्यक्तिप्रागभावास्साध्यविशेषणैः व्यवच्छेद्याः। वस्त्वन्तरशब्दो वैशद्यार्थः। एवमाद्यस्वशब्दोऽपि—प्रागभावव्यतिरिक्तेत्येतावता प्रथमचतुर्थविशेषण फलसिद्धौ पृथग्विशेषणनिर्देशो व्यवच्छेद्यविशेषव्यञ्जनाय। धारावाहिकद्वितीया-दिष्वनैकान्त्यपरिहारायाप्रकाशितार्थशब्दः। आलोकमध्यारोपितदीपव्यवच्छेदायान्धकारोक्तिः। तत्रापि द्वितीयादिप्रभाव्यवच्छेदाय प्रथमोत्पन्नशब्दः। इन्द्रनीलादि-प्रभाव्यवच्छेदाय [2]प्रदीपशब्द इति ॥

अविद्यानुमानदूषणम् ॥

[3]तत्र सुखादिप्रमायां व्यभिचारः तस्यास्साक्षिरूपत्वात्। किञ्च [4]वृत्तेः पक्षत्वे तस्याः जडत्वेनानिवर्तकत्वात् बाधः। चैतन्यस्य पक्षत्वे तस्य प्रागभावाद्यसिद्ध्या बाधः। वृत्त्यवच्छिन्नचैतन्यस्य पक्षत्वे वृत्तेरुपलक्षणत्वे स एव दोषः। विशेषणत्वे पूर्वोक्त एव दोषः। वृत्तेर्निवर्तकत्वे चैतन्यस्य निवर्तकत्वाभावापत्तिश्च। प्रतिबिम्बस्य पक्षत्वेऽपि तस्य बिम्बाभेदात् पूर्वोक्त एव दोषः ॥

स्वविषयावरणत्वविवरणदूषणम् ॥

साध्ये च स्वविषयावरणत्वस्य तद्विषयज्ञानप्रतिबन्धकत्वरूपतया अज्ञानस्य तदङ्गीकारे ज्ञानानुत्पत्तिप्रसङ्गेन अज्ञाने आवरणत्वासम्भवाद्बाधः। ज्ञानसामग्र्या उत्तेजकत्वं च न सम्भवति। तदन्वयव्यतिरेकयोरेव कार्यतदभाव[5]प्रयोजकत्वेन पृथगन्वयव्यतिरेकासिद्ध्या प्रतिबन्धकत्वासम्भवात् ॥

---

१. दृष्टत्वं वक्तृगतवित्त्यभिव्यक्ति. २. प्रथमशब्दः. ३. अत्र सुखादि. ४. वित्तेः. ५. प्रयोजकत्वेन पृथक्.

किञ्च—प्रागभावस्य स्व[१]निवर्त्यत्वासम्भवात् प्रागभावव्यतिरिक्तेति(पदं) व्यर्थम्। आवरणपदेनैव स्वोत्पादकादृष्टव्यावृत्तेः स्वविषयेति व्यर्थम्। चितः अज्ञानादिसाक्षितया प्रकाशमानस्य आवरणायोगाच्च। घटाद्यवच्छिन्नमेवावृतम्। नत्वनवच्छिन्नमिति [२]चेन्न। तथा सति शाब्दाखण्डसाक्षात्कारे बाधः। तस्य पक्षबहिर्भावे व्यभिचारः। स्वरूपस्य सर्वदा प्रकाशमानतया प्रकाशितार्थप्रकाशकत्वमेव चरमसाक्षात्कारस्येति हेत्वभावान्न व्यभिचार इत्युक्तौ श्रुतेरनुवादकत्वप्रसङ्गः। द्वितीयादिज्ञानवदनिवर्तकत्वापत्तिश्च ॥

किञ्च—जडावरणानङ्गीकारात् घटविषयकज्ञानस्य स्वविषयावरणनिवर्तकत्वाभावात् बाधः। स्वविषयावच्छिन्नावरणनिवर्तकत्वविवक्षायामखण्डब्रह्मसाक्षात्कारे बाधः। दृष्टान्तासिद्धिश्च। अन्धकारस्य स्वविषयावच्छिन्नानावारकत्वात् ॥

हेतौ च प्रकाशकत्वम्, किं ज्ञानत्वम्, किं वा ज्ञान(क)कारणत्वम्, अथवा (क)कारणानुग्राहकत्वम्, यद्वा ज्ञानहेतुत्वमात्रम्, किं वा प्राकट्यहेतुत्वम्, यद्वा साक्षाद्वा परम्परया वा विषयव्यवहारानुगुण्यमात्रहेतुत्वमिति ॥

नाद्यः—दृष्टान्तस्य साधनविकलत्वात्। न द्वितीयः—पक्षे [३]तदभावेन स्वरूपासिद्धिप्रसङ्गात्। दीपस्य च करणभूतेन्द्रियानुग्राहकत्वेन साक्षात् करणत्वासिद्धेः। न तृतीयः—पक्षे तदभावात् स्वरूपासिद्धेरेव। नापि चतुर्थः—इन्द्रियादिष्वनैकान्त्यात् स्वरूपासिद्धेश्च। नापि पञ्चमः—प्राकट्यमनभ्युपगच्छतामप्रसिद्धेः। अभ्युपगच्छतामपि दीपप्रभायाः तद्धेतुत्वाभावेन साधनविकलत्वात्। नापि षष्ठः—इन्द्रियादिभिरनैकान्त्यात्। किञ्च परोक्षज्ञाने व्यभिचारः तस्याप्यज्ञाननिवर्तकत्वे [४]अनुमितेरज्ञाननिवर्तकत्वेन [५]स्वगोचरज्ञानविषयाज्ञानान्तरावश्यम्भावात्। तत्प्रकाशेऽपि [६]तथेत्यनवस्थता। निवर्तकत्वे व्यभिचारः, अनुमानवैयर्थ्यं च। नच व्यवहार एव प्रयोजनम् [७]अज्ञाननिवृत्त्यभावे तस्यैवासंभवात् ब्रह्मस्वरूपभूतज्ञाने

---

१. निवर्त्यत्वसंभवात्. २. चेत् तथा सति. ३. तदभावेन, तदभावात्, तदभावेन स्वरूपासिद्धिरेकता प्रसङ्गात्. ४. अस्या (अपि)अनुमितेः. ५. स्वगोचराज्ञाननिवर्तकत्वेन स्वगोचराज्ञान—विषयाज्ञानान्तरावश्यंभावात्. ६. तथेत्यनवस्था। अनिवर्तकत्वे. ७. अज्ञाननिवर्तकभावे.

सत्यपि ह्यज्ञानवशादस्ति प्रकाशत इति व्यवहाराभावात् नास्ति न प्रकाशत इति व्यवहारं चाङ्गीकरोषि ॥

नन्वज्ञानाभाव एव व्यवहारप्रयोजकः न तु तन्निवृत्तिः। तेनाज्ञाने तदभावस्य स्वतस्सिद्धत्वादज्ञानानुमित्यापि तद्व्यव[१]हारः स्यादेवेति चेन्न। तथाऽपि वह्न्यनुमानात् तद्व्यवहाराभावप्रसङ्गात्। ज्ञानमात्रस्य तत्प्रयोजकत्वे ब्रह्मणोऽपि व्यवहारप्रसङ्गः वृत्तेरेव [२]व्यवहारमूलत्वमित्याज्ञातु निर्मूलैव। वृत्तेरेव व्यवहारप्रयोजकत्वे आवरणकल्पनावैयर्थ्यम्। नच संशयनिवृत्तिः प्रयोजनम्। अज्ञाननिवृत्त्यभावे तदसिद्धेः। अज्ञानाभावस्य च प्रयोजकत्वे च वह्नि [३]संशयानुच्छेदप्रसङ्गात्। [४]ज्ञानस्य संशयनिवर्तकत्वे ब्रह्मणि संशयाभावप्रसङ्गात्। समानविषयावधारणस्य निवर्तकत्वेऽपि स एव दोषः। एककोटिकानवधारणत्वस्य निरासात्। यदि च समानप्रकारकावधारणं निवर्तकं ब्रह्मस्वरूपज्ञानं तु निष्प्रकारकमित्युच्यते तर्हि अद्वैतसाक्षात्कारात् संशया निवृत्तेस्तदर्थजिज्ञासानुपपत्तिः। तस्मादज्ञाननिवृत्तावप्रयोजकत्वमेव ॥

यत्तु कश्चिदाह—जागराद्यपरोक्षवृत्तित्वं पक्षतावच्छेदकं, तेन सुखादिप्रमायां धारावाहिकद्वितीयादि [५]प्रमायामपरोक्षवृत्तौ च न बाधः। किञ्च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिविरोधिज्ञानं न बाधः। किन्तु तत्सामानाधिकरण्येन साध्यसिद्धिबिरोधिज्ञानम्। तथा च वृत्तिमात्रे साध्याभावेऽपि कस्याञ्चिद्वृत्तौ साध्यसत्त्वात्। यथाश्रुतेऽपि पक्षे नोक्तबाधावतारः। साध्ये च प्रागभावातिरिक्तेति [६]विशेषणं न व्यर्थम्। प्रतियोगिनः प्रागभावनिवृत्तिरूपत्वे प्रतियोगिध्वंसे सति प्रागभावोन्मज्जनप्रसङ्गात्। प्रतियोग्यतिरिक्तैव हि प्रागभावनिवृत्तिः। न च निवृत्त्यानन्त्यं प्रागभावानन्त्यं च स्यादिति वाच्यम्। धटप्रागभावानन्त्यवदिष्टत्वात्। अतः स्वप्रागभावनिवर्तकतयाऽर्थान्तरवारकं सार्थमेव तत्। नापि द्वितीयविशेषणं व्यर्थं। स्वोत्पादकादृष्टमादायार्थान्तरवारकत्वात्। अज्ञानादिसाक्षितया प्रकाशमानेऽपि चैतन्ये आवरणमुपपद्यते। प्रकाशमानेऽपि सूर्यादौ मेघादेरावरणत्वदर्शनात्। आवरणत्वं च प्रतिबन्धकत्वम्। तस्य च केवलान्वयित्वेनाव्यावर्तकतया स्वविषयावरणे-

---

१. हारः सिद्धेति स्यादे. २. व्यवहारप्रयोजकत्वमित्याज्ञातु. ३. संशयाभेद. ४. ज्ञानमात्रस्य. ५. प्रमायां परोक्ष. ६. पदम्.

त्यप्यावश्यकम् । चतुर्थमपि युक्तं विषयगताज्ञातत्वव्युदासार्थत्वात् । हेतावपि न विकल्पावकाशः—प्रसिद्धानुमानेऽपि [१]एतद्देशैतत्कालीन[२]धूमवत्त्वादिविकल्पेन साधन वैकल्यस्वरूपासिद्ध्यादिना दूषणप्रसङ्गात् । उभयानुगतसामान्यस्य तत्र हेतुत्वेऽत्रा-प्यावरणसामान्यनिवर्तकत्वेन प्रत्यक्षसिद्धप्रकाशसामान्यस्य हेतुत्वासंभवात् । नच पृथिव्या गोत्वेन शृङ्गित्वानुमानं—विपक्षे बाधकाभावेनाप्रयोजकत्वात् । अत्र चावरण-सामान्यनिवर्तकतायाः प्रत्यक्षसिद्धत्वेनानुकूलतर्कसत्त्वात् । नचास्या अनुमितेः प्रका-शितप्रकाशकत्वे वैयर्थ्यम् । असिद्धत्वशङ्कानिरासार्थत्वात् । तस्मादनवद्यमिदमनु-मानमिति ॥

सिद्धान्तः ॥

अत्र ब्रूमः—एवमप्यनवधारणात्मकजागराद्यचन्द्रादिप्रत्यक्षस्यापि पक्ष-तया तत्र बाधः। अवधारणत्वविवक्षायां जागरादौ दैवादद्वैतवाक्यस्मरणानन्तरं उत्पन्ने भेदवासनादिप्रतिबन्धकार्ये अवधारणात्मके अद्वैतसाक्षात्कारे बाधः, तद्व्यावृत्त्यर्थं पक्षविशेषणे तत्रैव व्यभिचारः । प्रकाशितार्थप्रकाशकत्वेन व्यभिचारोद्धारे पूर्वदिनानु भूतघटादिगोचरजागराद्यसाक्षात्कारे भागासिद्धिः । जले अधोगत्वभ्रमपूर्वभाविनि-वृक्षोर्ध्वाग्रत्वज्ञाने च जागराद्ये बाधः—तत्र भ्रमानु[३]सारेण ज्ञानस्यावश्यकत्वात् । यच्च किञ्च पक्षतावच्छेदकेत्यादि तदपि न । अंशतो बाधेनानुमितिप्रतिबन्धाभावे-ऽपि साध्याभाववतः पक्षीकरणं प्रयोगस्य दोष एव । अन्यथा प्रतिज्ञाविषये सर्वत्र धर्मिणि बाधेऽपि दैवादबाधितपक्षान्तरे व्याप्यवत्तयोपस्थितेरनुमितेरबाधात् [४]प्रयोग-स्यादुष्टत्वापत्तेर्वादी न निगृह्येत । यदि च स्वाभिमतपक्षतावच्छेदकसामानाधिकरण्येन साध्यासिद्धे[५]र्निगृह्यते तर्हि पक्षतावच्छेदकयावदधिकरणे साध्यासिद्धावपि वादी-निगृह्येत तथैव कथकसंप्रदायात् । अत एव पूर्वे निबन्धारः बाधितेतरपक्षपरिग्रहे महान्तं यत्नमास्थिताः । कथमन्यथा प्रमाणपदमपि तव सङ्गच्छते । किञ्च विवादा ध्यासितमित्येतावता पक्षपरिग्रहे शेषवैयर्थ्यात् तस्य तद्विवरणरूपता वाच्या । तद्विवरणरूपत्वं च विवादपदमात्रनिर्देश एव स्यादिति तत्सिद्धये बाधितव्यावृत्तिः

१. देशीयैतत्कालीन. २. धूमवत्त्वतद्देशीयतत्कालीनधूमवत्वादिविकल्पेन वैकल्य? स्वरूपादीनां दूषण. ३. सारेणाज्ञानस्या. ४. प्रयोगस्य दुष्टत्वा. ५. निगृह्येत.

कार्यैव। किञ्चात्र बाधितस्थलेऽपि साध्यसिद्धये साध्यं निरुध्यते न वा। आद्ये किमर्थोऽयं संरम्भः। द्वितीये तत्रैव व्यभिचारः। यदपि च [१]साध्ये चेत्यादि। तदप्यसाधु—तथा सति त्वदभिमतमोक्षदशायां घटध्वंसे निवृत्ते घटोन्मज्जनापत्तेः॥

ननु तत्राविद्यालक्षणकारणाभावान्न घटोन्मज्जनमिति चेत् [२]हन्त तर्हीदानीं घटध्वंसकाले घटप्रागभावस्य कारणं पश्यसि येन प्रागभावोन्मज्जनमापादयसि। ननु सर्वस्य प्रागभावतदभावयोरन्यतरवत्त्वनियमात् प्रागभावाभावध्वंसे प्रागभावः स्यादिति चेत् तर्हि घटप्रागभावदशायां ध्वंसः स्यात् ध्वंसप्रागभावात्मकघटस्याभावात्। किञ्च घटात्यन्ताभावस्य घटप्रागभावाधिकरणे अभावात् घटः स्यात्। अत्रापि ध्वंसप्रागभावो घटात्यन्ताभावाभावोऽपि प्रतियोगिनोऽन्य एवेति चेत्-न-गौरवात्। लाघवेन घटध्वंसयोः प्रागभावध्वंसरूपतायाः घटतत्प्रागभावयोः ध्वंसप्रागभावरूपतायाः घटतद्ध्वंसप्रागभावानामत्यन्ताभावाभावत्वस्य च कल्पनात्। किञ्च प्रागभावनिवृत्तेः घटजन्यतया घटस्य द्वितीयक्षण एवोत्पत्तेः घटोत्पत्तिक्षणे प्रागभावः स्यादेव। तच्चानुपपन्नम्। प्रतियोग्यभावयोर्विरोधात् प्रागभावत्वविरोधाच्च। अत्यन्त शब्दस्य क्षणिकत्वपक्षे तस्य प्रागभावविरोध एव न स्यात् रूपतत्प्रागभावयोः युगपत् साक्षात्कारश्च स्यात्। अस्तु वा प्रागभावनिवृत्तिरन्यैव। [३]तथापि तत्र न प्रतियोगिनो जनकत्वसंभवः मानाभावादुक्तविरोधाच्च। तत्सामग्र्या एव जनकत्वसम्भवात् प्रागभावभेदेन च सामग्रीभेदात् कार्यभेदोपपत्तेः। यच्चाज्ञानादिसाक्षितयेत्यादि—तदपि न—प्रकाशावरणयोरविरोधे आवरणस्यैवोत्सादात्। सूर्यदृष्टान्तोऽपि विषमः—तत्र हि बहुलालोकनिस्सरणप्रतिबन्धो वा भूयोऽवयवेन्द्रियसन्निकर्षप्रतिबन्धो वा आवरणं—न चात्र तत्प्रसङ्गगन्धोऽपि। किञ्च न घटादिप्रतिबन्धकत्वमज्ञानस्य तमसो वेति बाधो व्याप्यत्वासिद्धिश्च। तदज्ञानप्रतिबन्धकत्वविवक्षायामपि ज्ञानप्रागभावात्यन्ताभावयोः प्रतिबन्धकत्वाभावेनादिमान्तिमविशेषणवैयर्थ्यात्। अज्ञानस्य प्रतिबन्धकत्वाभावेन बाधश्च। तन्निवर्त्यस्य तत्प्रतिबन्धकता नास्तीति त्वयोक्तत्वात्॥

---

१. साध्यमित्यादि. २. हन्तेदानीम्. ३. तथापि प्रतियोगिनो न जनकत्वसंभवः—

यदपि चतुर्थमपीत्यादि—तदपि न। [१]विषयगताज्ञातत्वस्य विषयगतज्ञानाभावरूपत्वे ज्ञानविषयत्वाभावरूपत्वे च [२]स्वनिवर्त्यपदेन तद्व्यावृत्तिसिद्धेः। यच्च हेतावपीत्यादि–तन्न। पक्षदृष्टान्तानुगतं [३]प्रकाशकत्वं न विद्यते। शब्दसाम्येन चेत्–पृथिव्या गोत्वात् शृङ्गं समापतेदित्यनेनैव दत्तोत्तरत्वात्। अनुकूलतर्काभावस्य [४]चोभयत्र चाविशेषात्। आलोकत्वतमस्त्वादिभिरेव निवर्त्यनिवर्तकभावात्। यच्च नचऽस्या अनुमितेरित्यादि- तदपि न। असिद्धत्वशङ्कानिरासः किमनुमितेरसिद्धत्वाभावविषयत्वात् निरुक्तसाध्यविषयत्वाद्वा। नाद्यः–तस्य साध्याप्रवेशात्। न द्वितीयः। अस्या अनुमितेः प्रकाशितप्रकाशकत्वे पूर्वप्रकाशेनैवाप्रसिद्धत्वशङ्कायाः [५]निरासेन तद्वैयर्थ्यात् अप्रकाशितार्थप्रकाशकत्वे व्यभिचारः ॥

पूर्वपक्षः ॥

यदाह नवीनः—जन्यसविकल्पकाजन्यचाक्षुषघटप्रमाणज्ञानं पक्षः। अतो न सुखादिप्रमादिषु पूर्वोक्तबाधः। नच पटज्ञानजन्यस्य तदुत्तरक्षणजन्मनोऽपि घट-[६]ज्ञानस्य पक्षतावच्छेदकाक्रान्तत्वात् तत्र च स्वसमानाधिकरणेत्यादिना वक्ष्यमाणस्याप्याद्यहेतोरभावात् भागासिद्धिरिति वाच्यम्–सविकल्पकाजन्येत्यनेन स्वपूर्वसविकल्पकध्वंससामग्रीशून्यसमये चक्षुर्जन्यत्वस्य विवक्षितत्वात्। अन्धकारनिवृत्त्य[७]व्यवहितोत्तरकालीनचाक्षुषज्ञानं वा पक्षः स्वविषयावरणस्वनिवर्त्यवस्त्वन्तरपूर्वकमित्येकं साध्यम्। स्वविषयावरणत्वं च स्वजननायोग्यत्वं स्वनिवर्त्यत्वं स्वजन्यध्वंसप्रतियोगित्वं। वस्तुपदं च स्वपरम्। [८]तदन्तरं तदन्यत्। अनेन स्वस्य स्वाधिकरणक्षणोत्तरक्षणे सत्त्वेन स्वपूर्वत्वमस्तीत्यर्थान्तरता निरस्ता। इदं च साध्यं प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेतिमते। तेन स्वनिवर्त्येतीच्छाप्रागभावादिनाऽर्थान्तरवारणम्। स्वविषयावरणेति स्वप्रागभावेनार्था[९]न्तरत्वं वारितम्। स्वप्रागभावातिरिक्तस्वनिवर्त्यस्वदेशगत वस्त्वन्तरपूर्वकमित्यपरं साध्यम्। इदं च प्रतियोग्येव प्रागभावनिवृत्तिरित्येतन्मते।

१. विषयगताज्ञानत्वस्य विषयगताज्ञानभावरूपत्वे ज्ञानविषयत्वाभावादरूपत्वे च. २. स्वनिवर्तकपदेन तद्व्यावृत्तिसिद्धेः. ३. प्रकारत्वम्. ४. (क) चोत्तरत्राविशेषात् (ख) च उभयत्राविशेषात्. ५. निरासेनैतद्वैयर्थ्यात्. ६. ज्ञानस्योक्तपक्षता. ७. व्यवहितकालोत्तरकालीन. ८. तदन्तरं–इदं पदं नास्ति. ९. न्तरवाचकत्वं वारितम्.

अत्र च स्वसमानाधिकरणः प्रागभावः स्वप्रागभावः। तेनेच्छाप्रागभावादिभिर्नार्थान्तरत्वम्। आत्मत्वादिनाऽर्थान्तरवारणाय स्वनिवर्त्येति। [1]स्वदेशगतत्वं च स्वसमानाधिकरणत्वे सति प्रत्यक्षत्वम्। तेन स्वजनकादृष्टादिभिर्नार्थान्तरता॥

अथवा एकमेव साध्यम्। अत्र स्वप्रागभावव्यतिरिक्तेत्यादीनां पूर्वोक्त एवार्थः। स्वदेशगतेत्यत्र तु [2]स्वाश्रये वर्तमानत्वमेव विवक्षितम्। अत्र च इच्छादि प्रागभावस्वजनकादृष्टमात्मत्वादिकं चिकीर्षादिद्वारा स्वजन्यतन्तुसंयोगघटादिकार्य-प्रागभावश्च क्रमाद्व्यवच्छेद्यानि अभावान्यत्वात् प्रागभावान्यत्वमन्यदेवेति न वैयर्थ्यमपि॥

अथवा स्वप्रतियोगिकः प्रागभावः स्वप्रागभावः स्वविषयावरणत्वं स्वविषये संशयादिजननयोग्यत्वं स्वसत्ताक्षण[3]नियतध्वंसप्रतियोगित्वं स्वनिवर्त्यत्वम्। ततश्च प्रागभावोऽपि परमते विशेषादर्शनतया संशयादिजनक इति स्वप्रागभावस्वजनकादृष्टान्धकारादिव्यावृत्तये स्वप्रागभावेत्यादि विशेषणम्। परमते मनस्संयोगपूर्वकत्वेनार्थान्तरतानिवृत्तये [4]स्वनिवर्त्येति॥

अथवा पराभिमतप्रागभावान्यत्वज्ञानसमानविषयत्वज्ञाननिवर्त्यत्वज्ञानसमानाश्रयत्वविशिष्टा[5]ज्ञाननिवृत्त्यर्थं तानि विशेषणानीति न कस्यापि वैयर्थ्यम्। एकेनापि तेन विनोद्देश्यसाध्यासिद्धेः। येन विशेषणेन विना स्वाभिमतार्थो न सिध्यति तस्यैव साध्यविशेषणत्वात् इति। स्वसमानाधिकरण[6]विशिष्टाज्ञानध्वंसोत्पत्तिसमयानाधारस्थितिक[7]चाक्षुषसविकल्पकान्धकारनिवर्तकालोकान्यान्यत्वादिति हेतुः। अत्रासिद्धिसाधनवैकल्यपरिहाराय निर्विकल्पके व्यभिचारवरणाय च सविकल्पकेत्यादि। सुखप्रत्यक्षे व्यभिचारवारणाय चाक्षुषेति॥

यद्वा---एतज्ज्ञानविषयदेशीयान्धकारस्थितिसमयास्थितिकप्रत्यक्षत्वे सति एतज्ज्ञानोत्पत्तिसमये एतद्विषयसम्बन्धित्वादिति हेतुः। देशान्तरीय[8]द्वितीयादिप्रभायां व्यभिचारवारणाय एतद्विषयसंबन्धित्वादिति, धारावाहिकद्वितीयादि[9]ज्ञानव्यावृत्तये

१. सर्वगतत्वं च. २. स्वाश्रय. ३. नियतत्वं स्वप्रतियोगित्वं स्वनियतत्वं. ४. स्व-वृत्र्येति. ५. ज्ञानसिद्ध्यर्थम्. ६. विशिष्टध्वंसो. ७. चाक्षुषविकल्प ... र्तकान्यान्यत्वादिति हेतुः अत्रापि. ८. द्वितीयप्रमायाम्. ९. ज्ञाननिवृत्तये.

[1]एतज्ज्ञानोत्पत्तिसमय इति, एतद्धेतुनिर्विकल्पकनिवृत्तये प्रत्यक्षेति, [2]एतद्विषयपरकीयानुमित्यादौ व्यभिचारवारणाय अन्धकारस्थितिसमयास्थितिकेति। तच्चान्धकारस्थितिसमयस्थित्यभावप्रयोजकरूपवत्त्वं विवक्षितम्। तच्चालोके आलोकत्वं ज्ञाने चाक्षुषत्वमस्ति। अनुमितौ तु न किञ्चिदिति न परानुमितौ व्यभिचारः। पक्षीकृतज्ञानस्यापि देशान्तरीयान्धकारसमानकालीनत्वात् असिद्धिवारणाय एतज्ज्ञानविषयदेशीयेति ॥

यदा द्वितीयसाध्यं प्रति [3]पक्षहेत्वोः प्रयोगः—तदा न तयोरर्थान्तरव्यावर्तकविशेषण[4]मुपादेयम्। तेन विनापि तत्र पूर्वज्ञाननिवर्तकतया तत्साध्यस्य सत्त्वेन व्यभिचाराभावात् ॥

हेतुपरिष्कारः ॥

यद्वा—एतद्विषयमात्रावारकनिवर्तकत्वे सति आवारकान्यत्वं हेतुः। मात्रपदमीश्वरादौ व्यभिचारवारणाय—[5]तेषामेतज्ज्ञानाविषयरसाद्यावारकत्वं प्रत्यपि निवर्तकत्वात्। आवारकत्वं च तद्विषये नास्तीत्यादिव्यवहारप्रयोजकत्वम्। न च वर्णितसाध्यसिद्धेः पूर्वमेतज्ज्ञानं नास्तीति वाच्यम्। रूपादिचाक्षुषज्ञानाभावे तस्मिन् [6]संशयादिजनकतदज्ञानरूपावरणस्य तत्सत्त्वे तदभावस्य च अनुभवसिद्धत्त्वेन भावरूपा[7]ज्ञानात्मकावरणनिवर्तकत्वज्ञानाभावेऽपि सामान्यतः सिद्धत्वात्। तद्विषयावरण[8]समयावृत्तित्वे सति तदावरणनिवर्तकत्वं वा हेतुः। एतत्सिद्धिः पूर्ववदेव। नचात्राप्रयोजकत्वम्। प्राथमिकज्ञान[9]विषये उभयवादिसम्मतस्य अज्ञातत्वस्य भावरूपाज्ञानानङ्गीकारे कथमपि निर्वक्तुमशक्यत्वात्। ज्ञानप्रागभाव[10]स्याज्ञानत्वरूपत्वे द्वितीयादिज्ञानदशायामप्यज्ञातत्वव्यवहारप्रसङ्गात्। लाघवेनाप्रकाशशब्दस्य भावरूपाप्रकाशविषयत्वौचित्याच्च। [11]भावरूपाज्ञानाख्यावरणादन्यस्य प्राग[12]भावादेर्निवर्त्यत्वासंभवेनावरणनिवर्तकत्वरूपहेतूच्छित्तिश्च विपक्षे बाधिका ॥

---

१. एकज्ञा. २. तद्विषय. ३. उक्तहेत्वोः. ४. मुपपादनीयम्. ५. तेषामेव तज्ज्ञानविषयक साध्यावारकं प्रत्यपि. ६. संशयजनक. ७. ज्ञानावरण. ८. समवृत्तित्वे. ९. विषयत्वे. १०. भावस्यातत्वरूपत्वे द्वितीयाज्ञानदशा. ११. भावरूपज्ञानावरणादन्यस्य. १२. भावादेर्नित्यत्वासंभवेन.

एवं देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः अनादेर्ध्वंसिनी [१]प्रमात्वात् यज्ञदत्तप्रमा यथा इति चित्सुखोक्तानुमानमप्यत्र प्रमाणम्। नच सुखादिप्रमायां परोक्षवृत्तौ द्वितीयादिप्रत्यक्षप्रमायां च बाध इति वाच्यम्। जन्यसविकल्पकाजन्य-देवदत्तघटचाक्षुषप्रमायाः पक्षत्वेन विवक्षितत्वात्। नच धारावाहिकद्वितीयादिबुद्धौ व्यभिचारः—तत्रापि पक्षप्रमा[२]प्रागभावातिरिक्तस्य स्वप्रागभावनिवर्तकतया साध्य-सत्त्वात्। प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेति मते इदं साध्यं—तेन नाभावातिरिक्ते-त्यन्तवैयर्थ्यं, न वा दृष्टान्ते साध्यवैकल्यम्। नचेच्छादिप्रागभावादिनिवर्तकतयाऽर्था-न्तरता। नच साध्ये प्रमापदवैयर्थ्यम्। अभावातिरिक्तेत्यत्र सामान्याभावस्यापि विवक्षिततया देवदत्तदुःखादिप्रागभावातिरिक्तस्वाभावनिवर्तकतयाऽर्थान्तरतापरिहारा-र्थत्वात्। नचैवमपि पटप्रागभावातिरिक्तस्वप्रागभावनिवर्तकतयाऽर्थान्तरता—प्रमा-पदेन पक्षीभूतप्रमाया एव ग्रहणात्। नच तत्रापि पक्षीभूतप्रमान्तरप्रागभावाति-रिक्तस्याभावनिवर्तकत्वात् पक्षीभूतप्रमामात्रस्यार्थान्तरता शङ्कनीया। प्रमाव्यक्ती-नां प्रत्येकमेव पक्षत्वात्। नचैवं देवदत्तगतत्वविशेषणं व्यर्थम्—पक्षीकृतप्रमाधि-ष्ठानरूपस्वाभावातिरिक्तान्तःकरणगतप्रागभावनिवर्तकत्वेनार्थान्तरतापरिहारार्थत्वात्। अथवा जन्येत्यादि निरुक्तमेव पक्षतावच्छेदकम्—साध्ये चाभावातिरिक्तेत्यत्र सामा-न्याभाव एवात्र विवक्षितः। नचैवं प्रमापदवैयर्थ्यम्—देवदत्तगतप्रमानिवर्त्याज्ञाने देव-दत्तगतत्वस्यावश्यकत्वात्। तस्य चाज्ञानस्य स्वनिवृत्तिप्रागभावरूपत्वाच्च। पक्षीकृत-प्रमाया देवदत्तगताभावातिरिक्तनिवर्तकत्वस्य बाधितत्वेन प्रमापदस्य तत्परिहारार्थ-त्वात्। नचाप्रयोजकता—तर्काणामुपन्यस्तत्वात्॥

### अनुमानान्तरपरिष्कारः।

अनुमानान्तराण्यप्यत्र प्रमाणानि। इच्छाद्वेषप्रयत्नासमानकालीनसामग्री-जन्यप्रत्यक्षभावधर्माजनकस्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकघटादिप्रत्य-क्षप्रमा, ज्ञानातिरिक्तप्रत्यक्षनिवर्तिका, स्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयक-बाह्यविषयकजन्यप्रमात्वात्। स्वविषयध्वंसजनकप्रतियोगिप्रत्यक्षवत्। पक्षे परोक्ष-

---

१. प्रागभावातिरेकिणः. २. प्रागभावातिरिक्त स्वप्रागभावनिवर्तक.

प्रमावारणाय प्रत्यक्षेति पदम्। स्वमते शब्दजनिताहमाकारापरोक्षवृत्तौ बाधवारणाय घटादीति। धारावाहिकद्वितीयादिज्ञानव्यावृत्तये स्वसामग्रीकालीनेत्यादि। इच्छादिप्रागभावनिवर्तकतया अर्थान्तरताव्यावृत्तये धर्माजनकेति। संस्कारजनकतया असम्भववारणाय प्रत्यक्षेति पदं। स्वध्वंसजनकतया असम्भवो मा भूदिति भावरूपपदम्। इच्छाद्यनन्तरभाविघटादिप्रमायास्तन्निवर्तकतया अर्थान्तरता मा भूदिति इच्छेत्यादि। साध्ये संस्कारप्रागभावेन अर्थान्तरता मा भूदिति प्रत्यक्षेति। स्वनिवर्तकतया विशेषणज्ञानादिनिवर्तकतया चार्थान्तरं मा भूदिति ज्ञानातिरिक्तेति। हेतौ परोक्षप्रमायामुक्ताहमाकारवृत्तौ द्वितीयादिज्ञाने च व्यभिचारवारणाय स्वसामग्रीत्यादि विशेषणम् बाह्यपदं विषयजन्यपदं च॥

यद्वा—इच्छाद्वेषप्रयत्नासमानकालीनेत्येतद्बहिर्भावेनैव पक्षः। तत्र च पक्षविशेषणप्रयोजनानि पूर्वोक्तान्येव। कार्यसमानाधिकरणातिरिक्तप्रत्यक्षनिवर्तकमिति साध्यं पूर्वोक्तमेव। अत्रापि प्रत्यक्षपदकृत्यं उत्तरसाध्येष्वप्येवं द्रष्टव्यम्। ज्ञानेच्छादिनिवर्तकत्वेन अर्थान्तरतावारणाय [१]कार्यसमानाधिकरणातिरिक्तेति। अज्ञानस्यापि समानाधिकरणतया बाधवारणाय कार्येति॥

यद्वा—कार्यत्वानधिकरणप्रत्यक्षनिवर्तकमिति साध्यम्। अत्र च परमतानुसारेण घटादिप्रागभावनिवर्तकमृदादिप्रत्यक्षं दृष्टान्तः। इच्छादिनिवर्तकत्वेन अर्थान्तरवारणाय कार्यत्वानधिकरणेति विशेषणम्॥

साध्यान्तरम्॥

यद्वा—जन्यज्ञानासहकृतसामग्रीजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तकमिति साध्यम्। अत्र जन्येत्यादिकं ज्ञानान्यत्वं च प्रत्यक्षविशेषणम्। स्वस्वजनकविशेषणज्ञाननिवर्तकतया अर्थान्तरता मा भूदिति ज्ञानान्यपदम्। इच्छादिनिवर्तकत्वेन अर्थान्तरतावारणाय ध्वंसप्रतियोगीत्यादि। तावत्युक्ते अज्ञानस्यापि विनाशित्वात् बाधः स्यादिति जन्यज्ञानेत्यादिप्रतीकम्। नच घटध्वंसजनकघटप्रत्यक्षे साध्यवैकल्यम्। घटस्यापि सत्तादिना तादृशध्वंसप्रतियोगिजातीयत्वा-

१. कार्यत्वानधिकरणातिरिक्तेति।

दिति वाच्यम्। ध्वंसप्रतियोगि[१]जातीयपदेन तादृशध्वंसप्रतियोगिवृत्तिबाह्यावृत्ति जातिमत्त्वस्य विवक्षितत्वात्। जातिरहितप्राग[२]भावनिवर्तकमृदादिज्ञानं व [३]अत्र दृष्टान्तः। जन्यज्ञानाजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तकमिति वा साध्यम्। दृष्टान्ते साध्यवैकल्योद्धारः पूर्ववदेव। स्वेन अर्थान्तरता-निवृत्तये ज्ञानान्येति। पूर्ववदेव ध्वंसप्रतियोगीत्यादे[४]र्जन्यज्ञानेत्यादेश्च प्रयोजनम्। नचात्र साध्यद्वयेऽपि बाह्यावृत्तिजातिमद्भिन्नप्रत्यक्षनिवर्तकमित्येतावता अभीष्टसिद्धेः शेषपदवैयर्थ्यम्। विशिष्टाभावस्यान्यत्वात्। गुणत्वानधिकरणप्रत्यक्ष[५]निवर्तकत्वं वा साध्यम्। गुणत्वेत्यादिकं इच्छादिनिवर्तकत्वेन अर्थान्तरतावारणार्थम्॥

साध्यान्तरम्॥

यद्वा—स्वस्थितिक्षणनियतस्वविनाशसामग्रीमद्भिन्नप्रत्यक्षनिवृत्तौ चरमकारणत्वं साध्यम्। इच्छादिनार्थान्तरतां व्यावर्तयितुं स्वस्थितीत्यादि। सिद्धान्ते यावत्कारणनाशं वृत्तिज्ञानस्य स्थायित्वात् स्वनिवर्तकतया अर्थान्तरवारणाय चरमकारणत्वपर्यन्तम् अत्र सर्वत्रापि पूर्वानुमानोक्त एव हेतुः। यथासंभवं तत्रोक्त एव दृष्टान्तः॥

यद्वा—चेष्टानपेक्ष[६]ज्ञानजन्यप्रत्यक्षनिवर्तकम्। चेष्टाजन्यान्यकार्यातिरिक्त प्रत्यक्षनिवर्तकं चेष्टानिमित्तजातीयातिरिक्तप्रत्यक्षनिवर्तकं अहमनुभवविषयधर्मातिरिक्तनिवर्तकं, इत्येवमादि साध्यं द्रष्टव्यम्॥

एवमविद्या महाविद्यादिभिरपि सिध्यति—[७]अयं घटः एतद्घटाज्ञानान्यान्यान्याभावान्यः, मेयत्वात्। घटवत्। एतद्घटाज्ञानाभ्यां यदन्यत्पटादि सर्वं ततोऽन्यः एतद्घटः, अज्ञानं च, तादृशभावादन्यत्वं च एतद्घटरूपाभावान्यत्व[८]स्यात्राबाधितत्वात् अज्ञानस्य भावत्वमादाय सिध्यति। घटान्यत्वमादाय पक्षातिरिक्ते साध्यसिद्धिः। [९]अज्ञानं स्वस्वेतरवृत्तित्वरहितभाववृत्तिधर्माधिकरणम्—[१०]ज्ञेयत्वात्।

---

१. जातीयातिरिक्तपदेन. २. भावे निवर्तक. ३. अत्रापि दृष्टान्तः. ४. (क) जन्यज्ञानाजन्यादेश्च. (ख) जन्यज्ञानाजन्येत्यादेश्च. ५. निवर्तकमिति वा साध्यम्. ६. ज्ञानाजन्य. ७. एतद्घटः ज्ञानं च. ८. न्यत्वस्य तत्र. ९. अवृत्तिज्ञानं स्व—तदभाववृत्तिधर्ममादाय साध्यसिद्धौ अज्ञानस्य भावत्वसिद्धिः। अज्ञानान्यत्वमादाय सर्वत्र भावेष्वभावेषु च धर्माधिकरणम्। मेयत्वात्। घटवत्। अज्ञानवदितर वृत्तित्वरहितो धर्मः अज्ञानमात्रवृत्तिर्वा. १०. मेयत्वात्.

घटवत्। अज्ञानतदितरवृत्तित्वरहितो धर्मः अज्ञानमात्रवृत्तिर्वा तदितरमात्रवृत्तिर्वा स्यात्। तत्र तदितरमात्रवृत्ति[१]भाववृत्तिधर्माधिकरणत्वसाधने बाधात् स्वमात्रवृत्ति-भाववृत्तिधर्ममादाय साध्यसिद्धौ अज्ञानस्य भावत्वसिद्धिः। अज्ञानान्यत्वमादाय सर्वत्र भावेष्वभावेषु च साध्यसिद्धिः॥

अज्ञानत्वं स्वस्वेतरवृत्तित्वरहित[२]भाववृत्तिवृत्तिधर्मवत्। मेयत्वात्। घटवत्। अज्ञानत्वेतरमात्रवृत्तिधर्मस्य अज्ञानत्वे बाधितत्वात् अज्ञानत्वमात्रवृत्तिभाववृत्तिवृत्ति धर्ममादाय साध्यपर्यवसानेन अज्ञानस्य भावत्वसिद्धिः। [३]अज्ञानत्वान्यत्वस्य च भाववृत्तिप्रमेयत्वादिवृत्तित्वात् तदाश्रयत्वात् सर्वत्रापि सपक्षे साध्यसिद्धिः। भावत्वं स्वस्वेतरवृत्तित्वानधिकरणाज्ञानवृत्तिवृत्तिधर्मवत मेयत्वात् घटवत्। भावत्वेतरमात्र-वृत्तिधर्मस्य भावत्वे बाधात् भावत्वमात्रवृत्ति अज्ञानवृत्तिवृत्तिधर्ममादाय साध्ये वाच्ये अज्ञानस्य भावत्वसिद्धिः। अज्ञानवृत्तिप्रमेयत्वादिवृत्तिभावत्वान्यत्वमादाय सपक्षे साध्यसिद्धिः। नच अप्रयोजकत्वं—घटाद्यज्ञानाभावे तद्विषयवल्मीकभ्रमानुत्पाद-प्रसङ्गात्—न जानामीति ज्ञानसामान्य[४]विरोध्यभावप्रसङ्गाच्च॥

घटध्वंसाजनकघटापरोक्षप्रमाणज्ञानं घटं न जानामीत्यनुभवविषयनिवर्तकं घटापरोक्षप्रमाणज्ञानत्वात् घटध्वंसजनकघटप्रत्यक्षवत्। नच प्रागभावेन अर्थान्तरता। तस्य स्वानिवर्त्यत्वात्। निवर्तकत्वयोग्यता ............ साध्येति ............ ? न धाराद्वितीयादिज्ञाने बाधो व्यभिचारो वा॥

यद्वा—स्वसामग्रीकाले स्वसमानाधिकरणज्ञानाविषयविषयत्वं पक्षे जन्यसवि-कल्पकाजन्यत्वं च हेतौ विशेषणमस्तु। मूलाज्ञाने तु प्रयुज्यते। ब्रह्मसाक्षात्कारः स्वसमानविषयभावरूपाज्ञाननिवर्तकः अज्ञातविषयसाक्षात्कारत्वात्। घटादि साक्षात्कारवत्। नच अप्रयोजकत्वम्। मूलाज्ञानानङ्गीकारे मोक्षशास्त्रानर्थक्य प्रसङ्गात्। दुःखध्वंसस्य अपुरुषार्थत्वात्। तत्वज्ञानं विनाऽपि प्रागभाव[५]क्षयादेवोप-पत्तेश्च। धर्माधर्मादिरूपबन्धहेतोः सत्यत्वे [६]ज्ञानानिवर्त्यत्वप्रसङ्गात्। भोगादेव कर्मणां

---

१. भाववृत्ति, इदं पदं क्वचिन्नास्ति. २. (क) भाववृत्तिवृत्ति धर्माधिकरणं मेयत्वात्. ३. अज्ञानकार्यत्वस्य. ४. विरोध्यनुभव. ५. क्षयाद्वोपपत्तेः. ६. ज्ञाननिवर्त्यत्वाप्रसङ्गात्.

क्षय इति चेन्न। तथापि ज्ञानवैयर्थ्यप्रसङ्गात्। अनन्तकर्मणां युगपद्भोगासंभवात्। क्रमेण भोगे कर्मप्रवाहस्यानुच्छेदप्रसङ्गात्। आनन्दस्यापि जन्यस्य अमृतत्वायोगात्। मुक्तौ [१]शरीरत्यागाभावेन तदुत्पत्त्य[२]संभवाच्च। नित्यानन्दाभिव्यक्तिर्भोग इत्यत्रापि अभिव्यक्तिज्ञानं तत्प्रागस्ति वा न वा। अन्त्ये तस्य कार्यत्वात् अनित्यत्वापत्तिः। पश्चाच्च शरीराद्य[३]भावात् नोत्पत्तिरिति मुक्तेरनित्यत्वप्रसङ्गः। प्रथमे च अनावृतस्य तस्य इदानीं सत्त्वे अनुपलंभो न स्यात्। आवरणस्य च स्वरूपभूते स्वधर्मे वा [४]आनन्दे वास्तवस्यासंभवात्। [५]नहि प्रकाशाप्रकाशत्वे युगपदेकस्य वस्तुनस्संभवतः। नचेदानीमानन्दस्सङ्कुचितो भवति मुक्तौ तु विस्तृत इति वाच्यम्। निरवयवे आनन्दे वास्तवसङ्कोचादेरसंभवात्। लिङ्गशरीरनिवृत्तिर्मुक्तिरिति च न साधु। [६]तस्यापुरुषार्थत्वात्। तस्मादानन्दरूपात्मरूपावारकाविद्यानिवृत्तिर्मोक्ष इत्यवश्याभ्युपगन्तव्यम्। शास्त्रार्थवत्त्वाय उपादानत्वम् अनादिज्ञाननिवर्त्यवृत्ति, कारणत्वावान्तरधर्मत्वात्। निमित्तत्ववत्। असमवायित्वस्यासिद्धेः न तत्र व्यभिचारः। अनाश्रितवृत्तिकारणविभाजकधर्मत्वादिति वा हेतुः। नच अप्रयोजकत्वं—सर्गाद्यकार्यस्य उपादानान्तरानिरूपणात् निरवयवाणूनां संयोगासंभवात्। तत्र प्रमाणाभावाच्च नोपादानत्वम्। आत्मनस्तु निरवयवस्य न परिणामः। विवर्तस्तु असत्यरूपान्तरापत्तिरूपः असत्यप्रपञ्चसमानस्वभावाविद्यां विना न संभवति। स्वतन्त्रा तु पराभिमतप्रकृतिर्नास्त्येव मानाभावादिति नोपादानम्। परतन्त्रा च साऽविद्यैव, तस्या अनादित्वात्, ज्ञाननिवर्त्यत्वाच्च। ज्ञाननिवर्त्यत्वं च तस्याः श्रुतिसिद्धम्। मृद्धट इत्यादिनाऽनुभूयमानजाताजाताभेदस्य विरोधेन वास्तवत्वासंभवात्। अनिर्वचनीयस्य तादृशाविद्यां विना असंभवाच्च॥

अत एवोपादानत्वमनादि ज्ञाननिवर्त्यवृत्ति न भवति। निमित्तत्वातिरिक्तकारणत्वावान्तरधर्मत्वात्, असमवायित्ववदिति प्रत्यनुमानम् निमित्तत्वेन सोपाधिकत्वं च परास्तम्। तर्काभावेनास्य दुर्बलत्वात्। साध्याव्यापकत्वाच्च प्रपञ्चस्य सत्यकारणकत्वे सत्यत्वापत्तेः। तद्भेदस्यापि तथात्वात्। तस्य सर्वात्मत्वाद्द्वितीय-

१. शरीराद्यभावेन. २. त्यप्रसङ्गाच्च. ३. द्यभावेन. ४. अनावृते वा. ५. नहि प्रकाशमानात् संप्रकाशत्वे. ६. तन्मात्रस्या.

त्वादिपरानेकश्रुतिबाधप्रसङ्गेन कारणान्तरस्य बाधितत्वाच्च। तस्मादनादिज्ञाननिवर्त्योपादानं नाज्ञानादन्यत् साधितमिति तत्सिद्धिः। एवं पीतघटसमानकालीनः श्यामघटः पीतघटोपादानजडोपादानकः घटत्वात्। पीतघटवत्। अत्र पीतघटेत्यादि पक्षविशेषणं पीतघटावयवैरेव कालान्तरे श्यामघटारंभसंभवादर्थान्तरतावारणाय। नचाप्रयोजकत्वम्। अन्यथाऽनुगतबुद्धेराकस्मिकत्वप्रसङ्गात्। अविद्यातिरिक्तघटत्वे प्रमाणाभावात्। एवमनादिभावत्वं ज्ञाननिवर्त्यवृत्ति अनात्मवृत्तित्वात् [१]घटत्वत्। अनादित्वं ज्ञाननिवर्त्यभाववृत्ति जडभाववृत्तित्वात् घटत्ववत्। भावत्वं अनादिज्ञाननिवर्त्यवृत्ति अनादिजडवृत्तित्वात् प्रागभावत्ववत्। इत्याद्यूह्यम्—सर्गाद्यकालीनं कार्यं जडोपादानकं, कार्यत्वात्। घटवत्, तच्च लाघवादेकं, सर्गाद्यकार्योपादानत्वात् [२]अनाद्युपादानत्वाच्च भावरूपमेवेति, अनाद्येकं भावरूपं जडोपादानं सिद्धम्। तदेवाज्ञानमिति ॥

सिद्धान्तः ॥

अत्रोच्यते—यत्तावत् जन्यसविकल्पकेत्यादि पक्षतावच्छेदकमुक्तं—तदनुपपन्नम्—तथाहि—भ्रमस्य अधिष्ठानादिसविकल्पकजन्यत्वमस्ति, न वा—आद्ये प्रथमविशेषणेनैव तद्व्यावृत्तिसिद्धेः। द्वितीये च शुक्तिगतरूपादिविषयतया तदज्ञाननिवर्तकत्वेन साध्यसत्वात् प्रमाणपद[३]वैयर्थ्यात्। प्रमाणज्ञानत्वमपि यदि तद्वति तत्प्रकारज्ञानत्वं, तदा त्वन्मते प्रमाणपदेन भ्रमव्यावृत्तिः। यद्यबाधितार्थविषयत्वं तदा त्वन्मते असिद्धिः। अधिष्ठानांशमादाय अबाधितार्थत्वं तु भ्रमप्रमयोस्तुल्यम्। अन्तःकरणवृत्त्यादिरूपत्वे अस्मन्मतेनाश्रयासिद्धिः ॥

किञ्च—चैतन्यस्य तावत् चाक्षुषत्वमसिद्धम्। वृत्तेस्तदवच्छिन्नस्य वा पक्षत्वे आश्रयासिद्धिः। वृत्तेर्जडतया अज्ञानानिवर्तकत्वेन बाधश्च ॥

ननु परेषां यच्चाक्षुषं ज्ञानं तदाश्रयताबुद्धेर्विवक्षितसाध्यव्याप्यहेतावुत्पादेन वस्तूत्पादकतया तेषामदोषतया दोषान्तरकल्पनानवकाशात् साध्यसिद्धिरविकलैव। प्रयोगस्य परार्थतया तावतैव चारितार्थ्यादिति चेन्न। तथा सति

१. घटत्ववत्. २. इदं वाक्यं कोशान्तरे नास्ति. ३. वैयर्थ्यम्.

अप्रयोजकत्वेन साध्यासिद्धेः। चैतन्यस्य नित्यत्वे हि तदावरणापेक्षा। नच विक्षेपार्थमपि तदपेक्षा। प्रपञ्चस्य मिथ्यात्वसिद्धौ तत्कारणानां मिथ्यावस्तूत्पादकतया तेषामेव दोषान्तरकल्पनानवकाशात् उभयसंप्रतिपन्नपक्षापरिग्रहे कथकसंप्रदायविरोधाच्च। अत एवान्धकारेत्यादिपक्षनिर्देशोऽपि निरस्तः॥

स्वविषयावरणेत्याद्याद्यसाध्यं चायुक्तम्। प्रागभावनिवृत्तेः प्रतियोग्यतिरेकपक्षेऽपि न तस्य प्रतियोगिसाध्यत्वं प्रागभावप्रतियोगिनोरेककालत्वविरोधादेः पूर्वमेवोक्तत्वेन प्रतियोगि [१]सामग्र्यैव निवृत्तेः। नच सामग्र्यभेदात् कार्यभेदः। प्रतियोगित्वप्रागभावत्वरूपकारणतावच्छेदकभेदेन तद्भेदाच्चरमकारणमेव निवर्तकत्वेन कल्प्यताम्। तथा च इच्छाप्रागभावस्यापि ज्ञाननिवर्त्यत्वात् न स्वनिवर्त्यपदेन तद्व्यावृत्तिः॥

द्वितीयसाध्यदूषणम्॥

प्रागभावेत्यादिद्वितीयसाध्येऽपि स्वजनकादृष्टेनार्थान्तरता। तस्यापि अलौकिकप्रत्यक्षविषयत्वात्। लौकिकप्रत्यक्षविवक्षायां अज्ञानस्य लौकिकप्रत्यक्षत्वाभावात् लौकिकप्रत्यासत्तिजन्यत्वरूपलौकिकत्वस्य नित्ये अज्ञानसाक्षिण्यभावात्। अलौकिकप्रत्यासत्यजन्यप्रत्यक्षविवक्षायां ईश्वरप्रत्यक्षविषयत्वात् स्वजनकादृष्टमादाय अर्थान्तरतैव। जन्यत्वेन तद्विशेषणे अज्ञानसाक्षिणो नित्यत्वाद् बाधः। अज्ञानाकाराविद्यावृत्तिमादाय [२]जन्यत्वोपपादने च अज्ञानावच्छेदकतयाऽ[३]दृष्टस्यैव भानात् [४]सैवार्थान्तरता। साध्यद्वयेऽपि [५]क्वचित् घटत्वनिर्विकल्पकानन्तरं पटादिवस्त्वन्तरविषयेच्छा ततो घटत्वविशिष्टसविकल्पकसंभवात् तत्रार्थान्तरता। विरोधिगुणतया घटचाक्षुषज्ञानस्य पटादिविषयेच्छानिवर्तकत्वात्। नच निर्विकल्पकानन्तरमविलम्बेन सविकल्पकस्यैव उत्पत्तेरन्तरा नेच्छादिसंभव इति वाच्यम्। तथा सति पटज्ञानानन्तरोत्पन्नघटज्ञाने आद्यहेत्वसिद्धिवारणाय सविकल्पकाजन्येत्यनेन सविकल्पकध्वंससामग्रीशून्यसमये चक्षुर्जन्यत्वमभिप्रेतमिति तव विवक्षानुपपत्तेः।

१. (क) (ख) सामग्र्यैव निवृत्तेः। स्वनिवर्त्यपदेन तद्व्यावृत्तिः [अत्र (क) (ख) योः पाठे–"नच सामग्र्यभेदात्" इत्यारभ्य ज्ञाननिवर्त्यत्वात् इत्येतत्पर्यन्तं नास्तीति फलितम्]. २. जन्यत्वोपादाने च. ३. दृष्टस्यापि. ४. रूपान्तरता. ५. कथंचित्.

तत्र घटत्वनिर्विकल्पकानन्तरं पटाद्यर्थान्तरज्ञानं अनन्तरं घटसविकल्पकमिति वक्तव्यत्वात्। यदि च [१]घटज्ञानानन्तरं पटनिर्विकल्पकं अनन्तरं घटसविकल्पकं तत्रेति स्यात्। तदा पटसविकल्पकध्वंसोत्पत्तिसमयोत्पत्तिकतया घटसविकल्पकस्य तत्समयानाधारस्थितिकत्वस्य सत्त्वेन भागासिद्ध्यभावात् तस्य पक्षबहिर्भावार्थं पक्षविवक्षानुपपत्तेः। नच स्मरणाद्यात्मकमेव तत्र घटत्वविशेषणज्ञानं तदनन्तरं पटज्ञानं तदनन्तरं घटसविकल्पकमिति वाच्यम्। जन्यसविकल्पकाजन्येत्यनेनैव पक्ष[२]बहिर्भावे सिद्धे विवक्षानुपपत्तितादवस्थ्यात्। एतेन तृतीयसाध्यमपि निरस्तम्॥

चतुर्थसाध्यमप्ययुक्तम् — [३]स्वविषयसंशयजननयोग्यतातीतकालीनसाधारणधर्मदर्शनमादायार्थान्तरत्वात् पक्षीभूतज्ञानसत्ताक्षणे तद्ध्वंसस्य सत्वात्। स्वसत्ताक्षणनियतध्वंसप्रतियोगीत्यत्र नियतपदं च व्यर्थम्। ननु—स्वसत्ताक्षणवर्तिध्वंस—प्रतियोगीत्युक्ते क्वचित् स्वसत्ताक्षणे स्वजनकमनस्संयोगध्वंसस्य संभवादर्थान्तरतादवस्थ्यमिति चेत्—नियतत्वविशेषणेऽपि [४]तत्तादवस्थ्यात्—तस्य ध्वंसविशेषस्य पक्षीभूततज्ज्ञानव्यक्तिसत्ताक्षणनियतत्वात् उद्देश्यसिद्धये विशेषणानीत्यपि पक्षो न युक्तः। स्वविषयावारकनिवर्तकत्वादिति हेत्वसिद्धिं परिहरता त्वया स्वविषयावारकत्वादि-[५]कस्य सिद्धत्वेन भावत्वमात्रे विप्रतिपत्त्या अनुमानप्रवृत्तिरित्युक्तत्वेन स्वसमानविषयकत्वादीनां सिद्धत्वेन अनुद्देष्टव्यत्वात्। ननु भावत्वेन सहासिद्धत्वात् स्वविषयावरणत्वादीनामुद्देष्टव्यतेति चेत्—तर्हि प्रमेयत्वादीनामपि भावत्वादिनिरुक्तधर्मैस्सहासिद्धत्वात् तेषामपि साधनप्रसङ्गात्। तैर्विनाऽप्यज्ञानसिद्धेर्न तेषामुद्देश्यतेति चेत्—तर्हि प्रागभावव्यतिरिक्त स्वविषयावरणपूर्वकमित्येतावतैव स्वेष्टसिद्धेः शेषवैयर्थ्यात्। नच तमोव्यावृत्त्यर्थत्वान्न व्यर्थतेति वाच्यम्। स्वनिवर्त्यस्वदेशगतेत्येतयोरन्यतरेणैव तद्व्यावृत्तिसिद्धावन्यतरवैयर्थ्यात्। आद्यहेतोश्चतुर्थसाध्ये इच्छादिव्यवहितघटज्ञानविनाशकालोत्पन्नतद्धटविषयज्ञाने व्यभिचारः। तस्याज्ञानानिवर्तकत्वेन पक्षबहिर्भावस्यावश्यकत्वात्॥

---

१. पटज्ञानानन्तरं घटनिर्विकल्पकमनन्तरं—ध्वंसोत्पत्तिकतया. २. बहिर्भावासिद्धेः. ३. स्वसमानविषयसंशय. ४. तद्दोषतादवस्थ्यात्. ५. कं सिद्धमेव भावत्वमात्रविप्रति.

८

द्वितीयहेतुदूषणम्[*]॥

द्वितीयहेतोरपि उक्तपक्षतावच्छेदकावच्छिन्नज्ञानस्य द्वितीयालोकेनापि संभवात् द्वितीयालोके व्यभिचारः। प्रथमालोकमात्रजन्यत्वं पक्षविशेषणमिति चेत्। जालसूर्यमरीचिकामात्रजन्यनिरुक्तपक्षतावच्छेदकाक्रान्तत्रसरेणुप्रत्यक्षकालीने तन्मरीचिकानन्तरभाविनि प्रदीपालोके व्यभिचारात्। नच अन्धकारनिवृत्तीत्यादि पक्षाभिप्रायेणायं हेतुः, तत्र च एतत्पदेन अन्धकारनिवृत्त्यव्यवहितोत्तरकालीनज्ञानस्यैव परामर्शात्, [१]उत्पत्तिसमये तद्विषयसंबन्धित्वाभावात् न द्वितीयालोके व्यभिचार इति वाच्यम्। एवमपि यत्र प्रथमालोकद्वितीयक्षणे अन्धकारनिवृत्तिद्वितीयालोकयोरुत्पत्तिः, तृतीयक्षणे घटज्ञानं, तत्र द्वितीयालोके व्यभिचारात्॥

किञ्च — एतज्ज्ञानोत्पत्तिसमये एतद्विषयसंबन्धिपरकीयद्वितीयादिज्ञाने व्यभिचारः॥

यदत्रोक्तम्—तदीयप्रथमज्ञानस्यापि पक्षत्वेन तदुत्पत्तिकाले परकीयद्वितीयादिज्ञानस्य तद्विषयसंबन्धित्वाभावान्न व्यभिचार इति—तत्तुच्छम्। परकीयप्रथमज्ञानोत्पत्तिसमये एतद्विषयसंबन्धित्वाभावेऽप्येतदीयप्रथमज्ञानोत्पत्तिसमये [२]एतद्विषयसंबन्धित्वस्य सत्त्वेन तत्र हेतुसत्वात्। जन्यसविकल्पकाजन्यचाक्षुष घटज्ञानस्य पक्षीकृतस्यैव एतत्पदेन अभिधानात्। यदि च पक्षीकृतयत्किञ्चिज्ज्ञानोत्पत्तिसमये तद्विषयसंबन्धित्वेऽपि तादृशसर्वज्ञानोत्पत्तिसमये तद्विषयसंबन्धित्वाभावेन हेत्वभाव उ(च्यते)च्येत। तर्हि स्वरूपासिद्धिरेव। न हि कस्यापि ज्ञानस्य तादृशसर्वज्ञानोत्पत्तिसमये तद्विषयसंबन्धित्वमस्ति॥

अपि च—एतद्विषयसंबन्धित्वं किमेतद्विषयविषयकत्वं एतद्विषयसंबन्धमात्रं वा—नाद्यः—साधनवैकल्यात्। [३]आलोकस्य निर्विषयत्वात्। द्वितीये तु अन्धकाराभावे व्यभिचारः॥

किञ्च—एतज्ज्ञानसमानकालीनैतत्समानविषयपरकीयानु[४]मितिविशेषे व्यभिचारः। ननु—अन्धकारस्थितिसमयस्थित्यभावप्रयोजकरूपवत्त्वं विवक्षितमित्युक्त-

---

१. तदुत्पत्ति. २. एतद्द्वितीयसंबन्धादित्वस्य. ३. तथोक्तस्य. ४. मानमिति.

मिति चेन्न—प्रयोजकत्वं [१]हि नाव्याप्यत्वादन्यत् संभवति। तच्चोक्तानुमितिविशेषेऽपि चाक्षुषज्ञानसमकालोत्पत्ति[२]मत्त्वरूपमस्त्येव॥

किञ्च—एतद्विषयदेशीयान्धकारस्थितिसमयस्थित्यभावप्रयोजकरूपवत्त्वमात्रं विवक्षितम्। एतद्विषयदेशे एतद्विषयदेशीयान्धकारस्थितिसमयस्थित्यभावप्रयोजकरूपवत्त्वं वा। नाद्यः—एतद्विषयदेशीयान्धकारस्थितिसमये देशान्तरे आलोकस्य सत्त्वेन आलोकस्य तत्समयास्थितिकत्वप्रयोजकत्वाभावात्॥

न द्वितीयः—ज्ञानस्य एतज्ज्ञानविषयदेशे घटादावसत्त्वेन ज्ञानत्वस्यैव तत्प्रयोजकतया पूर्वोक्तपरकीयानुमितेरपि तादृशत्वेन व्यभि[३]चारानिस्तारात्॥

किञ्च—जन्यसविकल्पकाजन्यचाक्षुषघटज्ञानविषयदेशीयान्धकारस्थितिसमयास्थितिकमप्रसिद्धम्। एतच्छब्देन पक्षीकृतज्ञानाभिधानात्॥

तृतीय हेतुदूषणम्॥

तृतीय[४]हेतोरपि स्वरूपासिद्धिः॥

[५]नच अज्ञाने भावत्वविप्रतिपत्तावपि ज्ञानेनाज्ञानं निवृत्तमिति अनुभवात् अज्ञानदशायां तद्विषयसंशयदर्शनाच्च ज्ञानस्य अज्ञाननिवर्तकत्वमज्ञानस्यावरणत्वं च सिद्धमिति वाच्यम्। ज्ञानेनाज्ञानं नष्टमित्यनुभवस्यैवासिद्धेः। [६]इदानीमज्ञानं नष्टं ज्ञानं जातमित्येव ह्यनुभूयते। न तु तयोस्साध्यसाधनभावानुभवः। पक्षीभूत ज्ञानजनकद्वितीयालोके व्यभिचारश्च। ज्ञानप्रागभावस्य नास्ति न प्रकाशत इति व्यवहारप्रयोजकत्वेन [७]तदावारकत्वात्। द्वितीयालोकस्य च तन्निवर्तकत्वात्। तस्य च प्रागभावस्यालोकसामानधिकरण्याभावेनालोके साध्याभावात्। एतेन तुरीय हेतुरपि निरस्तः। नच तस्य प्रागभावसमानकालीनत्वान्न व्यभिचार इति वाच्यम्। तथा सति दृष्टान्तस्य साधनविकलत्वापत्तिः॥

किञ्च — पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरनुमानफलत्वे द्वितीयादिज्ञाने बाधवारणाय पक्षविशेषणमनर्थकम्। पक्षतावच्छेदकावच्छेदेन

---

१. (क) अप्रयोजकत्वं न व्याप्यत्वात्। तच्चोक्तानुमानमिति विशेषे. २. कत्वरूप. ३. चारानिरासात्. ४. हेतुरपि स्वरूपासिद्धः. ५. नचाज्ञाना भावत्व. ६. इदानीं ज्ञानं नष्टं ज्ञानं जात. ७. तदावारकत्वात् तस्य च प्रागभाव.

साध्यसिद्धेरनुमानफलत्वे इच्छाप्रागभावादिनिवर्तकज्ञानेषु अंशतः सिद्धसाधन-वारणार्थं आद्यसाध्यप्रभृतिषु स्वनिवर्त्येत्यादिविशेषणमनर्थकम्। इदं च यथा-संभवं उत्तरानुमानेष्वपि दूषणं द्रष्टव्यम् ॥

किञ्च—सकृज्ज्ञानेऽर्थे पश्चात् स्वरूपावारकाज्ञानाभावस्य त्वयोक्तत्वात् तादृशस्वरूपविषये पक्षीभूतज्ञाने बाधः। इदमपि दूषणमनुमानान्तरेऽपि द्रष्टव्यम्। तस्मात् साध्वनुगृहीतमाचार्यैः अनुमानजीर्णकन्थेति ॥

आद्यतर्कदूषणम् ॥

अप्रयोजकाश्च हेतवः—तथाहि—न तावदाद्यस्तर्कः। देवदत्तीययावज्ज्ञान प्रतियोगिकविषयविषयिभावसंसर्गावच्छिन्नाभावकूटो वा, तत्संसर्गावच्छिन्नतत्प्रति-योगिकसामान्याभावो वा, अज्ञातत्वमस्तु—द्वितीयादिज्ञानदशायां च इदमुभयमपि अज्ञातत्वं नास्त्येव। नच प्रमेयत्वेन ज्ञाते अज्ञातताभावप्रसङ्गः—

अहमज्ञ इति प्रतीतेर्विषयसमर्थनेनैव तन्निरासात्। यादृशज्ञानसत्वा ज्ज्ञात इति व्यवहारः, तादृशज्ञानविषयत्वाभावादेव ह्यज्ञातत्वव्यवहारो युक्तः। ततश्च त्वदुक्तन्यायेन प्रमेयत्वादिना ज्ञानेऽपि मया घटो ज्ञात इति व्यवहाराभावेन ज्ञानविशेषस्यैव तत्प्रयोजकत्वेन तदभाव एवाज्ञातत्वव्यवहारप्रयोजकः॥

नापि द्वितीयस्तर्कः—अप्रकाशशब्दस्य वाक्यतया लोके व्युत्पत्त्यनुसारेण पदद्वयार्थसंसर्गपरतया ज्ञानाभावपरत्वस्य युक्तत्वेन लाघवानवतारात्। प्रत्युत क्लृप्त-त्वेन अभावपरत्व एव लाघवात् ॥

किञ्च—[१]अभावस्य तु [२]गौरवं न तुलाग्राह्यम्। किन्तु नियमतः प्रतियो-गिनिरूपणाधीननिरूपणत्वेनैव। तच्च विरोधितया भासमाने भावरूपाज्ञानेऽपि तुल्यमिति कुतो लाघवम् ॥

किञ्च—अज्ञानशब्दस्य ज्ञानजन्यनिवृत्तिप्रतियोगित्वात्मकविरोधित्व परत्वेन निवृत्तिरूपाभावविशेषस्य जन्यत्वादेश्च प्रवेशेन अतिगौरवम् ॥

---

१. भावस्य च गौरवम्. २. लाघवम्.

तृतीयतर्कदूषणम् ॥

नापि तृतीयस्तर्कः—हेत्वसिद्धेरुक्तत्वेन इष्टप्रसङ्गत्वात् । त्वदुक्तरीत्या प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेति मते तन्निवर्तकत्वसंभवाच्च । मतान्तरे त्वन्यत्र प्रागभावनिवृत्तेः प्रतियोगिरूपत्वेऽपि अनेनानुमानेन ज्ञानप्रागभावस्य प्रतियोग्यति[१]रिक्तनिवृत्तिमादाय साध्यसिद्धौ भावरूपाज्ञानं विना हेतूच्छित्तेरभावात् । चित्सुखानुमानमप्ययुक्तम् । प्रागभावनिवृत्तेः प्रतियोग्यतिरिक्तत्वेऽपि प्रतियोगिसाध्यता नास्ति, किन्तु प्रतियोगिसामग्रीसाध्यत्वमेव इत्युक्तत्वेन साध्ये भावातिरिक्तपदवैयर्थ्यात् । इच्छाप्रागभावादिभिरर्थान्तरत्वाच्च । प्रमाव्यक्तिविशेषस्यैव पक्षत्वेन साध्येऽपि प्रमापदस्य तत्परत्वेन दृष्टान्ते साध्यसिद्ध्यर्थदेवदत्तपदवैयर्थ्याच्च । यदुक्तमधिष्ठानात्मकस्वप्रागभावातिरिक्तान्तःकरणवृत्तिप्रागभावेन अर्थान्तरतावारणार्थं तदिति । तन्न—अधिष्ठानस्य अभावत्वे मानाभावात् । वृत्तिमत्त्वभागमात्रेण अधिष्ठान व्युदासे सिद्धे देवदत्तगतपदवैयर्थ्याच्च ॥

अथवा—'जन्येत्यादि' इत्यपि न । धाराद्वितीयादिज्ञाने व्यभिचारात् । प्रमापदेन पूर्ववत् पक्षीभूतप्रमाविवक्षायां देवदत्तपदवैयर्थ्यात् । नच देवदत्तपदरक्षार्थं साध्ये प्रमापदेन जन्यसविकल्पकाजन्यचाक्षुषघटप्रमांशमात्रस्य परामर्श इति वाच्यम् । तथा सति प्रमापदेन जन्यसविकल्पकाजन्यज्ञानमात्रस्य परामर्शे द्वितीयादिज्ञानस्य [२]दृष्टान्तत्वसंभवाद्देवदत्तघटचाक्षुषपदानि साध्ये व्यर्थानि । अप्रयोजकत्वाच्च । त्वदभिमततर्काभासानां निरस्तत्वाच्च ॥

यानि च प्राचीननिजगुरुजनमचतुरम्मन्यमानेन आहोपुरुषिकाभारमन्थर चेतसा नवीनेन चिरं विचिन्त्य परिहृतनिखिलावद्यानि स्वाभिलषितसाधनक्षमाणीति गाढं विश्वस्तानि कानि चिदनुमानानि [३]ग्रथितानि तान्यपि । या चेयमनुमानजीर्ण कन्थेत्याचार्यवचने जीर्णपदसार्थकत्वायैव केवलं ........ [४]प्रकल्पन्ते ॥

तथाहि—तत्र तावत् प्रथमानुमाने पक्षे प्रत्यक्षपदं व्यर्थम् । संस्काराजनकस्य [५]पक्षत्वसंभवात् । संस्काराजनकानुभवो[६]नास्तीति चेन्न । [७]अनुभूत

१. रिक्तत्वनिवृत्ति. २. दृष्टान्तासंभवात्. ३. तान्यपि इति पदं नास्ति. ४. केवलं प्रकल्प्यन्ते. ५. पक्षत्वासम्भवात् संस्कारजनकानु. ६. नसंभवतीति. ७. अविस्मृततृणादि.

तृणादिविषयकस्मृत्यभावेऽपि तद्विषयकसंस्कारोऽस्तीत्यत्र मानाभावात् । तृणादि [1]संबन्धिदर्शनेऽपि तृणादेरस्मरणमर्थक्षुद्रत्वादिप्रयुक्तं वक्तव्यम् । तस्य च न स्मृति प्रतिबन्धकत्वम् । अतीतेऽपि तादृशार्थे स्मृतिदर्शनात् । तस्मात् संस्कारे प्रतिबन्ध-कत्वं वाच्यम् । नचैवमपि अतिक्षुद्रविषयकानुभवेन कथं स्मरणं, तत्र संस्कारोत्पत्ति-प्रतिबन्धादिति वाच्यम्—महनीयादिविषयानुभवसमानकालीनानुभवे क्षुद्रविषयकत्व-स्यैव प्रतिबन्धकत्वात् । साध्ये च संस्कारप्रागभावनिवर्तकत्वेन अर्थान्तरता । लौकिकप्रत्यक्षविवक्षायामज्ञानस्य लौकिकप्रत्यक्षत्वाभावाद्बाधः । अलौकिकप्रत्यासत्त्य जन्यप्रत्यक्षविवक्षायां ईश्वरज्ञानमादायार्थान्तरतैव । अलौकिकप्रत्यासत्त्य[2]जन्य जन्यप्रत्यक्षविवक्षायामज्ञानसाक्षिणो नित्यत्वात् बाधः । अज्ञानाकाराविद्यावृत्तिमदाद्य जन्यत्वोपपादने च अज्ञानावच्छेदकतया संस्कारप्रागभावस्यापि भानात् पुनस्सैवा-र्थान्तरता । हेतौ च घटपटोभयसन्निकर्षेऽपि यत्र [3]पटज्ञानमन्धकारावृतत्वात् न जातं घटज्ञानधारा च जायते तत्र मध्ये तमोनिवृत्तौ धारान्तःपात्येव यत् घटज्ञानं पटनिर्वि कल्पात्मकमपि जायते तत्र व्यभिचारः । नच तन्निवृत्तेरपि प्रागभावनिवृत्तित्वेन ज्ञानातिरिक्तप्रागभावमादाय साध्यसत्वात् न व्यभिचार इति वाच्यम् । तथा सति साध्ये स्वप्रागभावमादायार्थान्तरतापत्तेः ॥

किञ्च—जन्यज्ञानमात्रस्य शरीरजन्यत्वात् परोक्षज्ञाने व्यभिचारः । स्व-विषयजन्यत्वविवक्षायामपि शरीरविषयकपरोक्षज्ञाने व्यभिचारः। विषयत्वेन तज्जन्य-त्वविवक्षायां बाह्यपदं व्यर्थम् । शब्दस्यैवाहमाकारवृत्तौ कारणतया विषयसन्नि-कर्षाजन्यत्वात ॥

द्वितीयानुमानेऽपि प्रथमसाध्ये प्रत्यक्षविशेषणे दूषणं दत्तमेव ॥

किञ्च — स्वसमानाधिकरणपदमत्र व्यर्थम् । नच उपादानप्रत्यक्षस्य कार्यहेतुत्वानभ्युपगमपक्षे तस्य दृष्टान्तत्वासंभवात् , ध्वंसजनकप्रतियोगिप्रत्यक्षे दृष्टान्ते वाच्ये तत्र साध्यलाभार्थं [4]समानाधिकरणपदमिति वाच्यम् । इच्छाप्राग-

१. सम्बन्ध. २. जन्यप्र. ३. घटज्ञान. ४. सामानाधिकरण्य.

भाव[१] निवर्तकेष्टज्ञानद्वित्वजनकापेक्षाबुद्ध्यनुमितिजनकपरामर्शादेर्बाह्यविषयप्रत्यक्षमात्रस्य यत्किञ्चित्कार्यजनकस्य दृष्टान्तत्वसंभवात्। यत्र व्याप्तिं स्मरत एव पर्वतसमीपं गतवतः पर्वतत्वांशे निर्विकल्पकं धूमविशिष्टज्ञानम्, अनन्तरं परामर्शः—तत्र पर्वतत्ववैशिष्ट्यस्य पूर्वज्ञानाविषयत्वेन [२]स्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकत्वघटितहेतोस्सत्वात्॥

द्वितीयसाध्यमपि प्रत्यक्षविशेषणदूषणेन स्वनिवृत्तिरूपस्वप्रागभावनिवृत्तिजनकतया प्रतियोग्यतिरिक्तप्रागभावनिवृत्ति[३]सिद्धावर्थान्तरत्वेन च दूषितम्॥

अत एवोत्तराण्यपि साध्यानि निरस्तानि। चेष्टानपेक्षेत्यादिसाध्यद्वयेऽपि अजन्यप्रत्यक्षनिवर्तकम्, कार्यातिरिक्तप्रत्यक्षनिवर्तकमित्येतावता साध्यसिद्धौ शेषवैयर्थ्यम्। नचैवं सति ध्वंसजनकप्रतियोगिप्रत्यक्षस्य कथं दृष्टान्तता घटत इति वाच्यम्। उपादानप्रत्यक्षस्य [४]दृष्टान्तत्वासंभवात्। तस्योपादेयकारणत्वानभ्युपगमपक्षेऽपि अनुमित्यादिप्रागभावनिवर्तकपरामर्शादेः पूर्वोक्तन्यायेन दृष्टान्तत्वसंभवात्। चेष्टासापेक्षविशेषणज्ञानजन्ये चेष्टाप्रत्यक्षे स्वनिवर्तकत्वेनार्थान्तरता च। चेष्टाप्रत्यक्षस्य चेष्टाजन्यतया चेष्टाजन्यान्यकार्यातिरिक्ततया तस्य स्वनिवर्तकत्वेन द्वितीयसाध्येऽप्यर्थान्तरता। चेष्टानिमित्तेत्यादिसाध्यमप्ययुक्तम्। यथाकथञ्चिज्जातीयत्वविवक्षायां घटादेरपि तादृशतया साध्यवैकल्यात् [५]कार्यतावच्छेदकरूपेण साजात्यविवक्षायां द्वेषस्यापि तज्जातीयातिरिक्ततया तन्निवर्तकत्वेन अर्थान्तरत्वात्। शत्रुहननाद्यर्थचेष्टाया अपि समानविषयकेच्छैव हेतुः न तु द्वेषः। तस्य [६]प्रवृत्त्यजनकत्वेन चेष्टायामजनकत्वात्। निर्विकल्पकस्य चेष्टानिमित्तजातीयातिरिक्ततया तन्निवर्तकत्वेनार्थान्तरत्वाच्च। इष्टतावच्छेदक[७]प्रकारकज्ञानस्यैव इच्छाहेतुत्वात्। नच चेष्टानिमित्तवृत्तिबाह्यावृत्तिजातिमत्त्वं विवक्षितम्। अतो न साध्यवैकल्यमिति वाच्यम्। द्वेषनिवर्तकत्वेनार्थान्तरस्यापरिहारात्। नच जातिरहित प्रागभावनिवर्तकमृदादिज्ञानमेव दृष्टान्त इति वाच्यम्। चेष्टानिमित्तेत्यस्य वैयर्थ्यात्।

---

१. निवर्तकेषु अज्ञानद्वित्वनिवर्तकापेक्षाबुद्ध्याऽनुमिति. २. ससामग्री. ३. साध्या वा. ४. दृष्टान्तत्वसम्भवात् तस्योपादेयकरणत्वाभ्युपगम. ५. कारणतावच्छेदक. ६. प्रत्यक्ष. ७. ज्ञानस्यैव इच्छा.

अहमनुभवेत्यादिसाध्यमप्ययुक्तम्। आत्मनोऽप्यहमनुभवविषयतया अविद्यायास्तद्धर्मत्वेन बाधात्। शुक्त्याद्यज्ञानं शुक्त्याद्यवच्छिन्नचैतन्यगतमिति पक्षे शरीरप्रत्यक्षे साध्ये बाधो व्यभिचारो वा। शरीरावच्छिन्नस्यैव अन्तःकरणावच्छिन्नतया अहमनुभवविषयत्वात्। अहमनुभवविषयतयाऽन्तःकरणधर्मता तथापि नास्तीति चेत्-तत् किमहमनुभवविषय[१]यावद्धर्मत्वं विवक्षितम्। तथा सति इच्छादेरप्यहमनुभवविषयदेहधर्मत्वाभावादर्थान्तरता स्थिरैव। महाविद्याश्च अप्रयोजकतया निरस्ताः। नच भावरूपाज्ञानानभ्युपगमे घटादौ वल्मीकभ्रमानुपपत्तिः। दुष्टेन्द्रियाधिष्ठानसन्निकर्षादेवोपपत्तेः। यथा चैतत्तथा अनिर्वचनीयख्यातिभङ्गे च वक्ष्यते। न च न जानामीत्यननुभवप्रसङ्गो बाधकस्तर्कः। यथा अस्याः प्रतीते[२]रनुपपत्तिः तथा प्रागुपपादितत्वात्। यच्च घटध्वंसाजनकेत्याद्यनुमानान्तरं तत्र घटध्वंसाजनकेति पक्षविशेषणं व्यर्थम्। तद्धि विषयनिवर्तकतया अर्थान्तरतापरिहाराय—नचैतद्विशेषणे दत्तेऽप्यर्थान्तरतापरिहारः। निवर्तकत्वयोग्यताया एव साध्यतया तस्याः फलानुपहितेऽपि सत्त्वेन अर्थान्तरतादवस्थ्यात्। घटध्वंसाजनकेत्यत्र स्वरूपायोग्यत्वविवक्षायामाश्रयासिद्धेः। प्रतियोगिप्रत्यक्षत्वेन ध्वंसहेतुत्वात्। घटं न जानामीत्यादि साध्यमप्यनुपपन्नम्। योग्यतायाः साध्यत्वे विषयनिवर्तकत्वेनार्थान्तरत्वात्। फलोपधानस्य साध्यत्वे धारावाहिकद्वितीयादिप्रमायां बाधाद् व्यभिचाराद्वा स्वनिवर्तकतया अर्थान्तरत्वाच्च। न जानामीति ज्ञानविरोधित्वेन प्रतीयत इति त्वयोक्तत्वेन विरोधनिरूपकज्ञानस्य विषयत्वात्। यदि च न जानामीत्यत्र विरोधनिरूपकं चैतन्यमेव न त्वपरोक्षज्ञानमित्युच्येत तदा बाध एव। अपरोक्षप्रमाणज्ञानस्य पक्षीकृतत्वात्। तस्य चाज्ञान[३]विरोधित्वाभावात्। घटापरोक्षेत्यादिहेतुरप्यनुपपन्नः। इदानीं प्रागभावस्य घटं न जानामीत्यनुभवविषयत्वसन्देहात् पटज्ञानस्य विरोधिगुणतया घटज्ञानप्रागभावध्वंसात्मकघटज्ञानध्वंसजनकतया सन्दिग्धव्यभिचारकत्वेन तद्वारकस्य घटविशेषणस्य सन्दिग्धव्यर्थविशेषणत्वात् पटविशिष्टघटप्रत्यक्षे ज्ञानानुभवविषयतया सन्दिह्यमानघटज्ञानप्रागभावध्वंसात्मके पटज्ञानस्य विशेषणज्ञानतया कारणत्वेन सन्दिग्धव्यर्थविशेषणत्वाच्च पटज्ञानस्य विरोधिगुणतया [४]पटं न जानामीति [५]प्रतीतिविषयघटज्ञाननिवर्तकत्वात्

---

१. यथावद्धर्मत्वम्. २. रुपपत्तिः. ३. विरोधित्वतन्नयात्. ४. घटम्. ५. अनुभवविषय.

साध्यसत्त्वेन व्यभिचाराभावाच्च। अपरोक्षविशेषणं च सन्दिग्धव्यर्थविशेषणमेव। परोक्षघटज्ञानस्यापि घटविशिष्टप्रत्यक्षे घटं न जानामीत्यनुभवविषयतया सन्दिह्यमानघटज्ञानप्रागभावनिवृत्त्यात्मके विशेषणज्ञानतया जनकत्वात्। यच्च धारावाहिकद्वितीयादिज्ञानव्यावृत्त्यर्थं यद्वा स्वसामग्रीत्यादिना पक्षविशेषणं—तदप्ययुक्तम्। योग्यतायास्साध्यत्वे उक्तविशेषणवैयर्थ्यात्। फलोपधानस्य साध्यत्वेऽपि न जानामीत्यनुभवविषयस्व[1] निवर्त्यकत्वेनार्थान्तरत्वात ॥

किञ्च—यत्र प्रथमं त्वचा घटज्ञानं अनन्तरं चक्षुषा रूपादिविशिष्टं तद्विषयकं तत्रोक्तसाध्याभावात् बाधः। हेतौ च द्वितीयादिज्ञानव्यावृत्त्यर्थं जन्यसविकल्पेत्यादि यद्विशेषणं तदप्यसत्—तदा ह्यपरोक्षपदं व्यर्थमेव। परोक्षज्ञानमात्रस्य जन्यसविकल्पकजन्यत्वात्। अनवधारणात्मकघटापरोक्षे व्यभिचारश्च। प्रमाणज्ञानत्वमपि यद्यसाधितार्थज्ञानत्वं तदा त्वन्मते असिद्धिः। निर्विकल्पके व्यभिचारश्च। यद्यन्तःकरणवृत्त्यवच्छिन्नज्ञानं तदा अस्मन्मते असिद्धिरिति। अप्रयोजकश्चायं हेतुः। न च ज्ञानेन ज्ञानं निवृत्तमित्यनुभवस्याप्रामाण्यप्रसङ्गो बाधकः। तादृशानुभवासिद्धेरुक्तत्वात् ॥

यदपि मूलाज्ञानानुमानं ब्रह्मसाक्षात्कार इत्यादि। तदपि न सम्यक्। प्राथमिकब्रह्मसाक्षात्कारे बाधात्। घटादिद्वितीयसंशये त्वदभिमतैकैककोटिकानवधारणे च व्यभिचारः। मूलाज्ञानानुमानानां दूषितत्वेन दृष्टान्ते साध्यवैकल्याच्च ॥

किञ्च—अज्ञानपदेन भावरूपाज्ञानविषयत्वविवक्षायामसिद्धिः। ज्ञानाभावविवक्षायामपि तथा। ब्रह्मणस्सर्वदा प्रकाशमानत्वात्। ज्ञानाविषयसाक्षात्कारत्वविवक्षायामपि तथैव। श्रवणदशायामेव ज्ञातत्वात्। तत्पूर्वक्षणे ज्ञातत्वाभावविवक्षायां सकृज्ज्ञाते स्वरूपे अज्ञानाभावस्य त्वयोक्ततया घटज्ञानानन्तरं द्वित्रक्षणव्यवहितघटज्ञाने व्यभिचारः। अप्रयोजकत्वाच्च। नच मूलाज्ञानानङ्गीकारे मोक्षशास्त्रानर्थक्यप्रसङ्गः। आनन्दात्मावार[2]काविद्यानिवृत्त्यजन्यपुरुषार्थस्यासंभवा-

---

१. निवर्तक. २. आवारकाविद्यानिवृत्त्यन्यस्य पुरुषार्थस्य.

दिति वाच्यम्। दुःखध्वंसस्यैव मोक्षत्वोपपत्तेः। नच तस्यापुरुषार्थत्वम्। स्वतः पुरुषार्थतया सुखवद्दुःखाभावस्यापि लोकसिद्धत्वात्॥

यदुक्तं तत्त्वज्ञानं विनाऽपि प्रागभावक्षयादेव मोक्षसिद्धेः शास्त्रानर्थक्यमिति। तन्न—तत्त्वज्ञानं विनाऽपि कस्यचिन्मोक्षसंभवेऽपि अविलंबेन मोक्षेच्छोः समाहृत्यभोगेन मोक्षासिद्धेः तत्साधनीभूतयोगजधर्मसिद्ध्यर्थं तत्त्वज्ञाने प्रवृत्युपपत्तेर्मोक्षशास्त्रस्य तं प्रति सार्थकत्वात्। नच अनन्तकर्मणां युगपद्भोगासंभवः। परिमितकर्मज्ञानवतः तत्संभवात्। वरीयान् खलु स एव त्वत्तोऽपि यः कश्चिदपि शास्त्रसार्थक्यमङ्गीकरोति। त्वन्मते तु क्वचिदपि न मोक्षशास्त्रसार्थक्यम्। एतच्चाविद्यानिवृत्तिभङ्गे द्रष्टव्यम्। बन्धहेतुभूतधर्माधर्मादिनिवृत्तिर्वा मोक्षोऽस्तु। नच तस्य सत्यत्वे ज्ञानानिवर्त्यत्वप्रसङ्गः। सत्यस्यापि विषादेः गरुडादिध्याननिवर्त्यत्वात्। नच ध्यानं न ज्ञानं—[1]ज्ञानत्वेन अनुभवसिद्धत्वात्। नच सत्यस्याधिष्ठानज्ञाननिवर्त्यत्वानुपपत्तिः। अधिष्ठानज्ञाननिवर्त्यत्वाभावस्य इष्टत्वात्। अनधिष्ठानभूतब्रह्मज्ञाननिवर्त्यत्वात्। आनन्द एव वा मोक्षोऽस्तु। नच जन्यत्वे तस्यामृतत्वानुपपत्तिः। अजन्यभावत्वे अविद्याया विनाशवत् जन्यभावत्वेऽपि तस्याविनाशित्वोपपत्तेः। कथमन्यथा प्रागभाववत्साध्यत्वेन त्वदभिमतस्य मोक्षस्याविनाशित्वम्। प्रवाहरूपेण वा अमृतत्वमस्तु। नच शरीराद्यभावात् मुक्तावानन्दोत्पत्त्यसंभवः। चन्दनसंयोगादिजन्यसुखस्य शरीरसापेक्षत्वेऽपि शरीरनिवृत्तिसापेक्षस्य तदपेक्षत्वासंभवात्। नहि किञ्चिज्ज्ञानं घटसन्निधानसापेक्षमिति घटाभावज्ञानमपि तथा। नित्यानन्दाभिव्यक्तिरेव वा मोक्षोऽस्तु। न चानन्दाभिव्यक्तेर्ज्ञानरूपायाः कार्यत्वे अनित्यत्वापत्तिः—शरीराद्यभावात प्रवाहस्यापि अनुपपत्तिरिति वाच्यम्। पूर्वोक्तरीत्या सुखवदेव तदुपपत्तेः। नित्यभूतैव वाऽभिव्यक्तिरस्तु; ननु—उपलब्धेरनित्यत्वे इदानीमनुपलंभो न स्यादिति चेत्। किमनुपलंभशब्देन ज्ञानाभावो विवक्षितः, उत भावरूपाज्ञानं, उत अनुपलंभोपलब्धिः। नाद्यौ—इष्टापत्तेः। न तृतीयः। अनुपलंभभ्रमसंभवात्। नच दोषाभावः। कर्मण एव दोषत्वात्। नचानन्दोपलंभयोर्व्यवहारप्रसङ्गः। त्वन्मतेऽपि तुल्यत्वात्। न चावरणादव्यवहार इति वाच्यम्। तस्य सत्यत्वे अद्वैतहानेः। मिथ्यात्वे व्यव-

---

१. तस्य ज्ञानत्वेन.

हारस्य दुर्वारत्वात्। गुञ्जापुञ्जभ्रमेऽपि वह्नेर्दाहकत्वात्। नचोपलंभस्यापि स्वप्रकाशतया तस्मिन् भासमाने अनुपलंभभ्रमासंभवः। त्वन्मतवदेव नित्यज्ञानस्य भ्रमाविरोधित्वकल्पनोपपत्तेः ॥

उपादानपक्षकानुमानम् ॥

उपादानत्वपक्षकानुमानमप्यप्रयोजकत्वेनैव निरस्तम् ॥

नच सर्गाद्यकार्यस्योपादानान्तरानिरूपणम्। ईश्वरपरतन्त्रप्रकृतेरेवोपादानत्व संभवात्। नच तस्या अनादित्वेन ज्ञाननिवर्त्यत्वेन श्रुतिसिद्धतया अविद्याया एवोपादानत्वमायातमिति वाच्यम्। सत्यस्यापि ज्ञाननिवर्त्यत्वेन त्वदभिमताविद्याया एवमप्य सिद्धेः। प्रकृतेर्ज्ञाननिवर्त्यत्वं च असिद्धम्। 'गौरनाद्यन्तवती' इत्यादिश्रुत्या नित्यत्वेनैव सिद्धेः। यच्च जाताजाताभेदव्यवहारानुपपत्तिरूपतर्कान्तरम्——तदप्यसत्——[1]जाताजातपदाभ्यामुत्पन्नानुत्पन्नविवक्षायां उपादानकारणस्यैव कार्यतया तस्यैवोत्पत्तेः कारणानुत्पत्त्यसिद्ध्या उत्पन्नानुत्पन्नाभेदोऽसिद्ध एव। पूर्वकालसत्त्वासत्त्वविवक्षायां द्रव्यस्याजातत्वात् घटत्वाद्यवस्थाया एव जातत्वात् तयोरभेदोऽसिद्ध एव ॥

किञ्च——अज्ञानोपादानकत्वे वा कथं तदुपपत्तिः। भेदस्य व्यावहारिकत्वे [2]व्यावहारिकभेदानुपपत्तेः। विनिगमकाभावाच्च नान्यतरस्य प्रातिभासिकत्वम्। एवं पीतघटसमानकालीनेत्याद्यनुमानमप्ययुक्तम्। अप्रयोजकत्वात्। नचानुगता—विद्यानुपादानकत्वे अयं घट इत्याद्यनुगतबुद्ध्यभावप्रसङ्गः। घटत्वादिजातिभिरेव तदुपपत्तेः। नच घटत्वाद्यनन्तजातिकल्पने गौरवात् सर्वानुगताऽविद्या एकैव घटत्वपटत्वाद्यनुगतव्यवहारनिमित्तमिति वाच्यम्। तस्या अनुगतघटप्रतीत्यालंबनत्वे पटेऽपि तत्प्रसङ्गात्। व्यक्तिविशेषस्यापि तद्बुद्धौ कारणत्वात्तदभावादेव न पटे घट व्यवहारः इति चेत् तर्हि विषयाजन्यापरोक्षप्रमा कुतो न स्यात् ॥

किञ्च——व्यक्तिविशेषा[3]भावात् तद्व्यवहाराभावेऽपि [4]काले घटत्वमिति व्यवहारः स्यादेव। काले जातेस्सत्वेऽपि यथा अयं घट इति व्यवहाराभावेऽपि काले

१. जाताजातादिपदव्यवहारो. २. अव्यावहारिकाभेदानु. ३. भावव्यवहारा. ४. इदं घटत्व.

घटत्वमित्यादिव्यवहारः, तथा पटे घटत्वमिति व्यवहारप्रसङ्गश्च। अज्ञानस्यैव घटत्वात्मकत्वे तस्योपादानत्वात् मृद्धट इतिवत् इदं घटत्वमित्येव घटे प्रतीतिस्स्यात्। न तु घटे घटत्वमिति ॥

किञ्च—[१]व्यक्तिविशेषाभावान्माभूद् घटप्रतीतिः अन्यत्र घटे तु कथं घटत्वप्रतीतिः। तादृशव्यक्तिविशेषत्वादिति चेत् तर्हि घटान्तरे कथं तत्प्रतीतिः। तस्यापि तादृशव्यक्तिविशेषत्वादिति चेत् तर्हि यादृशव्यक्तिविशेषाभावात् पटे घटत्वप्रतीत्यभावः यादृशव्यक्ति[२]विशेषसत्त्वाच्च घटेषु सर्वेषु घटत्वप्रतीतिः तादृशव्यक्तिविशेषस्यैव अनुगतप्रतीत्यालंबनत्वे किमज्ञानकल्पनया ॥

किञ्च—द्रव्यत्वेन जानामि घटत्वेन न जानामीत्यादिप्रतीतिः नोपपद्यते। तयोर्भेदाभावात् द्रव्यं घट इति च पर्यायस्स्यात् [३]प्रवृत्तिनिमित्ताभेदात्। ब्रह्मण एव वा प्रमेयत्वस्य वा कालस्यैव वाऽनुगतप्रतीतिहेतुता स्यात् क्लृप्तत्वात्। न त्वज्ञानस्य ॥

किञ्च—अनुपादानत्वेऽपि दण्डकुण्डलादिवदनुगतप्रतीतिहेतुत्वसंभवात् कथमुपादानत्वम्। अनादिभावत्वपक्षकानुमानमप्ययुक्तम्। प्रकृतेर्नित्यत्वस्य प्रमाणसिद्धत्वेन प्रकृतित्वे व्यभिचारात्। तस्या एवात्र ज्ञाननिवर्त्यत्वसाधने बाधात्। तदतिरिक्तस्य ज्ञाननिवर्त्यत्वसाधने अनादिद्वयक्लृप्तिगौरवात्। उक्तव्यभिचाराच्च। अनादित्वभावत्वपक्षकोत्तरानुमानद्वयमप्युक्तगौरवादेव निरस्तम्। सर्गाद्येत्याद्यनुमाने च जडनित्यप्रकृत्युपादानकत्वेनार्थान्तरता ॥

सत्प्रतिपक्षाश्चोक्तहेतवः—तथाहि—त्वदुक्तपक्षस्त्वदुक्तसाध्याभाववान्, त्वदुक्तपक्षसाध्याभाववदन्यतरत्वात्, साध्याभाववान् दृष्टान्तः। जन्यसविकल्पकाजन्यचाक्षुषघटप्रमाणज्ञानं स्वजन्यान्यायोग्यस्वजन्यध्वंसप्रतियोगिस्वव्यतिरिक्तवस्तुपूर्वकं न भवति—घटं न जानामीत्यनुभवविषयातिरिक्तस्वजनकानिवर्तकज्ञानत्वात्, धाराद्वितीयज्ञानवत्। ज्ञानत्वमात्रं स्वाजनकज्ञाने[४]च्छाद्वेषप्रयत्नानन्तरभाविनि विरोधिगुणतया तन्निवर्तकज्ञाने व्यभिचारि। ब्रह्मवधाद्यपुण्यदर्शनदेवतादिपुण्यदर्शनरूपतया धर्मा-

१. व्यक्तिविशेषान्माभूदितिघटप्रतीतिः—पा—व्यक्तिविशेषासत्वाच्च. २. विशेषाभावाच्च. ३. पूर्व. ४. चेष्टानन्तर.

धर्म[१]निवर्तकज्ञानेऽपि व्यभिचारीति पूर्वप्रतीकं। घटं न जानामीति अनुभवविषयातिरिक्तानिवर्तकज्ञानत्वमसिद्धम्—तादृशनिर्विकल्पकनिवर्तकत्वात्। प्रागभावस्य घटं न जानामीति अनुभवविषयतायास्सन्दिह्यमानत्वात् सन्दिग्धासिद्धिश्चेति तद्वारणाय स्वाजनकेति। तथा च विशिष्टाभावस्य सत्वान्नासिद्धिः। स्वाजनकानिवर्तकज्ञानत्वमात्रमुक्त[२]साध्यव्याप्यमपीदानीमसिद्धमित्यतः [३]पूर्वप्रतीकम्। विशिष्टाभावश्च ना सिद्धः। नच स्वाजनकेतिविशेषणं न जानामीत्यनुभवविषयातिरिक्तपदं वा न स्वरूपासिद्धिवारकत्वात् व्यर्थं [४]विशिष्टभागस्यैव गमकत्वादिति वाच्यम्। [५]घटं न जानामीत्यनुभवविषयातिरिक्तस्वाजनकनिवर्तकत्वाभावस्य तदन्योन्याभावस्य वा अखण्डाभावत्वेन [६]वैयर्थ्याभावात् घटनिवर्तके घटासमवायिकारणध्वंसे व्यभिचारवारणाय ज्ञानत्वादिति। दृष्टान्ते पूर्वोत्तरघटज्ञानयोरपि घटं न जानामीत्यनुभवविषयत्वात् पूर्वज्ञानस्य स्वाजकत्वाभावाच्च साधनलाभः स एव पक्षः स्वसमानाधिकरणप्रागभावव्यतिरिक्तस्वजन्यध्वंसप्रतियोगिस्वसमानाधिकरणप्रत्यक्षस्वव्यतिरिक्तवस्तुपूर्वको न भवति घटं न जानामी[७]त्यनुभवविषयस्वान्यज्ञानातिरिक्तभिन्नवृत्त्यभावानिवर्तकत्वात्—आद्यनिर्विकल्पकवत्। अत्र घटं न जानामीत्यनुभवविषयेति स्वान्यज्ञानातिरिक्तविशेषणं घटं न जानामीत्यनुभवविषयभिन्न प्रत्यक्षभावानिवर्तकज्ञानत्वं द्वितीयादिज्ञाने व्यभिचारीति ज्ञानातिरिक्तपदम्। स्वनिवर्तकत्वेनासिद्धिवारणाय स्वाजन्येति ज्ञानविशेषणम्। इच्छादिनिवर्तकज्ञाने व्यभिचारवारणाय घटं न जानामीत्यनुभवविषयेति। प्रत्यक्षभावानिवर्तकत्वमसिद्धम्। स्वनिवर्तकत्वात् भावरूपाज्ञाननिवर्तकत्वसन्देहात् सन्दिग्धासिद्धं चेति पूर्वप्रतीकम्। निर्विकल्पकनिवर्तकतया स्वोत्पादकादृष्टनिवर्तकतया च असिद्धिरिति प्रत्यक्षपदम्। धाराद्यज्ञाने द्वितीयादिज्ञानप्रागभावनिवर्तकत्वात्तस्य च घटं न जानामीत्यनुभवविषय[८]त्वसन्देहात् तत्र सन्दिग्धासिद्धिवारणार्थं आद्यनिर्विकल्पके साधनवैकल्यपरिहारार्थं च भावपदम्। घटनिवर्तकघटासमवायिकारणध्वंसे व्यभिचारवारणाय ज्ञानत्वादिति। दृष्टान्ते ज्ञानानन्तरभाविनि निर्विकल्पके तन्निवर्तकत्वेन साध्यसाधनयोरभावादाद्यपदम्। हेतौ च स्वशब्दः सम-

१. धर्मज्ञाननिवर्तकेऽपि. २. साध्यव्याप्यमिदानीम्. ३. पूर्वकम्. ४. परिशिष्ट—भाग. ५. रूपं न जानामि. ६. वैधर्म्याभावात्. ७. विषय स्वान्य. ८. यत्वात्.

भिव्याहृतपरः । [1]पक्षीकृतज्ञानमात्रपरत्वे प्राथमिकघटचाक्षुषसविकल्पकनिवर्तके पटनिर्विकल्पके व्यभिचारात् ॥

स्वसमानाधिकरणप्रागभावातिरिक्तस्वजननायोग्यस्वजन्यध्वंसप्रतियोगिस्वदेशगतस्वातिरिक्तवस्तुपूर्वकं [2]न भवति घटं न ज्ञानामीत्यनुभवविषयातिरिक्तस्वाजनकभावानिवर्तकत्वात् धाराद्वितीयज्ञानवत् [3]अत्र हेतुगतविशेषणानां प्रथमसाध्यहेतुवदेव प्रयोजनानि । भावपदं तु धाराद्यज्ञाने घटं न जानामीत्यनुभवविषयतया सन्दिह्यमानस्वानन्तरभाविघटसविकल्पकप्रागभावनिवर्तकतया सन्दिग्धासिद्धिवारणाय अखण्डाभावत्वाच्च न व्यर्थता । स्वप्राग[4]भावातिरिक्तस्वविषयसंशयादिजननयोग्य स्वसत्ताक्षणनियतध्वंसप्रतियोगिस्वसमानाधिकरणवस्तुपूर्वकं न भवति इति वा साध्यम् । तत्रोक्तहेतुरेवात्रापि द्रष्टव्यः । तत्रोक्त एवात्रापि दृष्टान्तः ॥

देवदत्तप्रमा तत्प्रमाप्रागभावातिरे[5]किणः नानादेध्वं सिनी, देवदत्तप्रमात्वात्, द्वितीयप्रमावत् ॥

साध्यपरिष्कारः ॥

इच्छाद्वेषप्रय[6]त्नासमानकालीनसामग्रीजन्यभावरूपप्रत्यक्षधर्माजनकस्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकघटादिप्रत्यक्षप्रमा ज्ञानातिरिक्तप्रत्यक्षनिवर्तिका न भवति । इच्छाद्वेषप्रयत्नासमानकालीनसामग्रीजन्यभावरूपप्रत्यक्ष[7]धर्मजनकज्ञानत्वात् द्वितीयज्ञानवत् । इच्छानिवर्तके [8]इच्छाजनके च व्यभिचारवारणार्थं विशेषणद्वयम् । स्वनिवर्तकत्वेन इच्छादौ व्यभिचारवारणाय ज्ञानत्वादिति विशेष्यम् ॥

यद्वा—[9]प्रत्यक्षभावधर्माजनकस्वसामग्रीकालीनजन्यविशिष्टज्ञानाविषयविषयकघटादिप्रत्यक्षप्रमा कार्यस्वसमानाधिकरणातिरिक्तप्रत्यक्षनिवर्तिका न । कार्यातिरिक्तप्रत्यक्षनिवर्तिका न । जन्यज्ञानासहकृतसामग्रीजन्यध्वंसप्रतियोगिजातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न । जन्यज्ञानासहकृतसामग्रीजन्यध्वंसप्रतियोगिवृत्ति बाह्यावृत्तिजातिमदतिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न । जन्यज्ञानाजन्यध्वंसप्रतियोगि

---

१. पक्षीभूतपरत्वे. २. पूर्वकं न ।. ३. तत्र. ४. भावव्यति. ५. केण. ६. प्रयत्नसमान. ७. धर्मा. ८. इच्छानिवर्तके. ९. प्रत्यक्षधर्माजनक.

जातीयातिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका न। जन्यज्ञानाजन्यध्वंसप्रतियोगिवृत्ति-बाह्यावृत्तिजातिमदतिरिक्तज्ञानान्यप्रत्यक्षनिवर्तिका—न। गुणत्वानधिकरणप्रत्यक्ष-निवर्तिका न। स्वस्थितिक्षणनियत[१] स्वविनाशसामग्रीमद्भिन्नप्रत्यक्षनिवर्तिका नेति वा साध्यम्। प्रत्यक्षभावधर्माजनकज्ञानत्वादिति हेतुः। द्वितीयज्ञानं दृष्टान्तः। चेष्टानपेक्षज्ञानजन्यप्रत्यक्षनिवर्तिका—न। चेष्टाजन्यान्यकार्यातिरिक्त प्रत्यक्षनिवर्तिका—न। चेष्टानिमित्तजातीयातिरिक्तप्रत्यक्षनिवर्तिका—न। अहमनु-भवविषयधर्मातिरिक्तनिवर्तिका नेति साध्यम्। स एव हेतुः। स एव दृष्टान्तः। चेष्टानपेक्षेत्याद्युक्तसाध्यद्वये चेष्टाप्रत्यक्षव्यतिरिक्तं पक्षः। हेतौ च चेष्टाजन्यान्यत्वं विशेषणम्। तेन चेष्टा[२]प्रत्यक्षे नासिद्धिव्यभिचारौ। घटध्वंसजनकघटाप[३]रोक्षप्रमाण-ज्ञानं ज्ञानान्य घटं न जानामीत्यनुभवविषयनिवर्तकं न भवति। घटध्वंसाजनक-त्वात्। पटमात्रगोचरज्ञान[४]वत्। योग्यताभावस्य साध्यत्वात् न [५]द्वितीयादिज्ञाने अंशतः सिद्धसाधनम्। स्वसामग्रीकाले स्वसमानाधिकरणज्ञानाविषयविषयकत्वं वा पक्षविशेषणम्। ततः [६]फलोपधानाभावसाधनेऽपि न दोषः। अयं घटाभावः [७]तद-भावान्याज्ञानान्याभावान्यः मेयत्वात् घटवत्। अज्ञानं स्वस्वेतरवृत्तित्वरहिता-भाववृत्तिधर्माधिकरणं मेयत्वात् घटवत्। अज्ञानत्वं स्वस्वेतरवृत्तित्वरहिताभाववृत्ति ज्ञानवृत्तिधर्माधिकरणं मेयत्वात्। घटवत्। अभावत्वं स्वस्वेतरवृत्तित्वरहिताज्ञान वृत्तिवृत्तिधर्माधिकरणम्। मेयत्वात् घटवत्। इति महाविद्यादिभिरप्यज्ञानस्याभा-वत्वसिद्धिः॥

उपादानत्वं अनादिवृत्तिज्ञाननिवर्त्यवृत्ति न भवति भावमात्रवृत्तिधर्मत्वात्। आत्मत्ववत्। पीतघटसमानकालीनश्यामघटः पीतघटोपादानजडोपादानको न भवति। पीतघटावयवाजन्यत्वात्। आत्मवत्। अनादिभावत्वं ज्ञाननिवर्त्यवृत्ति न भवति। अनादिभावमात्रवृत्तित्वात्। आत्मत्ववत्। अनादित्वं ज्ञाननिवर्त्यभाव-वृत्ति न भवति अनादिमात्रवृत्तित्वात्। आत्मत्ववत्। प्रागभावत्ववच्च। भावत्वं

१. ध्वंसस्व. २. प्रत्यक्षेण बाधव्यभिचारौ. ३. घटापरोक्षज्ञानम्. ४. गोचरज्ञान-वतो योग्य. ५. द्वितीययोग्यताज्ञानेनांशत. ६. फलोपाधानसाधनाभावेऽपि न दोषः. ७. एतदभावान्याज्ञानान्याभाव.

अनादिज्ञाननिवर्त्यवृत्ति न भवति। [१]भावमात्रवृत्तित्वात्। आत्मत्ववत्। घटत्ववच्च ॥

प्रतिकूलतर्कः ॥

प्रतिकूलतर्कपराहताश्च हेतवः—तथाहि—घटज्ञानेनाज्ञाननिवृत्तौ कालान्तरे घटं न जानामीति प्रतीतिर्न स्यात्। अज्ञानान्तरमनन्तरमावृणोति। युगपदुभयोरावारकत्वे मानाभावात्। एकदैकमेवावृणोति यदाऽऽवृणोति तन्निवर्तत इति चेन्न। [२]आवरणस्य व्यवहारप्रतिबन्धकत्वात्मकतया युगपत्सन्निहितानां प्रतिबन्धकानां युगपत्प्रतिबन्धकत्वनिवृत्त्योरवर्जनीयत्वात्। ज्ञाननिवृत्त्यनन्तरं अज्ञानान्तरोत्पत्त्यङ्गीकारश्चानुपपन्नः। कारणाभावात्। ज्ञाननिवृत्तेरेव कारणत्वे घटगोचरप्राथमिकज्ञानात् [३]प्रागभावानुभवो न स्यात्। पूर्वज्ञानाभावेन तन्निवृत्तेरसिद्धेः। प्राथमिक[४]ज्ञानेनाद्यमज्ञानं तन्निवृत्तम्, तन्निवृत्त्याऽज्ञानान्तरोत्पत्तिरित्युक्तावपि अनाद्यज्ञानानां सर्वेषामप्यविशेषेण घटावारकतया घटज्ञाने सर्वनिवृत्तिप्रसङ्गः। चक्षुर्द्वयसन्निकर्षे सति उत्पन्नज्ञानस्य न ह्येकमेव चक्षुः कारणमिति नियम्यते। अत एकमेवावारकं घटस्येति नियमनं निर्मूलमेव। ननु—अज्ञानानां ज्ञानवत् सविषयत्वात् तत्तद्विषयकमज्ञानं तदावृणोतीति चेन्न। मयि घटाज्ञानं घटं न जानामीति ज्ञानमेव हि सविषयतया भासते। अज्ञानं तु ज्ञानाभावत्वेन वा ज्ञानविरोधितया वा भासत इति कथमज्ञानस्य [५]सविषयतया सिद्धिः। अतश्चक्षुर्द्वयस्य कारणत्ववत् सर्वेषामज्ञानानां युगपत् घटावारकत्वस्य आवश्यकतया तज्ज्ञानेनैव युगपन्निवृत्तिरनिवार्या ॥

किञ्च—परोक्षापरोक्षयोर्ज्ञानत्वस्य तद्विरोधित्व[६]तन्निवर्तकत्वानुभवयोश्चाविशेषेऽपि परोक्षज्ञानं व्यवच्छिद्य अपरोक्षज्ञानस्य अज्ञाननिवर्तकत्वसाधनं कथमिव समञ्जसं भवेत्। अपि च—अवधारणस्यैव [७]निवर्तकत्वाङ्गीकारात् अनभ्यासद-

१. अनादिभावमात्रवृत्तित्वात्। २. व्यवहारप्रतिबन्धकत्वात्मतया।. ३. प्रागज्ञानानुभवो न स्यात्. ४. ज्ञानेनाद्यज्ञानं तन्निवर्तते, ज्ञानजाद्यं ज्ञानम्. ५. सविषयतासिद्धिः. ६. तन्निवर्त्यत्वानुभवयोश्चाविशेषत्वेऽपि. ७. निवर्तकत्वार्थाङ्गीकारात् अभ्यास.

शापन्न [१]जलज्ञाने सति अज्ञानमनुभूयेत। एककोटिकज्ञानस्य अज्ञानानुभव-प्रतिबन्धकत्वे चन्द्रं न जानामीत्यनुभवाभावप्रसङ्गः। आश्रयानुपपत्यादि [२]बाधक तर्काश्च वक्ष्यन्ते॥

हेतोस्सोपाधिकत्वम्॥

सोपाधिकाश्च हेतवः। तथाहि—[३]पक्षेतरत्वं तावत् सर्वत्रोपाधिः। अनु-कूलतर्काभावप्रतिकूलतर्कयोः परानुमाने उपन्यस्ततया तत्साहचार्यादयं च निश्चितो-पाधिः। अपिच—जीर्णकन्थासूचितेषु प्रौढप्रकाशकतेजस्त्वमुपाधिः। अन्वय व्यतिरेकाभ्यां तमस्त्वेन प्रौढप्रकाशतेजस्त्वेन च निवर्त्यनिवर्तकभावग्रहणादिह तथा ग्रहणाभावेन उक्तोपाधेः साध्यव्यापकत्वात्। अयं चोपाधिः प्रत्यनुमाने अनुकूलतर्कः—निवृत्तिप्रयोजकाभावे च [४]निवृत्त्यभावस्य आवश्यकत्वात्। अयं च वक्ष्यमाणोपाधौ सर्वत्र द्रष्टव्यः। चित्सुखानुमानेऽपि देवदत्तावृत्तिकार्यत्वमुपाधिः। कार्यत्वादेव हि प्रागभावनिवर्तकता। देवदत्तावृत्तिकार्यत्वादेव च तत्स्थप्रमाप्रागभावाति-रिक्तनिवर्तकता। कार्यस्य स्वसमानाधिकरणप्रागभाव[५]निवर्तकत्वस्वभावात्। ज्ञानाति-रिक्तप्रत्यक्षनिवर्तकमिति साध्ये निवृत्तिप्रयोज[६]करूपवत्त्वमुपाधिः। तत्प्रयोजकरूपं च प्रागभावनिवर्तकेषु प्रतियोगिजनकतावच्छेदकरूपं [७]इच्छादिनिवर्तकेषु विरोधिगुणवत्त्वं ध्वंसजनकप्रतियोगिप्रत्यक्षे च प्रतियोगिविषयत्वमन्वयव्यतिरेकसिद्धम्। इह च तादृश-क्लृप्तप्रयोज्यप्रयोजकरूपाभावे कथं निवर्त्यनिवर्तकभावः। [८]इत उत्तरानुमानेष्वपि अयमेवोपाधिः। महाविद्यानान्तु पक्षेतरत्वोपाधिरुक्त एव। उपादानत्वपक्षकानुमाने च प्रागभाव[९]वृत्तित्वमुपाधिः। प्रागभावस्य प्रतियोगिजनकनिवर्त्यत्वनियमात्। पीतघटेत्याद्यनुमाने च पीतघटावयवसंयोगजन्यत्वमुपाधिः। अनादिभावत्वपक्षकानु माने च ज्ञाननिवर्त्यताप्रयोजक[१०]रूपवद्वृत्तित्वमुपाधिः। अन्वयव्यतिरेकाभ्यां घटादेर्ज्ञानेन निवृत्तिदर्शनेन तत्प्रयोजकरूपवत्त्वात्। [११]अजन्यभावान्यवृत्तित्वं वो

---

१. जडज्ञाने सति विज्ञा. २. साधक. ३. पक्षान्तरत्वम्. ४. निवर्त्याभावस्य, भावे निवृत्तिभाव. ५. निवर्तकत्वात्. ६. प्रयोजकत्व. ७. इच्छानिवर्तकेषु. ८. उत्तरानु. ९. निवृत्तित्व. १०. रूपवृत्तित्व, रूपवद्वृतत्व. ११. अजन्यबाधान्य.

पाधिः। अनादित्वपक्षके च जन्यभाववृत्तित्वमुपाधिः। [१]भावत्वपक्षके च प्रागभाववृत्तित्वमुपाधिः। बाधितविषयाश्च परोक्तहेतवः—प्रतिपक्षानुमानानामनुकूलतर्कप्रतिकूलतर्काभावस्थापनानुमानानुकूलतर्काभावप्रतिकूलतर्कैः परिष्कृततया प्रबलत्वात् ॥

इत्यनुमानखण्डनं समाप्तम् ॥

ननु अस्तु अर्थापत्तिर्मानम्। तथाहि—मिथ्यार्थोत्पत्तिर्भाव[२]रूपाज्ञानं विनाऽनुपपन्ना तत् कल्पयति-भावकार्यस्य रजतादेरुपादानान्तरासंभवात्। न चात्मोपादानम्। तस्याधिष्ठानतयोपादानत्वेन परिणाम्यन्तरस्यावश्यकत्वात् परिणामितया उपादानत्वे परिणामस्य परिणामिसमानसत्ताकत्वनियमेन कार्यस्यापि सत्यत्वप्रसङ्गात्। तस्य निरवयवत्वेन परिणामायोगाच्च। नापि शुक्त्यादिः काचादिकं वोपादानम्। अननुगतत्वात् काचादेः रजताद्यनाश्रयत्वाच्च। अतः परिशेषादज्ञानमेवोपादानम्। एवं ब्रह्मणो जगदुपादानत्वं श्रुतमन्यथानुपपद्यमानं भावरूपाज्ञानं कल्पयति। निरवयवस्य निर्विकारस्य ब्रह्मणः परिणामित्वासंभवात् अधिष्ठानतयोपादानत्वस्य मिथ्यापरिणाम्यज्ञानोपादानं विनाऽनुपपत्तेः। ब्रह्ममात्रकार्यत्वे जडस्य जडत्वस्य आकस्मिकत्वप्रसङ्गाच्च। न च विकारस्याविद्यापरिणामत्वे गौरवेण ब्रह्मोपादानत्वभङ्गप्रसङ्ग इति वाच्यम्। श्रुतिबलेन तस्याप्युपादानत्वात्। कार्ये सत्तादात्म्यानुभवेन तदुपादानत्वस्यावश्यकत्वाच्च। अविद्यावत् ब्रह्मणोऽपि उपादानत्वे [३]विकारापात इति चेन्न। द्विविधं ह्युपादानत्वं परिणामित्वं तत्सत्ताप्रदत्वं च इति। तत्राद्यमज्ञानस्येति तद्भवतु विकारि। द्वितीयं तु ब्रह्मण इति न तद्विकारि ॥

किञ्च—यत् यदात्मककारण[४]तादात्म्यापन्नं जायते तदात्मकत्वं हि उपादानत्वम्। वियदादिकार्यवर्गश्च चैतन्यसत्तानुविद्धो जडानुविद्धश्च जायत इति उभयस्याप्युपादानलक्षणलक्षितत्वात् उभयमुपादानम्। एवं स्वप्रकाशब्रह्मस्वरूपावभासानुपपत्तिः भावरूपाज्ञाने मानं—आवारकेण विना स्वप्रकाशात्मकब्रह्मस्वरूपानवभाससंशयाद्ययोगात्। नच ब्रह्मणो[५]जीवभावादेव तदनवभासः। तस्य निरस्तत्वात्।

१. भावत्वपक्षके च प्रागभावावृत्ति. २. रूपमज्ञानम्. ३. विकारो बाधक इति. ४. तादात्म्योपपन्नम्. ५. जीवभेदादेव.

अविद्यातिरिक्तेन[1] प्राप्तावावरणायोगाच्च। न कर्मण आवारकत्वम्। एवं चिदानन्द रूपब्रह्मणः अविद्यां विना जडदुःखात्मकप्रपञ्चतादात्म्यानुपपत्तिरपि मानम्। एवं मोक्षशास्त्रोपदेशानुपपत्तिरपि मानम्। तन्निवृत्यतिरिक्तोपदेशसाध्यप्रयोजनाभावादित्युक्तमिति ॥

सिद्धान्तः ॥

अत्रोच्यते—न तावन्मिथ्यार्थोत्पत्त्यनुपपत्तिर्मानम्। मिथ्यार्थोत्पत्त्यसिद्धेः। अस्तु वा मिथ्यार्थोत्पत्तिः। तथाऽपि नाज्ञानसिद्धिः। उपादानाभावे कथं तदुत्पाद[2] इति चेत्—न। रजतावयवादिक्लृप्तकारणाभावे कथं तदुत्पादः। यदि मिथ्यात्वात् न तदपेक्षा—तदा तत एवोपादाननैरपेक्ष्यमप्यस्तु। अस्तु वा आत्मन एवोपादानत्वम्। नच निरवयवत्वादनुपादानता। निरवयवत्वेन सत्यपरिणामाभावेऽपि मिथ्याभूतपरिणा(मा)मसंभवात्। घटाकारेण [3]परिणममानमृत्पिण्डस्यैव इदानीं शरावाकारेण परिणाम इति भ्रान्तिसिद्धमिथ्याशरावपरिणामो दृश्यते। [4]तत्र यदा घटपरिणामदशायां शरावपरिणामायोग्यस्यापि मृत्पिण्डस्य मिथ्यात्वादेव शरावपरिणामसंभवः। एवं ब्रह्मणोऽपि मिथ्याभूतोपादानत्वं [5]संभवत्येवेति। नचासत्यस्या सत्योपादानत्वं वाच्यमिति वाच्यम्। क्वाप्यदर्शनात्। ननु उपादानोपादेययोस्सालक्षण्यनियमदर्शनादेव तत्सिद्धिरिति चेत्। सर्वथा सालक्षण्यस्य मृद्घटयोरप्यदर्शनात्। यत्किञ्चित्सारूप्यस्य शुक्तिरजतादावपि पदार्थत्वादिना सत्त्वात् ॥

यदुक्तं ब्रह्मणः परिणामितयोपादानत्वे परिणामस्य परिणामिसमानसत्ताकत्वनियमेन कार्यस्यापि [6]सत्यत्वप्रसङ्गः इति। तत्र किं परिणामशब्देन कार्यमात्रं विवक्षितं उत रूपान्तरापत्तिः—नाद्यः—ध्वंसस्य अविद्यानिवृत्तेश्च परिणामिसमान सत्ताकत्वाभावात्। न हि तद्रूपेण परिणामि किञ्चिदस्ति। न द्वितीयः—रूपान्तरापत्तेःपरिणामिमात्रसापेक्षत्वात् गौरवेण स्वसमानसत्ताकपरिणाम्यपेक्षाभावात्। ननु—स्वसमानसत्ताकरूपान्तरापत्तेरेव परिणामशब्दार्थत्वात् कथं तदभावे परि-

---

१. अविद्यातिरिक्तत्वे प्राप्तावरणा. २. इति चेद्रजतावयवादि. ३. परिणतं मान. ४. यत्र तथा घट. ५. संभवत्येव. ६. तत्तत्, सत्वप्र.

णामित्वमिति चेन्न। लाघवेन रूपान्तरापत्तेरेव परिणामशब्दार्थत्वात्। न च[1]ब्रह्मापरिणामित्वश्रुतिविरोधः। परिणामस्यासत्यत्वेन श्रुतिविरोधाभावात्। अविद्याया मिथ्यात्वेन निरवद्यत्वश्रुतिवत् सत्यप्रकृतिरिदमर्थ एव वोपादानमस्तु। न च शुक्त्यादेरननु[2]गतत्वेन नोपादानता। रजतादिकार्यस्यापि अननुगतत्वात्। क्लृप्तत्वेन लाघवात् शुक्त्यादेरेवोपादानत्वौचित्याच्च। अन्यथा सत्यकार्येऽपि मृदादेरनुपादानत्वप्रसङ्गात्। ननु [3]सत्यकार्यमात्रं प्रत्यननुगतत्वेऽपि तत्तद्घटादिकार्यं प्रति अनुगतिरस्त्येव। प्रकृते च मिथ्यारजतमात्रेऽपि न शुक्तिरनुगता। रङ्गेऽपि रजतभ्रमदर्शनादिति चेन्न। [4]अविद्याया अप्यननुगतत्वात्। तत्रापि रङ्गाज्ञानस्य कस्यचिदुपादानत्वं क्वचित् शुक्त्यज्ञानस्येति। यदि च—रजताधिष्ठानतावच्छेदकावच्छिन्नचैतन्यावारकाज्ञानानुगमः तर्हि तदधिष्ठानतावच्छेदकत्वेनानु[5]गमोऽस्तु लाघवात्। एतेन ब्रह्मणो जग[6]दुपादानत्वात् श्रुतार्थापत्तिरपि निरस्ता। ब्रह्मोपादानत्वसंभवस्योपपादितत्वात्॥

यदुक्तं ब्रह्ममात्रोपादानकत्वे जडस्य जडत्वमाकस्मिकं स्यात् इति। तन्न। मृदुपादानकस्य घटानुपादानकस्यापि घटस्य घटत्वदर्शनात्। ननु तन्मात्रोपादानकत्वे तद्रूपता स्यादितिचेत्—न—[7]सदनुविद्धतया प्रतीतेरिष्टत्वात्। गोमयाद्युपादानवृश्चिकादेर्गोमयत्वाभावेन व्यभिचाराच्च॥

अनवभासानुपपत्तेर्मानत्वभङ्गः॥

एवं ब्रह्मानवभासानुपपत्तिरपि न मानम्। जीवब्रह्मणोर्भेदव्यवस्थापनात्।

किञ्च—कोऽयमनवभासः। यदनुपपत्त्या अज्ञानं कल्प्यते। न तावदवभासाभावः। स्वरूपात्मावभासस्य नित्यत्वेनाभावासिद्धेः। [8]वृत्त्यात्मकावभासाभावस्तु कारणाभावादेवोपपन्नः। नापि भावरूपाज्ञानम्। तत्सिद्ध्यसिद्ध्योः तस्य कल्पकत्वायोगात्। नापि नास्ति न प्रकाशत इति व्यवहारयोग्यता। तस्यानादित्वेन अज्ञानवदेवान्यानपेक्षणात्। सापेक्षत्वेऽपि ब्रह्मैवापेक्ष्यताम्। किमज्ञानेन।

---

१. ब्रह्मणोऽपरि. २. रनुगतत्वेनोपादानता. ३. सत्यकार्यं प्रत्यननु. ४. विद्याया। अनु. ५. गमोऽस्तु. ६. दुपादानत्वश्रुत्यर्थापत्ति. ७. तदनुविद्ध. ८. प्रत्यात्मका.

न च ब्रह्मणस्तत्प्रयोजकत्वे मुक्तावपि तत्प्रसङ्गः । तत्वज्ञानेन च निवृत्तत्वात् । नच पुनरुत्पादप्रसङ्ग इति वाच्यम् । अज्ञानवदेव [१]ब्रह्माधिष्ठानस्यापि कारणाभावादेवानुत्पादोपपत्तेः । अज्ञानसद्भावेऽपि यथाऽऽवरणानुपपत्तिस्तथा वक्ष्यते । [२]कर्मणैव वाऽनवभास उपपद्यते ॥

यदुक्तं कर्मणः प्राप्तावारकत्वं नास्ति इति- तन्न । किमिदं प्राप्तावरणं प्राप्तज्ञानोत्पत्तिप्रतिबन्धस्तावदविद्याया अपि नेष्यत एव । प्राप्तस्य व्यवहारजनकताप्रतिबन्धः कर्मणापि स्यादेव । नास्ति न प्रकाशत इति व्यवहारयोग्यतापादनमपि कर्मणैवोपपद्यते ॥

किञ्च—अविद्यायाः प्राप्तावारकत्वं न दृष्टतयोपपद्यते इतीदानीं वक्तुं शक्यते । अविद्याया एवासिद्धेः । किन्तु अविद्याया मिथ्यात्वेनैव कल्पनान्मिथ्याभूतं प्राप्तस्याप्यावरणं तयोपपद्यत इति वाच्यम् । ततश्चावरणमिथ्यात्वमेव [३]प्राप्तसंबन्धप्रयोजकमिति पर्यवसितम् । ततश्च चाकचक्यादिना मिथ्याभूतरजतोत्पत्तिवत् कर्मणैव मिथ्याभूतावरणमुपपद्यत इति ॥

प्रपञ्चतादात्म्यानुपपत्तेर्मानत्वनिरासः ॥

ब्रह्मणः प्रपञ्चतादात्म्यानुपपत्तिरपि न मानम् । तादात्म्यासिद्धेः । तत्सिद्धावपि[४]मिथ्याभूतस्य तस्य अज्ञानं विनाऽप्युपपत्तेर्दर्शितत्वात् ॥

एवं मोक्षशास्त्रोपदेशानुपपत्तिरपि [५]न तत्र मानम् । अविद्यानिवृत्त्यतिरिक्तस्य पुरुषार्थस्य उपपादितत्वात् । अज्ञाननिवृत्त्यनुपपत्तेर्वक्ष्यमाणत्वाच्च ॥

अर्थापत्तिप्रमाणखण्डनं समाप्तम् ॥

अस्तु तर्हि [६]श्रुतिः प्रमाणं—"अनृतेन हि प्रत्यूढाः, तेषां सत्यानां अनृतमपिधानम् ।' 'नासदासीन्नो सदासीत् तदानीं' तम आसीत् तमसा गूढमग्रे प्रकेतम्

१. ब्रह्माधीन. २. कर्मण एव वानवभास–एवचानव. ३. प्रतिबन्ध. ४. मिथ्यातश्च तस्यावाचक शक्त्यादिना मिथ्याभूतस्य ज्ञानं वि........ ५. न मानम्. ६. श्रुतिः–अनृतेन.

'इन्द्रो मायाभिः पुरुरूप ईयते' 'अविद्यायामन्तरे वर्तमानाः' 'अजामेकां लोहितशुक्ल-कृष्णां' 'नीहारेण प्रावृता' 'देवात्मशक्तिं स्वगुणैर्निगूढां' 'मायां तु प्रकृतिं विद्यात्' भूयश्चान्ते विश्वमायानिवृत्ति''रिति ॥

स्मृतयश्च—'अज्ञानेनावृतं ज्ञानं' 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' 'यो माययेदं पुरुरूपयाऽसृजत्' तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते' योगी मायां' इत्यादि ॥

अत्रोच्यते—कथमेषां वाक्यानां त्वदभिमतार्थे प्रामाण्यम्। तस्यै[१]वासिद्ध्या तत्रानृतादिपदानां व्युत्पत्त्यग्रहात्। मिथ्यार्थे ह्यनृतपदं व्युत्पन्नमिति चेत्। [२]किं ततः—न ह्यविद्यैव मिथ्या। किन्तु प्रपञ्चमात्रम्। ततश्च प्रसिद्धश्शरीर-संबन्ध एव कुतो नोच्यते। अनृतशब्दस्य मिथ्याभिलापे प्रसिद्धेः, स एव वा कुतो नोच्येत। वस्तुतस्तु—अनृतशब्दः कर्मपरः। तस्य ज्ञानप्रतिबन्धकत्व-प्रसिद्धेः। तदेव चेह प्रतिपाद्यम्। एतं ब्रह्मलोकं न विन्दन्तीति ज्ञानाभावप्रति-पादनात् ॥

विन्दत्यर्थः ॥

यद्यपि विन्दतिः प्राप्तिवचनः। तथापीह प्रकरणानुसारात् ज्ञानपरः। हृदये विद्यमानस्य कथमज्ञानमित्यपेक्षाया इदं वाक्यं प्रवृत्तमिति हि दहरविद्यानिरूपणे-ऽभिहितम्। अहरहर्गच्छन्त्य इति प्राप्तिमनूद्य न विन्दन्तीत्यभिधानेन प्राप्तिनिषेधा-संभवाच्च। पापस्य च ज्ञानविरोधित्वम् ॥

यमधो निनीषतीति श्रुत्यर्थः॥

'एष एवासाधु कर्म कारयति तम्। यमधो निनीषति' इत्यादि श्रुतिसिद्धम्। नन्वियं श्रुतिः निरयनिनीषाविषया किं न स्यात्। उन्नयनप्रत्यनीकत्वादधोनयनस्येति ब्रूमः। [३]अत्र विवक्षितमुन्नयनं हि उपासननिष्पादनरूपम्। नचोन्नयनमपि नाकादिनयनमिति शङ्कनीयम्। 'यमेभ्यो लोकेभ्य उन्निनीषतीत्यवगतस्य समस्त-

१. वाभिध्या. २. अन्ततः. ३. अत्राऽविवक्षितोन्नयनाङ्गि उपासना.

लोकेभ्यः उन्नयनस्य अपवर्गप्रापणरूपत्वात्। तर्हि गर्भजन्मजरामरणादिसंसार-प्रापणमधोनयनं स्यात्। [१]न तूपासननिरोध इति चेन्न। उन्नयनस्य ज्ञानोत्पादन-द्वारकत्वावगमात्। 'यं त्वं मनुष्यायहिततमं मन्यसे' इत्युपक्रमवाक्येन 'मामुपास्व' इति [२]विधित्सितोपासनस्याव्यवहितोपायत्व[३]मवगतम्। 'नान्यः पन्था' इत्यादीनि च श्रुत्यन्तराणि तथाऽवगमयन्ति। तच्च कर्मणामपवर्गं प्रत्यव्यव-हितोपायत्वे विरुध्येत। अतः उपक्रमाद्यविरोधात् साधुकर्मणामपवर्गं प्रत्युपायत्व-मुपासनद्वार[४]कमवसीयते। अतः कर्मणामुन्नयनहेतुत्वं उपासननिष्पादनरूपमिति तद्विपरीतमधोनयनमुपासनप्रतिबन्धरूपमिति स्फुटतरमवगम्यते। अस्तु वा उन्नयना-धोनयने स्वर्गनरकप्रापणरूपे, तथाऽपि असाधुकर्मणां ज्ञानविरोधित्वं सिध्यति। तथाहि—उन्निनीषाधोनिनीषयोः निर्हेतुकत्वे परमात्मनः वैषम्यनैर्घृण्यप्रसङ्गात् नेतव्यचेतनगोचरं [५]यद् वृतद्वयं गतिद्वयनिनीषानिमित्तभूतातिप्रभूतपुण्यपाप[६]कर्तृ-विषयं विज्ञायते, तत्र च गतिद्वयपर्याप्तोत्तरोत्तरसाध्वसाधुकर्मकारयितृत्वमीश्वरस्य न भूतावेशादिवज्जीवबुद्ध्यनपेक्षं भवति। तथा सति ज्ञानचिकीर्षाद्यभावाद् वायूद-कादिनुन्नतृणादेरिव संसारिणां शास्त्रवश्यत्वाभावेन कर्मफल[७]भोगानुपपत्तिः। एवं संसारिणां कर्मफलभोक्तृत्वानुपपत्तिरूपन्यायानुगृहीतमेष एवेत्यादिकं वाक्यद्वयं ज्ञानप्रदानद्वारककर्तृत्वविषयमवसीयते। तथा सति स्मृत्यनुग्रहश्च भवति—

न देवा यष्टिमादाय रक्षन्ति पशुपालवत्।
यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्॥

यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्।
बुद्धिं तस्यापकर्षन्ति सोऽपनीतो विनश्यति॥

इति ह्युच्यते। तथा—

पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः।
वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः॥

---

१. तत्तूपासन. २. विधित्सित वाक्यस्य उपासनस्याव्य। व्य. ३. मवहितम्. ४. द्वारकममत्र. ५. यदुक्तपदद्वयम्. ६. पापविषयः. ७. भोगानुपपत्तेः.

१०

पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः ।
नष्टप्रज्ञः पापमेव नित्यमारभते नरः ॥ इति च.

तत्र बुद्धिमपकर्षति, प्रज्ञां नाशयति, इति च सम्यक् ज्ञानहानिपूर्वकतद्विपरीतज्ञाननिष्पत्तिर्विवक्षिता । अन्यथा कर्मान्तरप्रारंभानुपपत्तेः । यद्यपीदं वचनजातं सर्वकर्मदेवतासामान्यविषयम् । तथाऽपि भगवज्ज्ञानस्य सम्यग् ज्ञान[१]सामान्याबहिर्भावादसाधुकर्मणस्तद्विरोधित्वसिद्धिः । तथा विशेषतश्चोच्यते—

ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्य तु कौन्तेय ततो यान्त्यधमां गतिम् ॥ इति च.

[२]एवं न्यायस्मृत्युपबृंहितयाऽनया श्रुत्या सामान्येन ज्ञानविरोधित्वमसाधुकर्मणां सिद्धमित्याचार्यैरनुगृहीतम् ॥

"ऋतं पिबन्तौ" इत्यत्र ऋतशब्दस्य सत्कर्मपरत्वदर्शनात् । अनृतशब्देन ऋतविरोधित्वात् [३]ऋतान्यत्वाद्वा पापमुच्यत इति वेदान्ताचार्यैरनुगृहीतम् ॥

नन्वेवं सति "गुहां प्रविष्टौ" इति सूत्रभाष्यविरोधः । तत्र हि ऋतं पिबन्ताविति वाक्यमधिकृत्यानुगृहीतम्—'ऋतपानं हि कर्मफलभोग एव' इति । अत्र च "कर्मफल" इत्यनेन ऋतशब्दार्थ उक्त इत्याचार्यैरनुगृहीतम् । अतः कथमृतशब्दोऽनुकूलकर्मपर इत्युच्यत इति चेन्न । "ऋतं सत्यं तथा धर्मः" इत्यादिवचनात् ऋतशब्दस्य [४]कर्मवाचित्वमेव । ऋतं पिबन्तावित्यत्र तु पिबन्ताविति भोगप्रतीतेः ऋतशब्दस्य कर्मवाचिनः तत्फले लक्षणया प्रवृत्तिरिति भाष्याभिप्रायः। अत एवान्यत्र [५]भाष्ये 'ऋतमिति कर्मवाची'ति । अत्र च मुख्यार्थप्रतीतिपूर्वकत्वाल्लाक्षाणिकार्थप्रतीतेरनुकूलं कर्म ऋतशब्दार्थ इत्युक्तम् । एतदभिप्रायेणैव 'ऋतमिति कर्मवाचि, ऋतं पिबन्ताविति दर्शना'दिति भाष्यम् । 'यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वाति' इत्युक्त्वा 'एवमनृतादा-

१. सामान्य बहिर्भावा. २. एवं व्यास. ३. ऋतान्यता पाप. ४. कर्मपरत्व. ५. भाष्यम्.

त्मानं जुगुप्सेत्' इति पुण्यप्रतियोगिनि अनृतशब्दः प्रयुक्तः। 'वृजिनमनृतं दुश्चरितम्' इति च श्रूयते ॥

एतेन 'अनृतेन हि प्रत्यूढाः' इति श्रुतिर्भावरूपाज्ञाने मानम्। ऋतं सत्यं न भवतीत्यनृतं अनिर्वचनीयम्। तदपि 'एतं ब्रह्मलोकं न विन्दन्ती'ति पूर्ववाक्यावगतस्वापकालीनब्रह्मालाभनिमित्तमज्ञानमेव। तदन्यस्य तदा तदलाभनिमित्तत्वासंभवात्। नच ऋतं सत्कर्म, अनृतं पापमिह विवक्षितम्। ऋतं पिबन्तावित्यत्र सुकृते ऋतशब्दप्रयोगादिति वाच्यम्। सत्यवाचिनो हि ऋतशब्दस्य-[१]कर्मणि सत्त्वावश्यकत्वाभिप्रायेण कर्मफले प्रयोगः, न तु कर्मणि। 'सुकृतस्य लोके' इति कर्मणः पृथग् ग्रहणात् स्वप्रकाशप्रत्यगभिन्नब्रह्मालाभस्य वास्तवत्वासंभवात्। अनिर्वचनीये च तस्मिन् सत्यस्य कर्मणः निमित्तत्वासंभवात्। न कर्मणस्तदावारकत्वमपि। अज्ञानं तु विद्यमानमेवावृणोति। प्राप्तकण्ठचामीकराद्यावारकत्वदर्शनात्। अतः तदेवानृतशब्दार्थः। उभयत्रानृतशब्दप्रयोगेऽपि। 'अज्ञानेनावृतं ज्ञानम्' इत्यादिशास्त्रप्रसिद्धावरणस्वभावस्याज्ञानस्यैव 'न किञ्चिदवेदिष'मिति परामर्शेनापि सिद्धस्य स्वप्रकाशात्मावरणयोग्यतया प्रकृते तदर्थत्वादिति नवीनोक्तं निरस्तम्। अनृतशब्दस्य दुष्कर्मपरत्वस्योपपादितत्वात् ॥

यच्च स्वप्रकाशप्रत्यगभिन्नेत्यादि, तत्र न तावत् ब्रह्माभेदादलाभस्य वास्तवत्वासंभवः, जीवब्रह्मभेदस्य [२]व्यवस्थापितत्वात्। नाप्यनिर्वचनीये सत्यस्य कर्मणो निमित्तत्वासंभवः। कर्मणः [३]सत्यत्वासिद्धेः। व्यावहारिकत्वविवक्षायामलाभोऽपि तादृश एव। तथाप्यसाध्यत्वे ब्रह्मण एव कर्मसाध्यता कर्मणः साधनत्वोच्छेदो वा स्यात्। तस्मादनिर्वचनीयत्वमेव कर्मसाध्यताप्रयोजकमिति विरुद्धो हेतुः॥

किञ्च—निमित्तपदेन कारणत्वोक्तौ सत्यस्यापि ब्रह्मणो जगत्कर्तृत्वाङ्गीकारेण व्यभिचारात्। उपादानत्वविवक्षायां इष्टापत्तिरेव, ब्रह्मण एवोपादानत्वात्। यथा च परिणामं विनाऽपि सत्यस्य ब्रह्मणः उपादानत्वं तथा अर्थापत्तिनिरासे उपपादितम्। नाप्यज्ञानस्यालाभनिमित्तत्वसंभवः। तस्यापि प्राप्तावारकत्वादर्शनात्। नच प्राप्त-

---

१. कर्मणि सत्यत्वावश्यकत्वाभि. २. व्यवस्थापनात्. ३. कर्मणस्सत एव या सिद्धेः.

कण्ठचामीकराद्यावारकत्वं दृष्टमिति वाच्यम् । तत्र कण्ठे चामीकरस्य सत्त्वेन तदप्राप्तेरभावात् । तत्संबन्धाज्ञानमेवाप्राप्तिरिति चेन्न । अज्ञानपदेन भावरूपाज्ञान विवक्षायामसिद्धेः । हेतुहेतुमतोरभेदप्रसङ्गाच्च । ज्ञानाभावरूपत्वे इन्द्रियसन्निकर्षादिस्वकारणाभावादेव तदुपपत्तेः । तत्राज्ञानस्य[1] ज्ञानाभावोपपादकत्व[2]दर्शनेनाज्ञाने प्रमाणोपन्यासो व्यर्थः। ज्ञानाभावाभिन्नत्वेन तस्य सिद्धत्वात् । नापि चामीकरासंबन्ध एवाप्राप्तिः प्रातिभासिकी । मम कण्ठे चामीकरं नास्तीति प्रतीतेः परोक्षत्वेन तस्य प्रातिभासिकार्थत्वासिद्धेः ॥

किञ्च—अज्ञानात् कण्ठचामीकरं न प्राप्तमिति केनाप्यननुभवात् अज्ञानस्याप्राप्तिहेतुत्वमसिद्धमेव । 'यच्चोभयत्रानृतशब्दस्य' इत्यादि—तन्न । 'अज्ञानेनावृतं ज्ञानम्' इत्यत्र [3]कर्मण एवाज्ञानशब्देनाभिधानादित्युक्तत्वात् ॥

### नासदासीदित्यत्र तमश्शब्दार्थः ॥

नासदासीदित्यत्र तमश्शब्दः प्रकृतिपरः । 'तमः परे देव एकीभवति' । 'यस्य तमः शरीरम्'। [4]'आसीदिदं तमोभूत'मित्यादिषु तथा दर्शनात् । प्रकृतेश्च 'गौरनाद्यन्तवती'ति नित्यत्वावगमात् नाज्ञाननिवर्त्यतेति न त्वदभिमताज्ञानरूपता । [5]सदसदभावोक्तिः व्यष्टिचेतनाचेतनविलयपरा । नचेदं वाक्यं सदसद्वि[6]लक्षणत्वपरमिति शङ्कनीयम् । सदसद्विलक्षणमित्यनभिधानात् । सन्नासीदसन्नासी[7]दित्युच्यते ॥

किञ्च—किं सदसच्छब्दौ पारमार्थिकनिरुपाख्यपरौ । उत व्यावहारिकप्रातिभासिकपरौ । नाद्यः । तदानी[8]मिति कालविशेषे निषेधे कालान्तरे तयोस्सत्त्वप्रसङ्गात् । तदानीं ब्रह्मणस्सत्वेन तयोर्निषेधासंभवाच्च । न द्वितीयः । तमसः पारमार्थिकत्वनिरुपाख्यत्वयोः अन्यतरप्रसङ्गात् ॥

किञ्च—असन्नासीदिति सद्विलक्षणस्य निषेधे कथं तादृशस्य भावरूपाज्ञा-

---

१. ज्ञानानुभवोप. २. दर्शनालाभे, दर्शने अज्ञाने प्रमाणो. ३. कर्मण एवाज्ञानेनाभि. ४. न ज्ञानम्. ५. सदसद्भवो. ६. लक्षणपरत्व. ७. दिति हि उच्यते. ८. तदानीयमपि कालविशेषेनिषेधेकालान्तरे.

नस्य तमः आसीदिति विधिः। तस्मात् व्यष्टिचेतनाचेतनलयपरत्वमेव तद्वाक्यस्य युक्तम् ॥

मायाशब्दार्थः ॥

'इन्द्रो मायाभिः' इत्यत्र मायाशब्दो न त्वदभिमते विप्रतिपन्नार्थे व्युत्पन्नः। ननु भ्रमहेतुभूतमन्त्रौषधपिञ्छादिमति मायावीति प्रयोगदर्शनेन मायाशब्दस्य [1]भ्रमहेतुकत्वार्थकत्वात्, भावरूपाज्ञानस्यापि भ्रमहेतुतया तत्परत्वमिति चेन्न। कर्मणां भ्रमहेतुतया तत्परत्वसं[2]भवेन विप्रतिपन्नार्थपरत्वकल्पनायोगात्। नापि मिथ्यात्वं मायाशब्दार्थः बहुरूपहेतुत्वाभिधानाद् विवक्षितविशेषलाभ इति वाच्यम्। मायाशब्दस्य मिथ्यार्थकत्वासिद्धेः। शुक्तिकारजतादिषु मायाशब्दप्रयोगादर्शनात् ॥

मायामृगस्तु मारीचसृष्टिरेव हि तात्त्विकी।
न चेद्रामशरेणास्य निधनं नोपपद्यते ॥

वस्तुतस्तु—मायाशब्दोऽत्र सङ्कल्पपरः। माया वयुनं ज्ञानमिति वेद निघण्टनुसारात। प्रकृतिपरो वा। बहुत्वमविवक्षितम्। अवयवभेदविवक्षया वा बहुत्वोपपत्तिः। 'अस्मान्मायी सृजते विश्वमेतत्। तस्मिंश्चान्यो मायया सन्निरुद्धः' इति मायाशब्दो हि—'मायां तु प्रकृतिं विद्या'दिति प्रकृतिपरतया श्रुत्यैव व्याख्यातः। मायाशब्दस्यानिर्ज्ञातार्थत्वात् तदनुवादेन—'क्षरं प्रधान'मितिवत् प्रसिद्धप्रकृतिपदार्थपरत्वं हि विधीयते। नच प्रकृत्यनुवादेन मायापदेन मिथ्यात्वविधिः। प्रकृतिपदस्याप्रकृतत्वात। तु शब्द विद्यादिति पदसन्निधानाभ्यां प्रकृतत्वपौर्वापर्यानुगुणोद्देश्यविधेयभावस्य स्पष्टत्वाच्च मायाशब्दश्च आश्चर्यत्वं प्रवृत्तिनिमित्तीकृत्य प्रकृतौ वर्तते। अत एवासुरशस्त्रैन्द्रजालिकमन्त्रादिषु मायाशब्दप्रयोगः। 'देवमायेव निर्मिते'ति च ॥

---

१. भ्रमहेत्वार्थ भ्रमहेतुकत्वात्. २. भवे विप्रति.

अविद्याशब्दार्थः ॥

'अविद्यायामन्तरे वर्तमाना' इत्यत्र अविद्याशब्दः न त्वदभिमतार्थपरः। तस्य विप्रतिपन्नतया तत्राव्युत्पत्तेः। अतो विद्याविरोधिकर्मपरः, प्रकृतिपरो वा॥

अजाशब्दार्थः ॥

'अजामेका' मित्यत्र अजाशब्दोऽप्युक्तन्यायेनैव न त्वदभिलषितार्थपरः। किन्तु प्रकृतिपरः ॥

नीहारशब्दार्थः ॥

नीहारेणेति श्रुतौ नीहारशब्दोऽप्यत एव प्रकृतिपरः, कर्मपरो वा। अत एव 'देवात्मशक्तिम्' इत्यत्र देवात्मशक्तिः प्रकृतिः। गुणास्सत्वरजस्तमांसि। एतेन स्मृतयोऽपि व्याख्याताः ॥

इति सद्विद्याविजये भावरूपाज्ञानप्रमाणभङ्गः॥

श्रीः

# सद्विद्याविजये तिरोधानभङ्गः ॥

किञ्च प्रयोजनाभावाच्च नाविद्याकल्पनम्। यच्चेदमुच्यते—आत्मा तावदहमित्यनुभूयमानोऽपि पूर्णानन्दब्रह्माभिन्नोऽपि न तथाऽनुभूयते। एवं च स्वप्रकाशतया प्रसक्तप्रकाशस्य अप्रकाशः अविद्यावरणादेवेति ॥

तत्र किं [१]स्वप्रकाशत्वहेतुकः प्रसक्तः प्रकाशः स्वरूपमेव, उत अतिरिक्तः। नाद्यः। हेतुहेतुमद्भावव्याघातात्। इष्टापत्तेश्च। प्रसङ्गानुपपत्तेः न द्वितीयः—तस्यानादित्वेन तदुत्पत्तिप्रतिबन्धासंभवेन तन्निवर्तनं तिरोधानमिति स्यात्। ततश्चाविद्याया अनादित्वात् तस्याः कादाचित्कसहकारिणमनपेक्ष्य निवर्तकत्वासंभवात् तादृशसहकारिणश्चानिरूपणात् न तत्संभवः। इदं पूर्वत्रापि समानम्। ब्रह्मस्वरूपनिवृत्तिप्रसङ्गोऽधिकः। अविद्यायास्सादित्वे ततः प्राक् संसाराभावात् संसारमोक्षयोर्व्युत्क्रमप्रसङ्गः। स्वप्रकाशत्वेन तत्प्रसञ्जनासंभवश्च ॥

अपिच—कं प्रतीदमावरणं कल्प्यते। न तावत् ब्रह्म प्रति। तस्याज्ञत्वप्रसङ्गात्। तस्याज्ञत्वे मानाभावात्। अस्ति प्रकाशत इति व्यवहारस्य, नास्ति न प्रकाशत इति व्यवहारस्य च सहकारिवैकल्यादेवासिद्ध्या अस्ति प्रकाशत इति व्यवहारयोग्यताविरहस्य नास्ति न प्रकाशत इति व्यवहारयोग्यताया वा अज्ञानाधीनावरणत्वकल्पनासंभवात्। अहमज्ञ इत्यत्र अहमर्थाश्रयतयाऽज्ञानप्रतीतेश्च। नाप्यब्रह्म प्रति। प्रकाशाप्रसक्तेः। अन्तःकरणावच्छिन्नचैतन्यं प्रति अज्ञानाद्यतीतस्वरूपा[२]प्रतिपत्त्यर्थमावरणं कल्प्यत इति चेत् ब्रह्मणस्तत्स्वरूपप्रकाशाभावे तत्राप्यावरणं कल्प्यम्। तत्सत्त्वे तु तस्यैवान्तःकरणावच्छिन्नतया निरुक्तप्रकाशसत्त्वात् किमर्थमावरणम् ॥

---

१. प्रकाशत्वहेतुकः प्रसक्तः प्रकाशस्य. २. प्रतीत्य.

किञ्च—किं स्वरूप एव प्रकाशप्रसक्तिः उत तदतिरिक्ते । नाद्यः—तत्प्रकाशविघटने अध्यासानुपपत्त्या अविद्यायास्संसारोच्छेदकत्वप्रसङ्गात् । न द्वितीयः—तत्प्रसक्तेः स्वप्रकाशप्रयोज्यत्वाभावेन कारणान्तराधीनत्वात् तद्विघटनं तिरोधानमिति स्यात् ॥

किञ्च—तिरोधानतया विवक्षितस्य वस्तुनः प्रकाशविरोधित्वे अध्यासानुपपत्तिः । [१]अधिष्ठानप्रकाशेन विना अध्यासानुपपत्तेः । स्वरूपनाशप्रसङ्गश्च । प्रकाशाविरोधित्वे न तत्तिरोधानम् । तत्कल्पने प्रयोजनाभावश्च । उक्तसकलदोषग्रासादेव न वैशद्यविघटनं तिरोधानम् । नाप्यनवधारणत्वापादनम् । तस्य स्वरूपानतिरेके अविद्याधीनत्वासंभवात् । स्वरूपातिरेके स्वरूपस्य अध्यासविरोधित्वाभावे तत्कल्पनं व्यर्थम् । विरोधित्वेऽपि तथा । न हि मिथ्याभूतेन गुञ्जापुञ्जत्वेन वह्नेर्दाहकत्वापगमः । तस्मान्मिथ्या[२]भूतानवधारणत्वेन न स्वाभाविकाध्यासविरोधित्वापगमः । अवधारणत्वनिवर्तकं तिरोधानमित्यपि न । निवृत्तेस्सत्यत्वे अद्वैतहानेः । मिथ्यात्वे स्वरूपस्यावधारणात्मकत्वेन निवृत्तिकल्पनं व्यर्थम् । स्वरूपस्यानपायात् । स्वरूपस्यानवधारणात्मकत्वेऽपि तथेति स्पष्टमेव । तस्मान्न कथंचिदपि ब्रह्मस्वरूपावरणसंभवः । जडावरणं तु अनङ्गीकारपराहतमनुपपन्नं च । कारण[३]तद्व्यतिरेकाभ्यामेव प्रकाशतदभावयोरुपपत्तेः । ब्रह्मस्वरूपातिरेकेण प्रकाशाभावात् तदध्यस्तत्वातिरेकेण घटादेः प्रकाशविषयत्वासिद्धेश्च । घटादिप्रकाशस्य कादाचित्कत्वसिद्धये तिरोधानमित्यपि न । चैतन्याध्यस्तत्वरूपप्रकाशविषयत्वस्य वैकल्यासिद्धेः । प्रत्युताविद्यैव हि अध्यस्तताहेतुः । नच घटावच्छिन्नानावृतचैतन्यस्य देवदत्तचैतन्येनाभेदस्य कादाचित्कत्वसिद्धये तत्कल्पनम् । वृत्तिव्याप्तिप्रयुक्ताभेदादेव प्रकाशोपपत्तेः । सिद्धे ह्यावरणे अनावृतचैतन्याभेदः प्रकाशत इति स्यात् । न त्वनावृतचैतन्याभेद एव प्रकाशत इति वाच्यम् । अन्यथा घटप्रकाशदशायां रसभानप्रसङ्गात् । घटचैतन्यमेव हि रसचैतन्यमिति चेन्न । रसनेन्द्रियजन्यवृत्तिकृताभेदस्यैव रसप्रकाशत्वोपगमोपपत्तेः । तत्त्वतस्तु इदमेव युक्तम् । घटावच्छिन्नचैतन्यस्यैव रसावच्छिन्नतया आवृतानावृतविभागानुपपत्तेः ॥

---

१. जधिष्ठानाप्रकाशे अध्यासानुपपत्तेः. २. भूतेनावधारणत्वेन स्वाभा. ३. तदभावाभ्यामेव.

ननु—घटावच्छिन्नमावरणं निवृत्तं, रसावच्छिन्नमावरणमनिवृत्तमित्येवमेकत्रैवावरणानावरणयोरुपपत्तिरिति चेन्न। समानदेशावच्छेदकभेदस्य [१]भावाभावयोरेकत्र वृत्त्युपपादकत्वासिद्धेः। तत्सिद्धावपि घटरसयोः [२]व्यवहारस्यैव वा तयोरव्यवहारस्यैव वा तयोर्व्यत्यासस्यैव वा कथं न प्रसङ्गः। न हि संभवति अवच्छेदकत्वतदभावयोरुक्तातिप्रसङ्गवारणसामर्थ्यम्। प्रकाशे आवरणतदभावावच्छेदकयोस्तत्रैव हि [३]व्यवहारतदभावावच्छेदकत्वम। नतु तस्मिन्नवच्छेदकत्वं विहाय विशिष्टावरण मङ्गीकृत्य किञ्चिद्विशिष्टावरणं निवृत्तं किञ्चिद्विशिष्टावरणमनिवृत्तम् इत्युक्तौ जडावरण प्रसङ्गः इति। [४]यच्चासाधारणं नास्ति न प्रकाशत इति व्यवहार इति। तत्र व्यवहारो नाभिज्ञा। भ्रान्तेरावरणसाध्यत्वात् तदर्थमेव तत्कल्पनात्। [५]नाप्यलेपनम्। तस्य भ्रमसाध्यतया तद्धेत्वावरणत्वासंभवात्। मूकस्थानावरणापाताच्च। यच्चावरणमस्ति प्रकाशत इति व्यवहाराभाव इति। तत्र व्यवहारस्य अभिज्ञात्वे स्वरूपरूपाभिज्ञा सर्वदा अस्त्येवेत्यसंभवः। वृत्तिरूपाभिज्ञाया मोक्षेऽप्यभावात् तदानीमावरणप्रसङ्गः। इदानीमपि कारणाभावादेव वृत्त्यभावोपपत्तेः, न तस्य अज्ञानाधीनता। एतेनैव व्यवहारोऽभिलपनमित्यपि निरस्तम्। नापि नास्तीत्यादिव्यवहारयोग्यत्वमस्तीत्यादिव्यवहारयोग्यत्वं वा। उभयोरप्यारोपितत्वेनावरणाधीनत्वात्। आवरणानधीनत्वेन प्रपञ्चस्याध्यासोऽपि तथैव स्यादिति आवरणकथोत्सादः। अखण्डानन्दोऽहमित्यनुभवाभावश्च। तस्य वृत्तिरूपतया वा कुदृष्टिपरिकल्पितकुतर्कानुसन्धानरूपकारणाभावाद्वेति न तत्प्रतिबन्धः आवरणमित्यपि सुवचम्॥

यदाह नवीनः—अस्ति प्रकाशत इति व्यवहारयोग्यताविरहः नास्ति न प्रकाशत इति व्यवहारयोग्यता वाऽऽवरणम्। न चास्याप्यावरणसापेक्षता। अविद्यावत्, अनादित्वात्। ननु आत्मनः स्वप्रकाशतया अस्तीति व्यवहारयोग्यतायास्सर्वदा सत्वेन कथं तदभावः तद्विपरीतयोग्यता चेति चेत्—न। चैतदन्यावेद्यत्वस्यैव स्वप्रकाशतारूपत्वात् तस्याश्च तदविरोधित्वात्। अस्तु वा—अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वं। तथाऽपि न दोषः। कल्पितयोग्यत्वायोग्यत्वयोर्वास्तवापरोक्ष

१. बाधाबाधयोः. २. व्यावहारिकस्यैव वा तयोरव्यवहार. ३. व्यवहारापादकत्वम्, व्यवहारतदभावापादकत्वम्. ४ यद्यसाधारणं नास्ति. ५. नाप्यभिलपनम्.

व्यवहारयोग्यत्वाविरोधित्वात्। नचानादित्वे कल्पितत्वाविद्याधीनत्वयोरनुपपत्तिः। अविद्यातत्संबन्धवदुपपत्तेः। ननु यदि ब्रह्मस्वरूपमावृतं तर्हि साक्ष्यप्यविद्यया आव्रियेतेति आयातमान्ध्यमशेषस्य जगतः। जगतस्तद्रूपप्रकाशवत्त्वात्। नचेद् ब्रह्मणोऽप्यावरणं न स्यात्। अनावृताभिन्नत्वादिति चेत्—न। अस्ति तावच्चैतन्यव्यवहारादानन्दव्यवहारस्य भेदः, प्रवृत्तिनिमित्तभेदात्। आनन्दपदे वृत्तिगतानन्दत्वमेव प्रवृत्तिनिमित्तम्। ज्ञानपदेऽपि वृत्तिगतं ज्ञानत्वमेव प्रवृत्तिनिमित्तम्। तदात्मतयाऽभिव्यक्तब्रह्मस्वरूपे ज्ञानत्वानन्दत्ववैशिष्ट्यप्रतीतिः। ततश्च आनन्दो नास्ति न प्रकाशत इति व्यवहारानुभवात् तद्योग्यत्वमस्तीति आनन्दरूपेण आवृतत्वं चैतन्यं नास्ति न प्रकाशत इति व्यवहारानुभवाभावेन न तद्योग्यतेति चैतन्यरूपेण अनावृतत्वं तस्मादेकमेव निरंशं निरतिशयानन्दैकरसं चैतन्यमावृतमनावृतं चेत्युपपद्यते। अथवा चिन्मात्राश्रयादज्ञानात् अनादिचिदानन्दभेदाध्यासादज्ञानमानन्दमावृणोति न चैतन्यमिति व्यवस्था॥

नन्वेवमपि गुञ्जापुञ्जारोपाधिष्ठानदहनवत् स्वप्रकाशे आनन्दात्मनि ब्रह्मणि अनवभासारोपेऽपि तदुचितं कार्यं स्यादिति चेत्। किं तदुचितं कार्यम्। अविद्या निवृत्तिर्वा नास्तीति व्यवहारविच्छेदो वा अहमनतिशयानन्द इति व्यवहारो वा सुखेच्छया पुत्रादिक्षुद्रविषयानन्वेषणं वा, आत्मनि [१]प्रेम वा तृप्तिर्वा, नाद्यद्वितीयौ। स्वरूपस्फुरणस्य अविद्यासाधकस्य अविद्यातत्कार्याविरोधित्वात्। न तृतीयः। अविद्यावरणेन प्रतिबद्धत्वात्। न चतुर्थः—स्वरूपस्य नास्तीत्यादिव्यवहारयोग्यता प्रतियोगित्वेन पुत्रादेश्च सुखजनकत्वभ्रमेण तदुपपत्तेः। पञ्चमस्त्विष्यते—नापि षष्ठः—इदानीं स्फुरतोऽपि आनन्दस्य नास्ति न प्रकाशत इति व्यवहारयोग्यता प्रतियोगितया अस्ति प्रकाशत इति व्यवहारयोग्यताया अभावेन वा नष्टस्वीयसुखवदाविद्यकभेदप्रतियोगितया वा पुरुषान्तरवदिच्छाविरोधितालक्षणतृप्तिरूपताया अभावात्। तस्मात् ब्रह्मणोऽनाद्यविद्यावरणे न काप्यनुपपत्तिरिति॥

---

१. प्रियावाप्ति.

अनुमानप्रयोगः ॥

प्रयोगश्च—अहं ब्रह्मेति व्यवहारसामग्रीसंपन्नः प्रत्यागात्मा अहं ब्रह्मास्मीतिव्यवहारप्रतिकूलधर्मवान् तत्सामग्र्यां च सत्यां तदभाववत्त्वात्। तद्विपरीतव्यवहारवत्त्वाद्वा। यथा भ्रमगृहीतशुक्तिकेति ॥

उच्यते—ब्रह्मणः स्वप्रकाशत्वादेव अस्ति प्रकाशत इति व्यवहारयोग्यतायाः [१]सर्वदा विद्यमानत्वेन तदभावः कथं भवेत्। यदुक्तं चैतन्यावेद्यत्वमेव स्वप्रकाशत्वं न त्वपरोक्षव्यवहारयोग्यत्वमपि स्वप्रकाशत्वघटकमिति। तन्न—तथा सत्यावरणकल्पनावैयर्थ्यात्। चैतन्यावेद्यत्वं च न स्वपदार्थः, नापि प्रकाशपदार्थः, नापि वाक्यार्थः। अतः स्वविषयत्वं स्वाधीनव्यवहारयोग्यता वा स्वप्रकाशता स्यात्। तत्सत्त्वे च कथं व्यवहारयोग्यताविरहः। अस्तुवेत्यादिपक्षान्तरमप्यनुपपन्नम्। विरोधिस्वरूपप्रकाशावरणेन विना आवरणाध्यासानुपपत्तेः। अनादित्वोक्तिरविद्यातत्संबन्धावरणानां अनुपपत्तिमेव सर्वकालेऽपि दृढीकरोति। कादाचित्कत्वे हि कारणमाहात्म्यादुत्तेजकत्वेन वा कथंचिदुपपद्येत। तदनङ्गीकारे च विरोधिनोऽनादित्वात् सर्वस्मिन्नपि काले अविद्यादेरसिद्धिरेव स्यात्। अन्यथा भावाभावयोरपि अनादिभूतयोस्सहावस्थानमेकत्र प्रसजेत्। विरोधाभावे च नावरणकल्पनोपपत्तिः ॥

किञ्च—ज्ञानं ह्यज्ञाननिवर्तकमितीष्यते। तथा च ज्ञाने सति कथं निवृत्त्यभावः सङ्गच्छते। न चावरणेन प्रतिबन्धादविद्यानिवृत्यभावादविद्यावरणयोरुपपत्तिः। तस्य ज्ञानेन निवृत्तेर्वाच्यतया उक्तदोषानिवृत्तेः ॥

किञ्च—एवमनादित्वेन [२]परिहारे घटाद्यध्यासेऽपि नावरणापेक्षा। प्रवाहानादित्वेन परिहारात्। पूर्वपूर्वाध्यासस्य उत्तरोत्तराध्याससिद्धये उत्तेजकत्वकल्पना संभवात्। युक्तं चैतत्। पूर्वाध्यासस्य सिद्धत्वात् अध्यासस्य भेदवासनासापेक्षत्वाङ्गीकाराच्च। न त्वावरणं कल्पनीयम्। गौरवात् ॥

किञ्च—ब्रह्मण आवरणे साक्षिणोऽप्यावृतत्वात जगदान्ध्यप्रसङ्गः ॥

---

१. सर्वदा सत्त्वेन. २. व्यवहारे.

यच्च अस्ति तावदित्यादिना आनन्दप्रकाशयोरावरणानावरणोपपादनं—तद्नुपपन्नम्। प्रकाशोऽस्ति प्रकाशते, आनन्दो नास्ति, न प्रकाशत इति व्यवहारवैषम्यं तावदसिद्धम्। तत्तद्वृत्तिदशायां तदस्तितान्व्यवहारात्॥

किञ्च—आनन्दवृत्तिदशायां नावरणम्। तदभाववृत्तिदशायां अस्फुरणेन व्यवहाराप्रसङ्गादेव नावरणम्। आनन्दत्वज्ञानत्वयोः वृत्तिगतत्वे ज्ञानानन्दादिपदानामपि तत्रैव व्युत्पत्तौ 'सत्यं ज्ञानम्' 'विज्ञानमानन्दं' 'आकाश आनन्दः' इत्यादि पदानामयोग्यार्थता स्यात्। ब्रह्मणः प्रकाशानन्दरूपतायाः असिद्धेः मोक्षस्यापुरुषार्थता। आनन्दादिवृत्त्यभेदबोधने भ्रमजनकता—अयोग्यत्वात् [१]बाधार्थता वा सामानाधिकरण्यस्य स्यात्॥

किञ्च—एवमानन्दावरणे ब्रह्मावरणसिद्धान्तभङ्गः। तस्मादेकमेवेत्युपसंहारे आनन्दैकरसं चैतन्यमित्युपसंहारो व्याहतः। वृत्योर्भिन्नत्वात्। वृत्तेः निरतिशयानन्दत्वकीर्तनमपि व्याहतम्। कस्यां चित् तादृशत्वसंभवे संसारस्यैव परमपुरुषार्थता स्यात्। एतेनानन्दवृत्तिविशिष्टरूपेणावरणमित्यपि दत्तोत्तरम्। तत्त्वज्ञानेनाविद्यानिवृत्तौ निरतिशयसुखवृत्तेरेवासंभवात्। तादृशपुरुषार्थस्यासिद्धिः॥

ननु—प्रेमास्पदत्वेनात्मनस्सुखत्वसिद्धिरवर्जनीया। तथाहि—चन्दनादिजन्यसुखवृत्तावात्मनि च [२]प्रेम तावदविशेषेणैव दृश्यते। तत्र च नोभयं प्रयोजकम्। गौरवात्। नच वृत्तिः प्रयोजिका। आत्मनि प्रेमविरहप्रसङ्गात्। तस्मादात्मसुखमेव प्रेमप्रयोजकम्। चन्दनादिजन्यसुखमपि तदभेदाध्यासात् प्रेमगोचरः। अतस्सुखपदस्य विशिष्टशक्तत्वेपि स्वरूपानन्दसिद्धेर्न वैकल्यमिति चेत्—न। आनन्दाभेदाध्यासाद् वृत्तेः प्रेमप्रयोजकत्वे विश्वस्यैव प्रेमास्पदत्वप्रसङ्गात्। अन्ततस्सुखदुःखयोरप्यविशेषः प्रसज्यते। कृत्स्नस्यापि सदभेदाध्यास एवानन्दाभेदाध्यासः। कस्यचिद्वृत्तिविशेषस्य तदभेदाध्यासः, कस्यचित् ज्ञानाभेदाध्यासः, इत्यादि दुर्भाषणं जडानां पुरत एव शोभते। सदानन्दज्ञानभेदानङ्गीकारात्॥

किञ्च—सुखाभेदस्य प्रेमप्रयोजकत्वे प्रेमतारतम्यं न स्यात्। स्वरूपसुखे तारतम्यासिद्धेः। अतो वृत्तीनामेव तरतमभावात् तत्प्रयुक्तप्रेमतारतम्यं वाच्यम्।

१. सिद्धार्थ, बाधितार्थ. २. प्रेमा तावदवि.

अतो वृत्तीनां सुखत्वावश्यंभावात् स्वत एव प्रेमास्पदत्वं न त्वन्यप्रयुक्तम् । अतो वृत्यभेदादात्मनि प्रेमेति वैपरीत्यमेव स्यात् । सुखाभावदशायामात्मनि प्रेम 'जीवन् भद्राणि पश्यतीति न्यायेन कादाचित्कभाविसुखाभेदात् स्यात् । तस्मान्न प्रेम-बलादात्मन आनन्दरूपतासिद्धिः । एवं च शब्देनैवानन्दरूपतासिद्धिर्वाच्या । तत्र वृत्तेः, वृत्तिविशिष्टस्य वृत्त्युपहितस्य वा सुखपदमुख्यार्थत्वे स्वरूपस्य सुखात्मता कुतस्सिध्येत् । एतेन विशिष्टशक्तस्य पदस्य समानाधिकरणपदानामेकार्थत्वानुसारेण विशेष्यलक्षणायामपि स्वरूपसुखसिद्धिर्भवत्येव, विज्ञानमानन्दमित्यादिभिरिति निरस्तम् । प्रवृत्तिनिमित्तविशिष्टशक्तस्य प्रवृत्तिनिमित्ताश्रयस्वरूप[१]लक्षकत्वे स्वरूप[२]सुखलाभे युक्तेऽपि प्रवृत्तिनिमित्तस्य वृत्तिगतत्वे तल्लाभायोगात् ॥

वस्तुतस्तु—प्रवृत्तिनिमित्तस्य स्वरूपगतत्वाङ्गीकारेऽपि न स्वरूपस्यानन्द-रूपतासिद्धिः । प्रमाणान्तरेण प्रवृत्तिनिमित्तवैशिष्टये सिद्धे हि तद्विशेष्यलक्षणाया-मपि यथामानं तत्स्वरूपसिद्धिस्स्यात् । इह त्वानन्दस्वरूप[३]लाभे न मानान्तरमस्ति । अतो विज्ञानमानन्दमित्यादिवाक्यमेव तत्र मानं वाच्यम् । न च तत् प्रवृत्तिनिमित्त वैशिष्ट्य[४]बोधकमितीष्यते [५]किं तु स्वरूपलक्षकमिति । न च प्रवृत्तिनिमित्तवैशिष्ट्य-मन्येन प्रतीयते—येन तद्विशेष्यलक्षणया स्वरूपमानन्दरूपं स्यात् । तस्माच्चन्दनादि-जन्यवृत्तौ आत्मनि च यावदेकं सुखपदप्रवृत्ति[६]निमित्तमनुग[७]तं नेष्यते न ताव-दात्मन आनन्दरूपतासिद्धिरिति ॥

यच्च चिदानन्दभेदाध्यासादावरणव्यवस्थोपपादनं तदपि न । आनन्दा-वरणे हि प्रेम न स्यात् । ततश्च त्वया परमप्रेमास्पदत्वेन आनन्द[८]रूपतासाधनं व्याहन्यते ॥

किञ्च—यदि भेदः कल्प्यते तर्हि तस्य आवरणं किमर्थम् । तत एवाप्रती-त्युपपत्तेः। ननु भेदे सिद्धे तदधीननिरुक्तयोग्यत्वायोग्यत्वयोरपि सिद्धेर्न तन्निवारयितुं शक्यम् । अतस्तस्यावरणशब्दार्थत्वकल्पने को दोष इति चेत् अवश्यकल्पनीयो[९]प-

---

१. लक्षण. २. सुखा. ३. लाभो न मा. ४. बोधन. ५. किं नस्व. ६. प्रवृत्त-मनुगतेन तावदा. ७. गतमेकं नेष्यते न ताव. ८. रूपसाधनता. ९. जीव्यकादिक एव.

जीव्यातिक्रम एव दोषः। न हि आवरणकार्यतयाऽभिमतस्य भेदादेवोपपत्तावावरणकार्यत्वकल्पनं त्वदभिमतस्यावरणत्वकल्पनं च युक्तम् ॥

किञ्च—[१]पक्षद्वयेपि स्वाभाविकापरोक्षव्यवहारयोग्यतया स्वाभाविकाभेदेन च तत्कार्यमवर्जनीयम्। किं तत् कार्यं अविद्यानिवृत्तिस्ताव[२]त्तथा तदा नास्तीति व्यवहारविच्छेदश्च। न चाविद्यासाधकत्वादनिवर्तकता—तत्त्वज्ञाना[३]दनिवृत्तिप्रसङ्गात्। स्वरूपस्यै[४]व तत्त्वात्। नच चरमवृत्तिर्निवर्तिका। जडत्वात्। वृत्तेरेवाज्ञानविरोधित्वे आवरणकल्पनं व्यर्थम् ॥

किञ्च—प्रकाशस्याविद्यातत्कार्यविरोधित्वाभावे अध्या[५]सार्थावरणकल्पनानुप[६]पत्तिः एवं अहं निरतिशयानन्द इति व्यवहारोऽपि कार्यः—निरतिशयत्वस्याज्ञानादव्यवहारे तस्य स्वरूपातिरेके सत्यत्वे अद्वैतहानिः। मिथ्यात्वेऽनावरणापेक्षा। आनन्दस्वरूपावरणे[७]च दोष उक्तः। क्षुद्रविषयान्वेषणमपि कार्यम्। नास्तीति व्यवहारयोग्यत्वाभावस्य भ्रमाभावस्यापि कार्यतया तद्योग्यत्वस्य भ्रमस्याप्यसंभवेन ताभ्यामेत[८]त्कार्याभावोपपादनासंभवात् ॥

किञ्च—सुखजनकत्वभ्रमः कथं निरतिशयानन्दानुभवे जाग्रति पुत्राद्यन्वेषणं प्रयोजयेत्। प्रेमापि कार्य एव। [९]यदत्रेष्यत एवेत्युक्तम्—तद्व्याघातमौढ्यात्। आनन्दावरणं ह्युपपाद्यते। अतः कथं तत्प्रकाशा[१०]धीनप्रेमेष्टिः। [११]तदिष्टौ च तद्वदेव सर्वमपि कार्यं [१२]दुर्निवारम्। तृप्तिरपि कार्यैव। अस्तीति व्यवहारयोग्यताया नास्तीति व्यवहारयोग्यताभावस्य च [१३]कार्यतया तदभावाभ्यां तृप्त्यभावोपपादनासंभवात्। आविद्यकभेदस्य स्वाभाविकाभेदकार्याविरोधस्य प्रेमाङ्गीकुर्वताऽङ्गीकारेण [१४]स्वाभाविकाभेदकार्यनिवृत्त्यसंभवात्। यदि काल्पनिक[१५]भेदान्न तृप्तिकार्यं तर्हि तत एव प्रेमापि न स्यात् ॥

---

१. पक्षावयवेऽपि. २. तथा, तदा. ३. दर्भावृत्ति. ४. सत्वात्. ५. सार्थानुप. ६. रेव हानिः. ७. स एव दोषः। क्षुद्र. ८. कार्यभाव. ९. यदत्रेष्ट एवे. १०. धीने. ११. तदधीनेष्टौ. १२. दुर्वारम्. १३. कार्यतदभा. १४. स्वाभाविकाभेदकाल्पनिकभेदान्न. १५. भेदमात्रान्न.

ननु---अपरिच्छिन्नानन्दस्यैवावरणम् । नतु परिच्छिन्नस्य जीवानन्दस्येति चेन्न । अनवच्छिन्नत्वपदेन निरतिशयत्वविवक्षायां सत्यमिथ्याविकल्पेन दोष उक्त एव । तत्पुरुषीयान्तःकरणावच्छिन्नप्रदेशविवक्षायां तत्प्रकाशोऽपि भिन्न एवेत्यानन्दे को विशेषः ॥

किञ्च—प्रकाशानन्दभेदकल्पने किं मानम् । आवरणान्यथानुपपत्तिरेवेति चेत् । आवरणस्यैवेदानीं सन्देहात् । 'अज्ञानेनावृतं ज्ञान'मिति तु [१]ज्ञानस्यैवावरणमाह, नानन्दस्य । अस्तु वा भेदाध्यासः । अथापि नावरणानावरणव्यवस्था । चन्द्रभेदाध्यासेऽपि प्रकृष्टप्रकाशत्ववर्तुलत्वादेर्व्यवस्थाया अदर्शनात् । [२]चन्द्रे द्वित्वारोपे तत्र सव्यदक्षिणव्यवस्था दृश्यत इति चेन्न । असिद्धेः । एकस्मिन्नेव चन्द्रे द्वित्वचन्द्रप्रतियोगिकसव्यदक्षिणत्वानामारोपात् । नन्वयं चन्द्रो दक्षिण एव । न वामः । अयं चन्द्रो वाम एव । न दक्षिण इति प्रती[३]तेर्व्यवस्थाऽस्त्येवेति चेन्न । उपाधिमाहात्म्याच्चन्द्रनिरूपितसव्यत्वदक्षिणत्वाभ्यां तत्र विद्यमानाभ्यां सह चन्द्रनिरूपितसव्यत्वदक्षिणत्वयोर्ग्रहे सव्यत्वाभावेन दक्षिणत्वस्य दक्षिणत्वाभावेन सव्यत्वस्य सामानाधिकरण्यरूपस्य वा अवच्छेद्यावच्छेदकभावस्य वा संबन्धस्य ग्रह[४]णात् व्यवस्थाया असिद्धेः । यद्यपि सव्यदक्षिणत्वतदभावानां परस्परसामाधिकरण्यमविशिष्टम् । तथाऽपि उक्तरीत्या प्रतीतिवैचित्र्योपपत्तिरूपोपाधिमाहात्म्यादुक्तप्रकारातिरेकेण च नोक्ता प्रतीतिर्निर्वहति ॥

ननु—अस्तु अर्थव्यवस्थयैव तत्प्रतीतिनिर्वाहः । अनिर्वचनीयव्यवस्थायास्संभवादिति चेन्न । व्यवस्था हि नाम—एकस्य चन्द्रस्य सव्यत्वदक्षिणत्वाभावाश्रयत्वम् । अपरस्य दक्षिणत्वसव्यत्वाभावाश्रयत्वं च । [५]न चेयं व्यवस्था संभवति । एकस्यैव चन्द्रस्य प्रातिभासिकभेदसव्यत्वदक्षिणत्वाश्रयत्वात् । यद्येवमपि भेदसामानाधिकरण्यमात्रात् व्यवस्थेत्युच्येत, तर्हि स्वाभाविकाभेदसामानाधिकरण्यादव्यवस्था किं न स्यात् ॥

---

१. ज्ञानावरण. २. चन्द्रद्वित्वा नरापि तत्र. ३. तिव्यव. ४. णाव्यवस्था.
५. नचैवं व्यवस्थासंभवः.

किञ्च—एवं सति सव्यत्वाश्रयात् दक्षिणत्वाभावाश्रयस्य भिन्नत्वात् विपरीतव्यवस्था प्रसज्यते। ननु चन्द्रे [१]एकत्वद्वयं प्रातिभासिकमुत्पद्यते। तत्र एकेनैकत्वेन समानाधिकरणतया दक्षिणत्वमनिर्वचनीयमुत्पद्यते। अपरेणैकत्वेन समानाधिकरणतया सव्यत्वमिति व्यवस्थोपपत्तिरिति चेन्न। अप्रातिभासिकेन क्लृप्तेन चन्द्रगतेन एकेनैवैकत्वेन प्रकृतप्रतीत्युपपत्तौ तदतिरिक्तप्रातिभासिकैकत्वद्वयोत्पत्तौ कल्पकाभावात् ॥

किञ्च—एकत्वद्वयोत्पत्तावपि नेष्टसिद्धिः। सामानाधिकरण्यं हि अयमेकश्चन्द्रो दक्षिणः, अयमेकश्चन्द्रस्सव्य इति प्रतीतिसिद्धम्। [२]तच्चैकत्वाश्रयचन्द्राधिकरणत्वमेव। तादृशं च [३]सामानाधिकरण्यमुभाभ्यामप्येकत्वाभ्यां सव्यत्वदक्षिणत्वयोरविशिष्टमिति कुतो व्यवस्था ॥

किञ्च—एवं सति कल्पितभेदेन व्यवस्थासिद्धया स्वाभाविकाभेदस्य [४]कार्यकरत्वाभावे जीवब्रह्मणोः कल्पितभेदसत्त्वेन तत एव जीवस्य [५]ब्रह्माभेदप्रतिसन्धानाभावोपपत्तौ किमावरणकल्पनेन। नचावरणकृत एव भेदः। तथा सति घटावच्छिन्नचैतन्यस्य रसावच्छिन्नचैतन्याद्भेदे गुणगुणिनोस्तादात्म्यभङ्गः। अस्तु वा सव्यत्वदक्षिणत्वयोः कल्पितयोः यथाप्रतीति भिन्नाधिकरणयोः व्यवस्था। अस्तु च ब्रह्मणि भेदकल्पने कल्पितावरणस्य एकब्रह्मगतत्वमेव। न त्वितरब्रह्मगतत्वमिति व्यवस्था। चन्द्रगतसव्यत्ववत्। तथाऽपि अकल्पितमनावरणं कथं व्यवस्थास्यते। अनावरणमपि कल्पितमिति व्यवस्थोपपत्तिरितिचेत्—न। किं स्वरूपस्यावरणे स्वाभाविके सत्येवावरणं कल्प्यते। उत [६]तादृशे अनावरणे। आद्ये [७]आविद्यकावरणकल्पनं व्यर्थम्। अत एव न द्वितीयोऽपि। स्वाभाविकानावरणसत्त्वे तत्कार्यव्यवहारादेरावश्यकत्वात्। स्वाभाविकानावरणस्य [८]न व्यवहारादिप्रयोजकत्वं किन्तु कल्पितानावरणस्यैव इत्युक्तौ तदेव कल्पनीयम्। न त्वावरणम् ॥

---

१. चन्द्रैकत्वद्वयम्. २. न चैकत्वाश्रय, तद्धेतुकत्वाश्रय. ३. तादृशं च सामानाधिकरण्यमुद्देश्यानुद्देश्याभ्यां सव्यदक्षिणत्वयोरविशिष्टम्।. ४. कार्यकारणत्वाभावादेव. ५. ब्रह्मभेद. ६. तादृशानावरणे. ७. अविद्यावरण. ८. न व्यवहा.

किञ्च—स्वाभावि[१]कानावरणसत्त्वे तत्रानावरणकल्पनमनुपपन्नम् । अनावरणप्रतीतेस्सिद्धविषयत्वोपपत्त्या कल्पकत्वासिद्धेः। अस्तु वा [२]कल्पनम्, अस्तु च भेदकल्पनया सव्यदक्षिणत्वयोश्चन्द्रद्वय इव इहापि ब्रह्मभेदकल्पनया ब्रह्मद्वये कल्पितावरणानावरणव्यवस्था, तथाऽप्यकल्पितचन्द्रवर्तुलप्रकृष्टप्रकाशस्वरूपवदिहाप्यकल्पितब्रह्म[३]प्रकाशानन्दस्वरूपाणां ब्रह्मद्वयसाधारण्यात् कथं च प्रकाशानन्दयोरावरणानावरणव्यवस्था,सव्यत्वदक्षिणत्वयोश्चन्द्रद्वये व्यवस्थायामपि चन्द्रप्रकृष्टप्रकाशस्वरूपयोर्व्यवस्थाया अदर्शनात् । अथ चन्द्रे प्रकृष्टप्रकाशप्रतियोगिकभेदस्य अकल्पनात् स्वरूपद्वयमपि चन्द्रद्वयसाधारणमिति युज्यते, इह त्वानन्दप्रतियोगिकभेदस्य प्रकाशेऽकल्पनान्न तयोस्साधारण्यमिति चेत्—हन्त तर्हि उत्सन्नमद्वैतम् । प्रकाशानन्दयोस्स्वाभाविकभेदाभावे एवं कल्पनानुपपत्तेः । प्रकाशानन्दयोरभेदे आनन्दप्रतियोगिक [४]एव प्रकाशप्रतियोगिकोऽपि । चन्द्रस्य चन्द्रात् प्रकृष्टप्रकाशस्य प्रकृष्टप्रकाशादिव प्रकाशात् प्रकाशस्य, आनन्दादानन्दस्य भेदसिद्धेः । ननु आनन्दत्वं प्रतियोगितावच्छेदकं, प्रकाशत्वमधिकरणतावच्छेदकम् । एवं च आनन्द[५]भेदवान् प्रकाश इति व्यवस्थेति चेन्न । आनन्दत्वस्य प्रतियोगितावच्छेदकत्वेऽपि [६]तदभिन्नस्य प्रकाशस्य प्रतियोगित्वानपायात् । आनन्दस्याधिकरणत्वानपायाच्च । अतो न कथंचिदपि व्यवस्थासंभवः ॥

किञ्च—किमियं व्यवहारयोग्यता—दण्डादेरिव स्वरूपयोग्यता, उत फलोपधानमेव, उत सहकारिसंपत्तिः, उत त्रितयबहिर्भूता काचित् । नाद्यः—पूर्णानन्दे अस्ति प्रकाशत इति व्यवहारस्य यदाकदाचित् सत्त्वे स्वरूपयोग्यतायास्सत्त्वेन तद्विरहस्य कदाप्यसंभवात् । तादृशव्यवहारस्य कदाप्यसत्त्वे स्वत एव तद्योग्यताविरहात न तस्याविद्याधीनता, स्वरूपानु[७]बन्धित्वात् । नास्ति न प्रकाशत इति व्यवहारस्य कदाचित् सत्त्वे तद्योग्यतायाः स्वरूपानु[८]बन्धितया नाविद्याधीनता । तादृशव्यवहारस्य कदाप्यसत्वे तद्योग्यतायास्तुच्छतया न कदाचिदपि[९]तत्संभवः ॥

---

१. कानवधारण. २. कल्पकम्. ३. प्रकाशानन्द–प्रकाशानन्त. ४. एवमप्र.
५. भेदः. ६. तदवच्छिन्नस्य. ७. बुद्धित्वात्. ८. बुद्धितया. ९. तत् सम्बन्धः.

न द्वितीयः—तत्राविद्यया नास्ति न प्रकाशत इति व्यवहारो भवति। अस्ति प्रकाशत इति व्यवहारः [१]प्रतिबध्यत इति ह्यर्थः। तथा च पूर्णानन्दप्रकाशे [२]निष्परिपन्थिनि जाग्रत्येव विप्रलिप्सयेवाविद्यया नास्ति न प्रकाशत इति व्यवहारः आमवातजडीकृतदेहस्येव अस्ति प्रकाशत इति व्यवहाराभावश्च भवति। किमेताभ्यां प्रयोजनम्। पूर्णानन्दप्रकाशे लेशतोऽपि वैकल्यासिद्धेः। बालस्याम्बातातमातुलादिशब्दवत् पूर्णानन्दोऽस्ति प्रकाशते चेति वदेति केनचिद्राजादिना नियमितस्तथा वदति, तदाऽऽवरणाभावप्रसङ्गः। एतेनोक्तरीत्या अस्ति प्रकाशत इति व्यवहारस्य सत्त्वेन तद्योग्यताविरहो न संभवति इति अस्ति प्रकाशत इति व्यवहारयोग्यताविरह आवरणमिति पक्षेऽपि दोष उद्भावितो भवति, नास्ति न प्रकाशत इति व्यवहाराभावदशायां आवरणाभावप्रसङ्गादेव नावर[३]णात् तद्व्यवहारः॥

नापि तृतीयः—पूर्णानन्दाभावस्य तत्प्रकाशा[४]भावस्य च ज्ञानं, व्यवजिहीर्षा, वागिन्द्रियमित्यादिकं हि व्यवहारकारणम्। इदं किमपि नाविद्याधीनं, सर्वमपि कार्यं तदधीनमित्युक्तौ विशिष्य [५]पूर्णानन्दस्यावरणोपवर्णनं च व्यर्थम्। अस्ति प्रकाशत इति व्यवहारसामग्र्यपि पूर्वोक्तैवेति न [६]तद्विरहोऽविद्याधीनः॥

नापि चतुर्थः—तृतीयबहिर्भूतस्योक्तिबहिर्भावात्। अपि च—प्रकाशानुगुणव्यव[७]हाराभावार्थं निरुक्तायोग्यतारूपमावरणं कल्प्यते, प्रकाशानुगुणव्यवहारे जाग्रति कथं तदयोग्यता कल्प्येत। विद्यते खलु आनन्दविषयोऽहमिति व्यवहारः, अध्यासानु[८]गुण एव व्यवहारः। न तु स्वप्रकाशानुगुण इति चेन्न। स्वव्यवहारस्यापि स्वप्रकाशाधीनतया स्वरूपगोचरतया च तदनुगुणत्वात्। अहमिति व्यवहारोऽपि स्वरूपगोचर एवाहमर्थाध्यासाधिष्ठानत्वात्। स्वरूपस्याखण्डानन्दव्यवहाराभावायावरणकल्पनमिति न। तस्याप्यहमित्येव व्यवह्रियमाणत्वात्। अखण्डानन्द इति व्यवहाराभावायावरणमिति चेत्—तत् किमखण्डप्रकाश इति व्यवहारस्सुप्रसिद्धः। येन प्रकाशावरणं नाङ्गीकरोषि॥

---

१. बन्ध इत्यर्थः. २. निष्प्रतिबन्धिनि. ३. णं तद्व्य. ४. प्रकाराभावस्य यद् ज्ञानम्. ५. वर्णनं तस्या आवरणत्वोपवर्णनम्. ६. तदविरहो. ७. व्यवहारार्थम्, ८. गुणस्वव्यव.

ननु प्रकाशानन्दयोः न तात्पर्यम्। किन्तु अखण्ड एवेति चेत्, किमखण्डत्वं स्वरूपमेव—उत अतिरिक्तम्। आद्ये व्यवह्रियत एव। [1]अखण्डपद प्रयोगस्स्यादिति चेन्न। सर्वैः पर्यायैर्भाषापदैश्च सर्वैर्व्यवहर्तव्यमिति नियमाभावात्। न द्वितीयः—स्वप्रकाशात् तद्व्यवहारासंभवेनावरणस्यावक्तव्यत्वात्। यश्च प्रयोगः—तत्र पक्षे अहं ब्रह्मेति व्यवहारसामग्रीसंपन्न इति विशेषणं व्यर्थम्। नच मुक्तव्यावृत्यर्थं तत्, तदानीमपि स्वप्रकाशतारूपसामग्र्यास्सत्त्वात्। नच तदानीं वागादि सहकार्यन्तरविरहात् सामग्रीवैधुर्यं, तर्हि कुमतिपरिकल्पित[2]दुस्तर्कदुर्नयोपेततत्त्वमस्यादिवाक्यार्थभ्रमदशायामेव तादृशज्ञानसामग्रीति तद्दशायां हेतोरसिद्धिः॥

किञ्च—अद्वैतचरमसाक्षात्कारपर्यन्तमविद्यावरणयोर्वृत्तिरिष्यते व्यवहारश्च श्रवणमारभ्यास्तीति तद्दशायामेवाविद्यावरणनिवृत्तिर्वाच्या। आवरणस्य व्यवहार प्रतिकूलत्वोक्तेः। दृष्टान्ते च शुक्तिपदेन तत्स्वरूपविवक्षायां साधनसाध्यवैकल्यम्। शुक्तिस्वरूपस्य इदमिति व्यवहारात् स्वरूपव्यवहारप्रतिबन्धासिद्धेश्च। शुक्तित्व विवक्षायामपि तथैव। शुक्तित्वज्ञानाभावेन तद्व्यवहारसामग्रीवैकल्यात् तत एव व्यवहाराभावोपपत्त्या व्यवहारप्रतिबन्धकस्याकल्पनीयत्वाच्च॥

इति सद्विद्याविजये तिरोधानभङ्गः॥

---

१. अखण्ड इति प्रयो. २. दुर्भण.

श्री

## सद्विद्याविजये अविद्याश्रयभङ्गः ॥

किञ्च—कोऽयमज्ञानाश्रयः। अत्रापि मुष्टीमुष्टयाचरन्ति ॥

केचिदाहुः—घटाद्यज्ञानं [1]घटादिचैतन्यनिष्ठमेव। अन्यथा तत्र विक्षेपायोगात्। दृश्यते च घटशुक्तिकादौ वल्मीकरजतादिविक्षेपः। नचैवं तस्य साक्ष्यसंबन्धात् अहमिदं न जानामीति कथं प्रतीतिरिति वाच्यम्। अवस्थावस्थावतोरभेदान्मूलाज्ञानस्य अवस्थावतो[2]हङ्कारसमानाधिकरणत्वात्। अवस्थाज्ञानमपि तदनुरक्ततया भाति, इति ॥

अपरे तु—अज्ञानानुभवेऽधिष्ठानचैतन्यप्रमातृचैतन्ययोः वास्तवाभेद एव प्रयोजकः। विषयचैतन्याश्रितस्यापि अज्ञानस्य प्रमातरि स्वरूपसंबन्धविशेषेण शाखाग्रे चन्द्रमा [3]इति प्रतीतिवन्मय्यज्ञानमिति प्रतीतिरिति ॥

एके तु—शुक्त्याद्यज्ञानस्य अहमर्थचैतन्यमाश्रयः। शुक्त्यवच्छिन्नचैतन्यं विषयः। रजतादिकं च अज्ञानचैतन्यविवर्तो नाज्ञानविवर्त इति ॥

केचित्तु—शुक्त्याद्यज्ञानं शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठम्। अहङ्कारावच्छिन्नचैतन्यनिष्ठं च। शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठत्वात् तत्राध्यास उपपद्यते। अहङ्कारावच्छिन्नचैतन्यनिष्ठत्वादहं न जानामीति प्रतीतिश्चोपपद्यत इति ॥

इतरे तु—शुक्तिमहं न जानामीत्यनुभवो मूलाज्ञानविषयः। शुक्त्यनवच्छिन्नचैतन्यस्यैव अज्ञानविषयत्वेऽपि शुक्त्यवच्छिन्नचैतन्यस्य तदभिन्नतया शुक्तेरप्यज्ञान[4]विषयताप्रतीतिरुपपद्यते। रजताद्युपादानमज्ञानं तु कार्यानुपपत्तिगम्यम्। कार्यं तु रजताद्यध्यासः। ज्ञानेनाज्ञानं निवृत्तमित्यनुभवो वेति ॥

---

१. घटाद्यधिष्ठान चैतन्य. २. अहंकारवतो. ३. इति वत्. ४. विषयतया प्रतीति. विषयताप्रतीति.

तत्र न तावदाद्यः—सर्वप्रपञ्चविवर्तोपादानस्याज्ञानस्यैव रजतोपादान[१]त्वसंभवे [२]शुक्त्याद्यज्ञानस्य तदुपादानत्वकल्पनायोगात्। शुक्त्यज्ञानस्यैवोपादानत्वेऽपि प्रमातृगतस्यैवाज्ञानस्य वृत्त्या सह निर्गतस्य रजतोपादानत्वं कल्प्यताम्॥

किञ्च—शुक्त्याद्यज्ञानानामनादित्वाङ्गीकारात् अवस्थात्वासिद्धेः कथं प्रतीत्युपपादनम्। ननु—अवस्थात्वमेवेष्यत इति चेत्—न। तर्ह्यवस्थोपादानं, रजतस्य देवदत्तासाधारण्यसिद्धये हि देवदत्तासाधारणमवस्थाज्ञानमिष्यते। अज्ञानस्य सविषयत्वनियमात्। शुक्तिज्ञाने सति रजताध्यासादर्शनाच्च। शुक्त्यज्ञानं रजताध्यासोपादानमिति कल्प्यते। तन्मूलाज्ञानस्य साधारणत्वात् कथं तज्जन्यावस्थाज्ञानस्यासाधारणत्वम्। तद्धि न देवदत्तगतम्। किन्तु विषयगतमित्युच्यते। व्यधिकरणस्य कथमेतदसाधारणत्वम्। तादृशासाधारणाज्ञानोत्पादानसामर्थ्यं यदि मूलाज्ञानस्येष्यते, तर्हि तस्यैवासाधारणरजतोत्पादनसामर्थ्यं कल्प्यताम्। ततश्च शुक्त्यज्ञानस्यानादित्व एव रजतोत्पादकत्वसिद्धिः। न त्ववस्थात्वे॥

नापि द्वितीयः—शुक्त्याद्यज्ञान[३]प्रकाशासंभवात्। तच्चैतन्यप्रमातृचैतन्ययोर्भेदात्। स्वाभाविकाभेदात्तु विश्वप्रकाशोऽवर्जनीयः॥

किञ्च—चैतन्यस्वरूपयोरभेदादज्ञानप्रकाशेऽपि कथमहमज्ञ इति स्वगततया प्रतीतिः। यदि च चैतन्ययोः स्वरूपाभेदादेव तस्या[४]प्युपपादनं, तदा यज्ञदत्तस्य शुक्त्यज्ञानेऽपि देवदत्तस्य शुक्तिज्ञानात् यज्ञदत्तस्य शुक्तिं जानामीति प्रतीतिप्रसङ्गः, देवदत्तस्य च शुक्तिं न जानामीति॥

ननु—ज्ञानाज्ञानयोरसाधारण्यात् नान्येन ग्रहणप्रसङ्गः इति चेन्न। प्रमातृचैतन्या[५]भेदातिरिक्तग्रहणानिर्वचनात्। शाखाग्रे चन्द्र इति वाक्यमेव न प्रतीतिः। तत्र च शाखापदं देशविशेषं लक्षयति। ततश्च उच्छ्रायविशेषवति देशे चन्द्र इति प्रतीतिर्भवति। न तु शाखायामेव चन्द्र इति प्रतीतिः। अहमज्ञ इति तु प्रतीतिरेव। न तु व्यवहारमात्रम्। अतो न तन्न्यायेन प्रकृतार्थसिद्धिः। ननु मा भूत् तन्न्यायः स्वरूप-

---

१. नत्वेऽपि शु. २. शुक्त्यादि—नायोगात् इदं वाक्यं न-मै. ३. प्रकाशत्वासंभवात्. ४. तस्याप्युत्पादः. ५. भेदाभेदाति.

संबन्धविशेषात्तथा प्रतीतिः स्यात्। अस्ति हि तादृशसंबन्धस्तं प्रत्यावारकत्व-लक्षणः इति चेन्न। मय्यज्ञानमित्यज्ञानाश्रयत्वप्रतीत्यनुसारेण स्वनिष्ठस्यैव मूलाज्ञानस्य विषयावारकत्वस्य अध्यासोपादानत्वस्य असाधारणार्थोत्पादनसामर्थ्यस्य च स्वप्रमा-र्थानुसारेण संभवे विषयावच्छिन्नचैतन्यगतत्वकल्पनायोगात्॥

नापि तृतीयः—चैतन्यस्याधिष्ठानत्वेऽपि परिणामित्वासंभवात्। परिणाम्यन-पेक्षायां मिथ्यार्थान्यथानुपपत्त्या अज्ञानकल्पनं न स्यात्। परिणामिनमनपेक्ष्यापि अनिर्वचनीयोत्पत्तिकल्पनायां सन्निकर्षमनपेक्ष्य भ्रमोत्पादः कुतो न स्यात्। तथा च अनिर्वचनीयोत्सादः॥

नापि चतुर्थः—प्रपञ्चोपादानाज्ञानेनैव रजतोत्पत्तिरित्युक्ततया शुक्त्यज्ञानस्य तद्वृत्तित्वकल्पकासिद्धेः॥

नापि पञ्चमः—मूलाज्ञानस्यैव अहमज्ञ इति प्रतीतिविषयत्वे विषयगता-ज्ञानान्तरासिद्धिप्रसङ्गात्। तस्यैव रजताध्यासहेतुत्वं प्रागेवोक्तम्। नच ज्ञानेनैवा-ज्ञानं निवृत्तमित्यनुभवबलात्तत्सिद्धिः। अस्याः प्रतीतेः परोक्षसाधारणतया ज्ञाना-भावविषयत्वावश्यंभावात्। ज्ञानप्रागभावो न ज्ञाननिवर्त्य इति चेत् प्रतियोगिन एव प्रागभावनिवृत्तिरूपत्वेऽपि घटेन घटाभावो निवृत्त इति तत्प्रागभावस्य निवृत्ततायास्ताद धीन्यात्। तथा प्रतीत्युपपत्तेः।

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः' इत्यत्र अज्ञानशब्दो भ्रमपरः॥

किञ्च—एतावन्तं कालं अहं घटं नावेदिषं इदानीं घटज्ञानेन घटाज्ञानं नष्टम्'इत्यनुभवेन अज्ञाननिवृत्त्यनुभवस्य अहं न जानामीति प्रतीताज्ञानविषयत्वमेवाव-गम्यते। [१]विषयाज्ञानस्य कार्यानुमेयतया अप्रत्यक्षत्वाच्च। तन्निवृत्तेः प्रत्यक्षत्वमनुप-पन्नम्॥

किञ्च—किं मूलाज्ञानं विषयावच्छिन्नचैतन्यावारकम्, उत न। आद्ये तत एव विक्षेपोपपत्तौ विषयगताज्ञानकल्पने मानाभावः। द्वितीये तु—तद्विषयत्वा-नुभवविरोधः॥

१. विषयज्ञानस्य.

ननु—नानुभवविरोधः। घटावच्छिन्नचैतन्यस्य मूलाज्ञानविषयब्रह्माभिन्नतया मूलाज्ञानस्यावच्छिन्नविषयताप्रतीत्युपपत्तेरिति चेन्न। घटज्ञानदशायामपि घटं न जानामीत्यनुभवप्रसङ्गात्। नच घटानुभवः प्रतिबन्धक इति वक्तुं शक्यम्। अज्ञानानुभवात्मकस्य चैतन्यस्य अज्ञानविषयावच्छिन्नचैतन्ययोरभेदस्य च तदानीमप्यविकलत्वात्॥

किञ्च—न जानामीति प्रतीयमानस्य मूलाज्ञानस्य अन्तःकरणमाश्रयः, उत चैतन्यम्—नाद्यः। जडत्वात्। न द्वितीयः—स्वयं प्रकाशमानस्य चैतन्यस्य स्वगोचराज्ञानवत्त्वायोगात्॥

ननु—न ब्रह्मण्यज्ञानं कल्प्यते। किन्तु अन्तःकरणावच्छिन्ने। तत्र च तदवश्यं कल्पनीयम्। अशनायाद्यतीताखण्डानन्दाभेदेऽपि तदस्फुरणादिति चेन्न। न ह्यनुपपन्नार्थोपपत्तये अनुपपन्नमनुपपादकं च किञ्चिदर्थान्तरं कल्पनीयम्। उपपादकत्वेन अभिमतानुपपन्नार्थाभ्युपगमाय प्रवर्तमानराजाज्ञाया उपपाद्यत्वेन अभिमतानुपपन्नार्थ एव प्रवृत्तिसंभवात्। तस्मात् स्वप्रकाशस्य ब्रह्माभेदानुपपत्तौ स्वप्रकाशत्वोपपादक उपपन्नश्च जीवब्रह्मभेद एवाङ्गीकार्यः। न त्वनुपपादकमनुपपन्नं च अज्ञानाश्रयत्वम्। अनुपपन्नत्वानुपपादकत्वे प्रागेवाभिहिते॥

पूर्वपक्षः॥

यदाह नवीनः—भासमानेऽप्यात्मनि अज्ञानं सर्वैरेवाभ्युपगन्तव्यम्। अन्यथा शरीराद्यभेदभ्रमानुपपत्तेः॥

किञ्च—घटादौ प्रमेयवदिति ज्ञानेन [1]घटत्वाद्यवैशिष्ट्यप्रतीतावपि [2]तदज्ञानं दृश्यते। अन्यथा तत्संशयाद्ययोगात्। नच अन्वयव्यतिरेकाभ्यां तत्प्रकारकज्ञानमेव अज्ञानविरोधीति वाच्यम्। अनभ्यासदशापन्ने जलादिज्ञाने सत्यपि तत्संशयानुरोधेन तत्राज्ञानस्य स्वीकर्तव्यत्वात्। सत्तानिश्चयरूपज्ञानमज्ञानविरोधीति चेत् तर्हि ज्ञानमात्रस्य सत्तानिश्चयरूपत्वाभावेन ब्रह्मस्वरूपज्ञानमपि पूर्वं सत्तानिश्चयरूपं न भवतीति न तस्याज्ञानाश्रयत्वं विरुद्धमिति। तन्न—आवरणकल्पनावैयर्थ्यात्॥

१. घटत्वादिवैशिष्ट्यप्रतीतावपि. २. तज्ज्ञानम्.

ननु—आनन्दाप्रकाशार्थमावरणं कल्पनीयम्। अन्यथा अनवधारणेनापि व्यवहारप्रसङ्गादिति चेन्न। यद्यावरणे सत्यनवधारणं न व्यवहारकारणं तदा अनभ्यासदशायां जलानवधारणेन जलव्यवहारो न स्यात्। आवरणा[१]धीनमेवानवधारणमिति चेन्न। आवरणस्य अस्ति प्रकाशत इति व्यवहारयोग्यत्वाभावरूपतया तस्यैव तदधीनत्वात्। अनवधारणत्वमेवावरणमिति चेत् न। अखण्डब्रह्मानन्दाभेदव्यवहारस्य आवरणेन उपपाद्यत्वात् तत्रैवानवधारणत्वस्य वाच्यत्वात्। अस्य च स्वरूपप्रकाशानतिरेकात्। तत्राप्यावरणप्रसङ्गात्। तदनवधारणेऽपि भाविप्रामाण्यसंशयगोचरज्ञानस्थल इव व्यवहारस्य दुर्वारत्वाच्च ॥

किञ्च—स्वरूपमवधारणात्मकमुतानवधारणात्मकम्। नाद्यः—अज्ञानतत्कार्यासंभवात्। अवधारणस्य अज्ञानविरोधित्वात्। न द्वितीयः—पुनरनवधारणत्वकल्पनवैयर्थ्यात्। कदाप्यज्ञानानिवृत्तिप्रसङ्गाच्च। न हि ज्ञानादन्यदज्ञाननिवर्तकम् ॥

ननु—इदानीमनवधारणमेव वृत्त्या[२]पादितावधारणताकं अविद्यां निवर्तयति इति चेन्न। तथा सति आवरणकल्पनावैयर्थ्यात्। ननु—स्वरूपमनवधारणात्मकमेव। तेन विरोधात् अज्ञानासंभवपरिहाराय अनादिभूतं कल्पितमनवधारणत्वमिष्यते। वृत्त्या चावधारणत्वापादने कृते कल्पितानवधारणत्वस्य निवृत्तेरविद्यानिवृत्तिरिति चेत् न। तथा सति स्वरूपस्यावधारणत्वमेव न सिद्ध्येत्। [३]कल्पितावधारणत्वस्यैव अज्ञाननिवर्तकत्वेन स्वरूपस्य तदभावादवधारणत्वकल्पकासिद्धेः। तथा चावरणत्वकल्पनं व्यर्थमेव ॥

किञ्च—एवमनवधारणत्वकल्पनायां प्रकाशेऽनवधारणत्वप्रसङ्गः। आनन्दांश एवानवधारणत्वमिति चेन्न। निरंशत्वात्। नच—प्रकाशानन्दयोर्भेदारोपात्तत्संभव इति वाच्यम्। भेदारोपेऽपि व्यवस्थाविरहस्य प्रागुपपादितत्वादिति ॥

अथ स्यात्—प्रकाशमानेऽपि चैतन्ये अज्ञानं स्यादेव। अनुपपत्तिपरिष्कारत्वादविद्याया इति चेन्न। न हि अविद्यात्वादेवानुपपत्ति[४]परिष्कारता। तथा सति

---

१. णाधीनत्वमनवधारत्वमिति चेन्न. २. वृत्त्यापादिता ननु विद्यांनि. ३. कल्पितावरणस्यैव. ४. परिहारता.

अनुपपन्नार्थानां सर्वेषामपि तत्तत्स्वभावादेवानुपपत्तिपरिष्कारत्वप्रसङ्गात्। किन्तु मिथ्यात्वादेव। ततश्च अहमज्ञ इति प्रतीतेः कथं ज्ञानाभावविषयत्वासंभवः। तस्य मिथ्यात्वादेव अज्ञानवत्। विरोधस्यालङ्कारत्वात्। [1]किं निमित्तं च मिथ्यार्थानुपपत्त्या तदुपपादनायाज्ञानकल्पनं,कुतश्चानुपपत्त्या अज्ञानस्यान्तःकरणाश्रयत्वनिरासः। किं बहुना—एवं सति कृतं तव परस्परव्याहतस्वमतसामञ्जस्यप्रत्याशया श्रमैकफलकुतर्कचिन्ताव्यसनेन ॥

किञ्च—अनुपपत्तेर्मिथ्यालङ्कारत्वमेव, न सत्यालङ्कारत्वमिति क्व दृष्टं पण्डितम्मन्येन। प्रातिभासिकव्यावहारिकयोः दृष्टमिति चेत् तर्हि प्रातिभासिकस्याध्यासार्थमज्ञानकल्पनमावरणकल्पनं च व्यर्थं स्यात्। अविद्याया व्यावहारिकोपादानत्वेन व्यावहारिकत्वात्तदनुपपत्तिरलङ्कारो न स्यात्। व्यावहारिकस्यानुपपत्त्यलङ्कारत्वाभावेन व्यावहारिकोपादानस्य वाच्यत्वात्। ब्रह्मणि परमार्थसती उपपत्त्यपेक्षा, नान्यत्रेति चेन्न। कुमतिपरिकल्पितकुतर्कापादितानुपपत्त्याभासानां प्रपञ्च इव ब्रह्मण्यपि प्रवृत्तेः। संभवति हि तत्राप्यभेदाद्वितीयत्वादिस्वरूपतदतिरेकयोर्भेदवदनुपपत्तिः। एवं प्रमाणसंबन्धोऽपि प्रपञ्च इव अनुपपन्नः। वेदान्तानां मिथ्यात्वाच्च। तत्प्रतिपाद्यब्रह्मणः सत्यत्वं दुर्घटम्। न हि आध्यासिकधूमेन वाताभिघातादिमूलाध्यासिकवाक्येन वाऽर्थसिद्धिः। स्वाप्नवाक्येऽपि यावन्मानान्तरमनाश्वास एवेति वैदिकेऽर्थे [2]मानान्तरासिद्धेर्नित्यमेवानाश्वासः प्रसज्यते ॥

वस्तुतस्तु—सत्य एव स्वप्नार्थः। सृष्टिश्रवणात्। अतस्सत्यस्यैव स्वप्नवाक्यस्य लौकिकवाक्यानामिव मानान्तरसंवादात् प्रामाण्यम्। न च प्रमाणमिथ्यात्वस्वरूपयौक्तिकबाधे जाग्रति बाधाभावात् प्रामाण्यं सूपपादम्। ननु नास्त्यत्र यौक्तिकबाधः। प्रमाणसत्यत्वमिथ्यात्वयोः अर्थसत्यत्वमिथ्यात्वयोरप्रयोजकत्वात् सत्यादपि हि भ्रान्तविप्रलंभकवाक्यात् न सत्यार्थसिद्धिः। क्वचित् स्वाप्नवाक्यादपि नासत्यार्थसिद्धिः। तस्मात्प्रमाणस्य सत्यत्वे मिथ्यात्वे च [3]बाधाबाधयोरेवार्थमिथ्यात्व-

---

१. किं निमित्तत्वं च मिथ्यात्वानुपपत्त्या किं निमित्तम्. २. मानान्तरासिद्धेः.
३. बाधयोरेवार्थमिथ्यात्वसत्यत्वप्रयोजकता.

सत्यत्वप्रयोजकता, ब्रह्मणि च न बाधो दृश्यते। नच सर्वशून्यवादिवाक्येन बाधः। तस्य भ्रमविप्रलिप्सामूलत्वात्। वेदस्यातथात्वात् इति चेन्न। भ्रमविप्रलिप्सामूलत्वाभावेऽपि धर्मादिप्रतिपादकवाक्यानां बाधितार्थकत्वाङ्गीकारेण तव मते वैदिकवाक्यानां शून्यवादिवाक्याद्वैषम्यासिद्धेः। ततश्च तद्विरोधेन शून्यवादिवाक्यानां भ्रममूलकत्वकल्पनमसंभवि ॥

किञ्च—अज्ञानस्य चैतन्यमात्राश्रयत्वे जीवे संसारहेतुता न स्यात्। वैयधिकरण्यात्। चैतन्यस्यैव जीवेशविभागात्। सामानाधिकरण्ये ईश्वरस्यापि संसारप्रसङ्गः ॥

अत्रापि विप्रतिपद्यन्ते—केचिदाहुः अन्तःकरण एव सुखदुःखानुभवरूपो बन्धः। नचैवं भोक्तृत्वकर्तृत्वादिसंबन्धस्य चैतन्यसामानाधिकरण्यानुभवविरोधः। अन्तःकरणस्य चेतनतादात्म्येनाध्यस्ततया तद्धर्माणां चैतन्यसामानाधिकरण्येनानुभवोपपत्तेः। नचैवं चेतनः संसारी न स्यादिति वाच्यम्। अहङ्काराध्यासाधिष्ठानत्वस्यैव आत्मनि बन्धरूपत्वात् कर्तृत्वाद्यनर्थाश्रयान्तःकरणतादात्म्यादेवात्मनोऽनर्थाश्रयत्वाभिमानोपपत्तेरिति ॥

अन्ये तु—अन्तःकरणागतः चैतन्यप्रतिबिम्बरुपो बिम्बाद्भिन्नः असत्यश्चिदाभासःबन्धाश्रयः। नच बन्धमोक्षयोः वैयधिकरण्यम्। अन्तःकरणावच्छिन्ने स्वरूपतः सत्यतया मुक्त्यन्वयिनि परमार्थजीवे अध्यस्ततया तदधिष्ठानभावस्यैव सत्यजीवे संसारत्वादिति ॥

परे तु—अन्तःकरणविशिष्टो जीवः तत्रैव संसारः। नच विशिष्टस्य संसारः, शुद्धस्य मोक्ष इति बन्धमोक्षयोर्वैयधिकरण्यम्। विशिष्टगतस्य बन्धस्य विशेष्येऽन्वयाभावात् विशिष्टस्यानतिरेकादिति ॥

अपरे तु—केवलश्चेतन एव कर्तृत्वादिबन्धाश्रयः कर्तृत्वाद्याश्रयान्तःकरणसन्निधानात् कर्तृत्वान्तराध्यासोपपत्तिरिति। नच चेतनस्यैकत्वात् व्यवस्थानुपपत्तिः। उपाधिभेदेन तदुपपत्तेः। नच अन्यभेदादन्यत्र विरुद्धधर्मव्यवस्था नोपपद्यत इति वाच्यम्। मूलाग्रोपाधिभेदमात्रेण वृक्षे संयोगतदभावव्यवस्थादर्शनादिति ॥

इतरे तु—चेतन एव उपाधिवशात् भेदकल्पना। तत एव च व्यवस्था, मणिकृपाणाद्युपाधिकल्पितेन भेदेन मुखे श्यामावदातवर्तुलदीर्घभावादिधर्माणामङ्गुल्यवष्टंभोपाधिकल्पितेन भेदेन चन्द्रे औत्तरत्वदाक्षिणात्यभावादिधर्माणां च व्यवस्थादर्शनादिति ॥

उच्यते—न तावदन्तःकरणगतो बन्धः। चेतनस्य संसारित्वानुपपत्तेः अन्तःकरणतादात्म्याध्यासेन स्वस्मिन्नर्थाश्रयत्वाभिमानात् तस्यैवाभिमानस्य दोषत्वे किमर्थोऽन्तःकरणे संसाराङ्गीकारः। 'ह्रीर्धीर्भीः इत्येतत्सर्वं मन एवे'त्यस्य मनःकार्यपरत्वात् न तद्वाक्यमन्तःकरणस्य संसारित्वे मानम् ॥

एतेन चिदाभासे संसार इति पक्षो निरस्तः। अस्मिन्नपि पक्षे तत्तदात्म्याध्यासेनानर्थाश्रयत्वाभिमानस्योक्तेः ॥

नापि तृतीयः। विशेष्ये संसाराङ्गीकारे विशेषणे तदङ्गीकारस्य व्यर्थत्वात्। नच 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'। इति विशिष्टसंसारे मानम्। तेन भोगसहकारिप्रतिपादनात्। अन्यथा इन्द्रियविशिष्टस्य भोक्तृत्वापत्तेः ॥

नापि चतुर्थः—अहमित्यन्तःकरणतादात्म्याध्यासस्य आवश्यकतया तत एव कर्तृत्वाभिमानोपपत्तौ कर्तृत्वान्तराध्यासकल्पनाया व्यर्थत्वात्। अस्य च प्रथमं जडस्य कर्तृत्वात् बन्धाश्रयत्वानुपपत्तेः, 'कर्ता शास्त्रार्थवत्त्वात्' इति चेतनस्यैव तदाश्रयत्वसूत्रणाच्च, अन्तःकरणस्य बन्धोऽनुपपन्नः। इति द्वितीयो दूषयति ॥

द्वितीयं 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रवणाद्विशिष्टस्यैव बन्ध इति तृतीयो दूषयति। तृतीयं केवल एव कर्तृत्वाध्यासोपपत्तेः न विशिष्टेसंसार इति चतुर्थो दूषयति। चतुर्थमाश्रय[१] भेदादेव विरुद्धधर्मव्यवस्थाया उपपादनीयत्वात् कर्तृत्वान्तराध्यासस्य व्यवस्थानुपपादकत्वात् तत्कल्पनं व्यर्थमिति पञ्चमो दूषयति ॥

नापि पञ्चमः—भेदाध्यासेऽपि धर्मैक्येन व्यवस्थानुपपत्तेः। एतेन अज्ञानं यं प्रति वाक्यार्थब्रह्मस्वरूपमावृणोति तत्रैव भ्रमं जनयति। नच धर्मिद्वये सति एवं

१. भेदेन.

व्यवस्था युज्यते नैकधर्मिणीति वाच्यम्। दर्पण[१]वदज्ञानोपाधिना चैतन्य एव जीवेशविभागापादनात्। नचैवं, ईश्वरं प्रत्यावरणं, तत्र भ्रान्त्यादिकं च स्यादिति-वाच्यम्। उपाधेः प्रतिबिंबपक्षपातित्वात्। दृश्यते हि—दर्पणाद्युपाधिभिः प्रति-बिंबे मालिन्याद्यध्यासः, उपाधेः प्रतिबिंबपक्षपातित्वं च। दर्पणाद्युपाधिना तन्निष्ठ मालिन्यादेः नियमतः प्रतिबिंब एव भानात्। भ्रमविशेषस्य प्रतिबिंबनैयत्यम्। अथवा—स्वधर्मासञ्जकत्वमेव प्रतिबिंबपक्षपातित्वम्। तत्राविद्यया भेद आस-ज्यते। कर्तृत्वादिकं बुद्ध्याऽऽसज्यते। नचोपाधिप्रयुक्तस्य भेदरूपधर्मस्य बिंबेऽपि मुखे प्रतीतेः नायं नियम इति वाच्यम्। दर्पणे हि प्राग्ग्रीवास्थमुखमात्रप्रतियोगिको-भेदो वर्तते। नच तं भेदं बिंब आसञ्जयति। बिंबं च मुखं, ग्रीवास्थमुखं न भव-तीत्यप्रतीतेः। यस्तु बिंबमुखे प्रतिबिंबमुखप्रतियोगिको भेदोऽनुभूयते स दर्पण-धर्मस्सन् बिंबेनासज्यते। दर्पणबिंबयोर्युगपदेव प्रतिबिंबभेदानुभवात्। प्रतिबिंबे तु स्वनिष्ठमेव ग्रीवास्थमुखभेदमासञ्जयति। एवमज्ञानमपि नित्यमुक्तवाक्यार्थब्रह्मभेदं स्वनिष्ठं सर्वज्ञे नासञ्जयति। किन्तु जीव एवेति नैतन्नियमबाध इति निरस्तम्॥

ननु कथं तर्हि लोके बिंबप्रतिबिंबयोः [२]प्राङ्मुखत्वप्रत्यङ्मुखत्वव्यवस्था। [३]कस्य चिद्धर्मस्य बिंबवृत्तित्वे सति प्रतिबिंबवृत्तित्वाभावः। तद्विरुद्धधर्मस्य प्रतिबिंबवृत्तित्वे सति बिंबवृत्तित्वाभावश्च हि व्यवस्था। सा च प्राङ्मुखत्वाव-दातत्वादौ बिंबवृत्तित्वप्रतिबिंबवृत्तित्वाभावयोः प्रत्यङ्मुखत्वमालिन्यादौ प्रतिबिंब-गतत्वबिंबगतत्वाभावयोश्च अध्यासादस्त्येवेति चेत्—उच्यते—श्यामत्वादीनां सन्नि-कर्षसत्त्वेन अन्यथाख्यातिस्तावदवर्जनीया। न च संयुक्तविशेष्यसमवायः प्रत्या-सत्तिः, गौरवात्। नच विरोध्यज्ञानत्वेन अर्थकारणताग्रहादुपाधिरूपदोषसह-काराच्च अनिर्वचनीयोत्पत्तिरवर्जनीया, इति वाच्यम्। श्यामत्वविरोध्यवदातत्वस्या-ज्ञानासिद्धेः। तस्मात् परोक्षस्थल इवात्रापि [४]बाधकाभावादनिर्वचनीयानुत्पत्तेश्च अन्यथाख्यातिरेव, अतः नार्थव्यवस्था। किं तु उपाधिमाहात्म्याद्विरुद्धधर्मप्रतियो-गितावच्छेदकावच्छिन्नभेदविषयिणी विद्यमानप्रतियोगितावच्छेदकधर्मसामानाधि—

---

१. दर्पणपटज्ञानोपाधिना. २. प्राङ्मुखत्वाप्राङ्मुखत्वव्यवस्था कस्यचिद्धर्मस्य बिंबवृत्ति. ३. कस्यचिद्धर्मः एव स बिंबवृत्तित्वे. ४. बाधकाभाव स एव निर्वचनीया.

करण्येन विद्यमानधर्मविषयिणी अविद्यमानप्रतियोगितावच्छेदकीयसामानाधिकरण्येन अविद्यमानधर्मविषयिणी विचित्रा प्रतीतिर्भ्रमरूपोत्पद्यते। विरुद्धधर्माणामेकत्र ग्रहश्च प्रतीतेर्भेदविषयत्वनिबन्धनः। तत्प्रतियोगिकभेदस्य तत्र विषयीकरणं च विरुद्ध प्रतियोगितावच्छेदकविषयत्वनिबन्धनम्। दार्ष्टान्तिकेऽपि अज्ञानगतनित्यमुक्तवाक्यार्थब्रह्मभेदस्य बुद्धिगतकर्तृत्वादेश्च अन्यथाख्यात्या प्रतीतिसंभवान्नार्थव्यवस्था॥

यच्चोक्तम्—दर्पणेन प्रतिबिंब एव स्वनिष्ठो भेद आसज्यते न तु बिंब इति तन्न। स्वगतस्य मुखप्रतियोगिकभेदस्यैव मुखे दर्पणेन आसञ्जनात्। नचैवं बिंबमुखं ग्रीवास्थमुखात् भिन्नमिति प्रतीत्यापत्तिः। यथाप्रतीति ग्रीवास्थादवदातान्मुखात् [1]दर्पणस्थं श्यामं मुखं भिन्नमिति प्रतीतिजनन एव उपाधेस्सामर्थ्यात्। अहो नु खलु व्याहतभाषणकुशलता। यद्बिंबप्रतिबिंबाभेदमपि वदन् उपाधिस्वगतभेदं प्रतिबिंब एवासञ्जयति; न तु बिंब इति ब्रूषे। यदुक्तम्—वाक्यार्थब्रह्माभेदः जीवे आसज्यते नत्वीश्वर इति, तन्न। निर्विशेषचिन्मात्रमेव हि वाक्यार्थः। नच तस्माद् भेदो जीवस्यास्ति। [2]यदि किञ्चिज्ज्ञत्वविशिष्टस्य शुद्धाद्भेदः, तदा सर्वज्ञत्वविशिष्टस्यापि शुद्धाद् भेदः स्यादेव॥

वस्तुतस्तु—बिंबे प्रतिबिंबभेदासञ्जनं नोपाधेः प्रतिबिंबपक्षपातित्वविरोधि। सिद्धे हि भेदे पक्षपातित्वप्रसङ्गः। अतो भेदोपजी[3]वनेनासञ्जनीयान् धर्मान् प्रतिबिंब एव आपादयति इति इदमेव उपाधेः प्रतिबिंबपक्षपातित्वम्। एवं च परेण भेदविषयेऽपि प्रतिबिंबपक्षपातित्वोपपादनात्तदनुरोधेन दूषणमुक्तमिति [4]मन्तव्यम्। प्रागुक्तव्यवस्थानुपपत्तिरेव दोषः॥

यदाह—सुरेश्वरः—'न वयं जीवब्रह्मविभागेन बन्धमोक्षयोः व्यवस्थां ब्रूमः। किं तु अविद्यया ब्रह्मण एव जीवत्वम्,

राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते।
यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः।

---

१. दर्पणस्थश्यामसुखं भिन्नम्. २. यदि किञ्चित् ज्ञत्वविशिष्ट. ३. भेदोपजीव्येना धर्मान् इति कोचिमङ्गलमातृकायाम्. ४. ध्येयम्.

इति ब्रह्मैव स्वाविद्यया संसरति। स्वविद्यया मुच्यत इति। एवं सति जीवस्य दुष्टत्वं ब्रह्मणोऽदुष्टत्वं वदन्त्यः—'तयोरन्यः पिप्पलं स्वाद्वत्ति—' इत्यादि श्रुतयः व्याकुप्येयुः। तस्मात् त्वदभिमतं अज्ञानं [१]न चिदाश्रयं नाचिदाश्रयं चेति॥

इति सद्विद्याविजये अविद्याश्रयभङ्गः ॥

श्रीः

## अविद्यालक्षणभङ्गः ॥

अपि चेयमविद्या न पारमार्थिकी, अद्वैतहानेः। नापि व्यावहारिकी, प्रातिभासिकोपादानत्वानुपपत्तेः। अन्यथा ब्रह्मण एवोपादानत्वसंभवे कथं कार्यान्यथानुपपत्त्या तदुपादानत्वेनाविद्याकल्पनम्। नापि प्रातिभासिकी, [२]व्यावहारिकोपादानत्वानुपपत्तेः। ननु—असत्यादपि सत्योत्पत्तिं पश्यामः। तथाहि—[३]असत्यादेव रजताद्धर्षो दृश्यते, रज्जुसर्पाद्भीतिः, शङ्काविषान्मरणम्, भावितगरुडाद्गरलहरणं, इति चेन्न। सर्वत्र ज्ञानस्यैव हेतुत्वात्। नच केवलस्य ज्ञानस्य हेतुत्वे अतिप्रसङ्गात् विषयावच्छिन्नस्यैव हेतुतया विषयस्यापि हेतुता। एवं कारणतावच्छेदकस्य हेतुत्वे दण्डत्वस्यापि हेतुत्वप्रसङ्गात् ॥

किञ्च—अविद्यायाः परिणामित्वाङ्गीकारात् कार्यपरिणामिनोरभेदाच्चाविद्याया असत्यत्वे तत्कार्यस्यासत्यत्वं दुर्वारम् ॥

---

१ न जीवाश्रयं चेति. २. व्यावहारिकविषयत्वानुपपत्तेः. ३. शुक्तिरजत रज्जुसर्प-शङ्काविष भावितगरुडादिभिस्सत्यस्य हर्षभयमरणगरलहरणादेर्दर्शनादिति चेन्न.

किञ्च—गरुडध्याने कृते तत्र प्रातिभासिकगरुडोत्पत्तेरनङ्गीकारात् ज्ञानादेव गरलनिवृत्तिर्वाच्या। तत्र ध्यानमात्रस्य हेतुत्वे अतिप्रसङ्गात् विषयावच्छिन्नस्यैव हेतुता वाच्या। तत्र च न विषयो हेतुः। किन्तु गरुडाभेदविषयत्वं कारणावच्छेदकम्। अतो रजतादिविषयत्वमपि कारणतावच्छेदकमेव न तु रजतादि कारणमिति॥

ननु विषयस्यासत्यत्वात् तज्ज्ञानमप्यसत्यमेवेति चेत्—तर्हि ब्रह्मण एव अविद्यातत्कार्यज्ञानत्वात् तस्यैवासत्यत्वप्रसङ्गः॥

अथ सत्तात्रैविध्यमेवासिद्धम्। ब्रह्मसत्तैव घटादौ शुक्तिरजतादौ च भासते। एवं चाविद्यायाः घटाद्युपादानत्वं रजतोपादानत्वं च युज्यत एव। सत्ताभेदश्चानुपपन्नः। ब्रह्मसत्तयैव सर्वत्र [1]सत्ताप्रतीत्युपपत्तौ तद्भेदकल्पने गौरवात्॥

किञ्च—ब्रह्मज्ञानेतरज्ञानाबाध्यस्वे सति जडत्वं [2]व्यावहारिकत्वम्। ब्रह्मज्ञानेतर ज्ञानबाध्यत्वसहचरितं प्रतीतिदशायां बाध्यत्वं प्रातिभासिकत्वमिति हि वाच्यम्। तत्र च स्वाप्नाध्यासे अतिव्याप्त्यव्याप्ती। प्राचां प्रातिभासिकव्यावहारिकसत्त्वभेदव्यवहारस्तु अविद्यातिरिक्तदोषजन्यत्वावच्छिन्न[3]सत्त्व तदजन्यत्वावच्छिन्न सत्त्वाभ्यामिति द्रष्टव्यमिति॥

उच्यते—अन्तःकरणस्य चैतन्याभेदेन प्रतीयमानत्वात्, अज्ञानस्य च चैतन्याश्रयत्वेन प्रतीतेः, 'अहं न जानामी'ति अन्तःकरणाश्रयतयाऽज्ञानस्य प्रतीतिरुपपद्यत इति वाच्यम्। तथा च सदाश्रयतया प्रतीयमानस्याज्ञानस्य कथं सदभेदेन प्रतीत्युपपत्तिः। अतस्सत्ताभेद एवाङ्गीकार्यः। तत्र च उक्त एव दोषः॥

किञ्च—अध्यासमात्रस्य दोषजन्यत्वव्याप्तेः अविद्याध्यासस्यापि दोषजन्यता वाच्या। तत्रार्थस्यैव दोषजन्यत्वाङ्गीकारात् अनवस्था। जन्यत्वप्रवेशेन व्याप्ति सङ्कोचे गौरवम्। उक्तव्याप्तेरपि परित्यागे प्रपञ्चाध्यासदोषतया अविद्याकल्पनं न स्यात्। शुक्तिरजताध्यासादिषु दोषो दृश्यत इति चेत् किं ततः। तद्बलात् घटाध्यासे दोषकल्पनायां अविद्याध्यासेऽपि तथा कल्पनाप्रसङ्गः॥

---

१. सर्वत्रप्रतिपत्तौ. २. व्यावहारिकसत्यत्वम्—व्यावहारिकसत्त्वम. ३. सत्य—सत्याभ्या.

किञ्च—अज्ञानस्य [1]लक्षणं तव दुर्भणम्। ननु अनाद्युपादानत्वे सति [2]मिथ्यात्वमज्ञानत्वम्। मृदादौ [3]अविद्यासंबन्धादौ आत्मनि च अतिव्याप्तिवारणाय विशेषणत्रयम्। अनाद्युपादानत्वे सति ज्ञाननिवर्त्यत्वं वा, अनादित्वे सति स्वजन्यानपेक्षज्ञाननिवर्त्यत्वं वा। स्वशब्दो ज्ञानपरः। न तु लक्ष्यपरः। स्मृत्यादिनिवर्त्ये संस्कारे रजतज्ञाने चातिव्याप्तिवारणाय [4]अनादीति। आत्मन्यतिव्याप्तिवारणाय ज्ञाननिवर्त्यत्वमिति। अविद्यासंबन्धादावतिव्याप्तिवारणाय स्वजन्यानपेक्षेति। ज्ञानं स्वजन्यामविद्यानिवृत्तिमपेक्ष्यैव हि अविद्यासंबन्धादिकं निवर्तयति। यदि च प्रागभावोऽङ्गीक्रियते तदा इच्छाप्रागभावादावतिव्याप्तिवारणाय भावत्वमपि विशेषणम्। अनादिभावत्वे सतीति वक्तव्यम्। ज्ञानत्वेन ज्ञाननिवर्त्यत्वं वा। संस्कारादावतिव्याप्तिवारणाय ज्ञानत्वेनेति। अविद्यासंबन्धस्तु अज्ञाननिवृत्त्यैव निवर्तते। न तु ज्ञानेन। स्वसमानविषयज्ञानप्राक्कालव्यापिसत्ताकत्वे सति तन्निवर्त्यत्वं वा। द्वितीयज्ञाननिवर्त्यप्रथमज्ञाने अतिव्याप्तिवारणार्थं सत्यन्तम्। स्वसमानविषयज्ञानासहकृतसामग्र्ययोग्यध्वंसप्रतियोगित्वं वा। द्वितीयज्ञाननिवर्त्यप्रथमज्ञानेऽतिव्याप्तिवारणार्थमयोग्येत्यन्तम्। ज्ञानातिरिक्तागन्तुकदृष्ट[5]कारणायोग्यध्वंसप्रतियोगित्वं वा। ध्वंसप्रतियोगित्वमतिव्यापकम्। ज्ञानेश्वरादृष्टसाध्यत्वादसंभववारणाय इतरपदानि। नच समानविषयेत्यादीनां त्रयाणां लक्षणानां अविद्यासंबन्धे अतिव्याप्तिः। तस्य निर्विषयत्वात्। अविद्यानिवृत्तिरूपदृष्टकारणयोग्यध्वंसप्रतियोगित्वाच्चेति। जन्यज्ञानाजन्यध्वंसप्रतियोगिवृत्तिबाह्यावृत्तिजातिमदन्यत्वे सति स्वसमानविषयज्ञाननिवर्त्यत्वं वा उत्तरज्ञाननिवर्त्यपूर्वज्ञाने अतिव्याप्तिवारणाय सत्ताजातिमादाय असंभववारणाय च सत्यन्तम्। ब्रह्मण्यतिव्याप्तिवारणाय उत्तरविशेषणम्। अविद्यासंबन्धे अतिव्याप्तिवारणाय स्वसमानविषयेति। भ्रान्तिपरिणामित्वं वेति॥

तत्र तावताद्यं लक्षणमनुपपन्नम्। अनुत्पादितभ्रमाज्ञाने अव्याप्तेः। नच लाघवान्निखिलप्रपञ्चोपादानब्रह्मगोचरमेकमेव अज्ञानमिति नाव्याप्तिरिति वाच्यम्। शुक्तिज्ञानेन शुक्त्यज्ञाननिवृत्तौ संसारनिवृत्त्यापत्तेः। अज्ञानस्यैकत्वात्। नच शुक्तिज्ञानेना

१. णं च दुर्भणम्. २. दोषमिथ्यात्वम्. ३. ववियासंबन्धात्मनि च. ४. अनादित्वे सतीति. ५. कारणयोग्यत्वं न प्रतियोगिध्वंसप्रतियोगित्वमतिव्यापकम्.

वरण निवृत्तिरेव, न तु अज्ञाननिवृत्तिरिति वाच्यम्। ज्ञानेनाज्ञानं निवृत्तमित्यनुभवस्यावरणमात्रविषयत्वकल्पनायोगात्। अज्ञाननानात्वस्यैव वाच्यत्वात्। अन्यथा शुक्त्याद्यधिष्ठानज्ञानानामावरणनिवर्तकत्वे चरमसाक्षात्कारस्यापि तथात्वप्रसङ्गात् अज्ञाननिवृत्त्यसिद्ध्या अनिर्मोक्षप्रसङ्गात्॥

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।'

इत्यादिना मोक्षात्प्रागवस्थायामेव अज्ञाननाशप्रतिपादनेन मूलाज्ञानातिरिक्तस्यैव निवृत्तेर्वाच्यतया एकाज्ञानपक्षे तदयोगेन तस्य कथञ्चि[१]न्निर्वाह्यतया मूलाज्ञानस्य ज्ञाननिवर्त्यत्वश्रुतेरपि तथात्वप्रसङ्गेन श्रुतिबलान्मूलाज्ञानस्य ज्ञाननिवर्त्यत्वसाधनासंभवात्। अज्ञाननिवृत्तेर्ज्ञानकार्यतया अज्ञानोपादानकत्वेन तदनुवृत्त्यर्थं तस्यापि निवर्त्यत्वे निवर्त्यपरं[२]परानुवृत्त्यर्थं अज्ञानानुवृत्तेरावश्यकतया अज्ञानाविरोधिकार्यस्य तन्निवृत्तित्वानुपपत्तेः। सजातीयवाक्यान्तरदृष्टनिर्वाहस्यैवौचित्यात्॥

किञ्च—लोकसिद्ध्यनुपजीवनेन श्रुतिबलादेव ज्ञाननिवर्त्यत्वाङ्गीकारे सति अस्यैव श्रुत्या तत्प्रतिपादनसंभवात्। ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या मिथ्यात्वकल्पनं बाध्येत। एतेन द्वितीयमपि निरस्तम्। ज्ञानपदवैयर्थ्यं च॥

नापि तृतीयम्—ब्रह्मण एवाज्ञाननिवृत्तित्वात्। तस्य च ज्ञानजन्यत्वाभावात्। ज्ञानजन्यनिवृत्तिप्रतियोगित्वलक्षणज्ञाननिवर्त्यत्वासंभवात्। ज्ञानसाध्यनिवृत्तिप्रतियोगित्वं विवक्षितम्, अनादेरपि साध्यत्वं संभवतीति चेन्न। अविद्यासंबन्धादावतिव्याप्तेः। अविद्यानिवृत्तेः ज्ञानसाध्यत्वेऽपि ज्ञानजन्यत्वाभावेन स्वजन्यानपेक्षत्वस्य सत्त्वात्। नच स्वजन्यत्वमपि स्वसाध्यत्वमेव विवक्षितमिति वाच्यम्। एवमप्यविद्यासंबन्धादावतिव्याप्तितादवस्थ्यात्। नहि ब्रह्मस्वरूपाविद्यासंबन्धनिवृत्तिः ब्रह्मरूपामविद्यानिवृत्तिमपेक्षते। आत्माश्रयात्। नचाविद्यानिवृत्तित्वेनापेक्ष्यत्वं तत्संबन्धनिवर्तकत्वेनापेक्षकत्वं चेति वाच्यम्। एवं सति तादृशनिवृत्तिं प्रति संबन्धवदविद्याया अपि प्रतियोगित्वात् असंभवापत्तेः। अविद्यानिवृत्तेः असाध्यत्वं च वक्ष्यते॥

---

१. न्निर्वाह्यतया–निर्वाहकतया. २. परानिवृत्त्यर्था.

किञ्च—ज्ञानशब्देन किं चैतन्यमुच्यते—उत वृत्तिः। नाद्यः—संसारस्य वृत्ति निवर्त्यतया चैतन्यनिवर्त्यत्वाभावेन लक्षणे अनादिपदवैयर्थ्यात्। संसारनिवृत्तेरपि मिथ्यात्वेन चैतन्याधिष्ठानतया तज्जन्यत्वमस्तीति चेन्न। तथा च सति संसारस्यापि मिथ्यात्वेन चैतन्याधिष्ठानतया तज्जन्यत्वात् स्वजन्यानपेक्षेति विशेषणेनैव तद्व्यावृत्तिसिद्ध्या अनादिपदवैयर्थ्यात् ॥

न द्वितीयः—वृत्तिरविद्यानिवृत्तिप्रतिबन्धकारणनिवर्तिका चैतन्यमज्ञाननिवर्तकमिति मते असंभवात्। आवरणेऽतिव्याप्तेश्च। मतान्तरेऽपि किमेकाज्ञानपक्षे इदं लक्षणम्, उत नानाज्ञानपक्षे। नाद्यः—घटादिज्ञानानां अज्ञाननिवर्तकत्वाभावेन आवरणनिवर्तकत्वात्। आवरणनिवृत्तेरज्ञाननिवृत्त्यनपेक्षत्वात्। अज्ञानावरणयोस्सहैव निवृत्तिंस्स्यादिति आवरणेऽतिव्याप्तेः। द्वितीये तु यदज्ञानं स्वसमानविषयज्ञानानुदयादनिवृत्तं अखण्डसाक्षात्कारेण १अखण्डाज्ञाने निवृत्ते तन्निवृत्त्यैव तन्निवर्तते। तत्राव्याप्तिः। नच तस्याप्यनादितयाऽखण्डाज्ञानानुपादानकतया तन्निवृत्तिमनपेक्ष्याखण्डज्ञानेन सहैव निवृत्तिरिति वाच्यम्। तथा सत्यावरणस्यापि अजन्यतया अखण्डज्ञाननिवृत्त्यनपेक्षनिवृत्तित्वेन तत्रातिव्याप्तेः। यदि च तस्य तादधीन्यात्तन्निवृत्त्यधीननिवृत्तिकत्वं, तदा कृत्स्नस्याप्यखण्डाज्ञानाधीनत्वात् तन्निवृत्त्यधीननिवृत्तिकत्वमेवेत्यव्याप्तिरेव। अखण्डाज्ञानेन ब्रह्मस्वरूपावरणाभावे अध्यासस्यैव असंभवेन कृत्स्नस्याप्यखण्डाज्ञानाधीनत्वात ॥

नापि चतुर्थम्—परोक्षज्ञानस्यानिवर्तकतया ज्ञानत्वस्य निवर्तकतावच्छेदकत्वासिद्धेरसंभवात् ॥

यच्चेदमुच्यते ज्ञानत्वेन ज्ञाननिवर्त्यत्वमज्ञानत्वं ज्ञानत्वेन चित्सामान्यरूपेण यत् स्वजन्यं तदनपेक्षं सत् तेनैव रूपेण ज्ञानं यन्निवर्तयति तदज्ञानमित्यर्थः। आवरणनिवर्तकसाक्षात्कार२रूपवृत्त्यपेक्षणेन असंभवपरिहाराय ज्ञानत्वेन जनकत्वं विवक्षितम्। 'तथा विद्वान् नामरूपाद्विमुक्तः' इत्यादिशास्त्रात् अज्ञानकार्यस्यापि

१. अज्ञाने निवृत्तिकत्वं तदा कृत्स्नस्यापि अखण्डाधीनत्वात् तन्निवृत्यधीननिवृत्तिकमेत्यव्याप्तिरेव। पाठान्तरमिदम्. २. मावृत्यपेक्षत्वेन असंभव.

ज्ञाननिवर्त्यत्वसिद्धेः, तत्रातिव्याप्तिवारणाय स्वजन्यानपेक्षेति। ज्ञानं अविद्यानिवृत्तिसहकृतमेव तत्कार्यं निवर्तयति, न तु साक्षात् स्मृतिनिवर्त्यसंस्कारे अतिव्याप्तिवारणाय ज्ञानत्वेन निवर्तकता विवक्षितेति ॥

तन्न—'तथा विद्वानि'ति श्रुत्या कार्यस्यापि साक्षादेव ज्ञाननिवर्त्यत्वावगमेन कार्यातिव्याप्तेर्दुष्परिहरत्वात् ॥

नापि पञ्चमम्—पूर्वज्ञानसत्ताया ब्रह्मस्वरूपत्वात् तस्याश्चोत्तरज्ञानप्राक्कालव्यापकत्वात् उत्तरज्ञाननिवर्त्यपूर्वज्ञानेऽतिव्याप्तेः ब्रह्मावरणेऽतिव्याप्तेश्च। उभयत्र ज्ञानपदवैयर्थ्यं च। अपि च ज्ञानपदेन चैतन्यविवक्षायां असंभवः। अविद्याविषयो हि ब्रह्मैव। नच ब्रह्म स्वविषयम्। नच तत्प्राक्कालव्यापिसत्ताकत्वमविद्यायास्संभवतीति। वृत्तिविवक्षायामपि स एव दोषः। वृत्तेरज्ञानत्वेनानिवर्तकत्वात्। तदवच्छिन्नचैतन्यविवक्षायां घटावच्छिन्नचैतन्यस्यैवाविद्याविषयत्वात्तस्यैव चैतन्यस्य घटाकारवृत्त्यवच्छिन्नचैतन्यत्वात् तस्य तद्विषयत्वासंभवेन स्वसमानविषयज्ञानप्राक्कालव्यापित्व तन्निवर्त्यत्वयोः अभावात्। घटाद्यज्ञानेष्वपि अव्याप्तिः। घटावच्छिन्नस्यैव वृत्तौ प्रतिबिम्बाङ्गीकारात् आरोपितभेदेन विषयत्वोपपत्तिरित्यपि दुर्वचम्। प्रमातृसंबन्धाभावप्रसङ्गात्। नहि घटावच्छिन्नचैतन्यप्रतिबिम्बस्य प्रमातृतासंभवः। ननु घटावच्छिन्नचैतन्यस्य वृत्तिव्याप्त्या तदवच्छिन्नचैतन्येनाभेदात् प्रमात्रभेदः प्रतिबिम्बस्य तद्विषयत्वमपि युज्यत इति चेन्न। प्रतिबिम्बस्य प्रमातृसंबन्धघटकत्वाभावेन तदङ्गीकारवैयर्थ्यात् ॥

नापि षष्ठम्—असंभवात्। अविद्यासंबन्धनिवृत्तिरेव हि अविद्यानिवृत्तिवृत्तिः। अविद्यासंबन्धनिवृत्तिः न ज्ञानसाध्या। किन्तु अविद्यानिवृत्तिसाध्येति ह्युच्यते। प्रतियोगिनो ध्वंसहेतुत्वेन सर्वस्यापि ज्ञानस्य ध्वंसहेतुत्वात् तत्रातिव्याप्तिः ॥

नापि सप्तमम्—अविद्यानिवृत्तेर्ब्रह्मस्वरूपत्वेन आगन्तुकत्वाभावात् अविद्यासंबन्धे अतिव्याप्तिः। आगन्तुकपदेन क्षेमसाधारणसाध्यत्वविवक्षायामपि अविद्यानिवृत्तेर्ब्रह्मस्वरूपतया तद्रूपाविद्यासंबन्धनिवृत्त्यनपेक्ष्यत्वादतिव्याप्तिः। अविद्यानिवृत्तित्वसंबन्धनिवृत्तित्वाकारभेदेनापेक्ष्यत्वापेक्षकत्वोपपादनेप्यविद्यानिवृत्तेर्ब्रह्मस्वरू-

पाया ज्ञानातिरिक्तत्वाभावात् तत्रैव अतिव्याप्तिः । ज्ञानपदेन निवृत्तिविवक्षायामपि तादृशसामग्रीयोग्य [१]ब्रह्मात्मकध्वंसप्रतियोगित्वमविद्यासंबन्धवत् अविद्यायामस्तीत्यसंभवः ॥

किञ्च—त्रैवर्णिकस्य [२]भाषाप्रबन्धजन्यज्ञानेन तज्जन्यदुरितापूर्वेण प्रतिबन्धादेव अज्ञानं निवर्तत इति त्वयैवाभिधानात् । भाषाजन्यदुरितापूर्वनिवृत्तिरूपदृष्टकारणसाध्यत्वं मूलाज्ञाननिवृत्तेरस्तीति तत्रासंभवः ॥

नचाष्टमम्—ज्ञानमात्रे अतिव्याप्तेः । सर्वज्ञानस्यापि जन्यज्ञानजन्यध्वंस प्रतियोगित्वात् स्वसमानविषयस्वनिवर्त्यत्वाच्च ॥

नापि नवमम्—वृत्तेर्भ्रान्तित्वासिद्धेः । तदवच्छिन्नचैतन्यस्य परिणामित्वासिद्धेरिति ॥

इति सद्विद्याविजये अविद्यालक्षणभङ्गः ॥

१. ब्रह्मात्मकत्वं न प्रतियोगित्वमविद्यासंबन्धवत्. २. भाषाप्रबन्धादन्यत्र अनेन तज्जन्यदुरितापूर्वेण.

श्रीः

## सद्विद्याविजये अविद्याप्रकाशभङ्गः ॥

किञ्च—कोऽयमविद्याप्रकाशः—न तावत् स्वयमेव। [1]अजडत्वसत्यत्वादि प्रसङ्गात्। [2]ततोन्यत्वे ब्रह्मणोऽन्यस्य स एव दोषः। ब्रह्मैवाविद्या[3]प्रकाशश्चेत् तस्य नित्यतया [4]अविद्यापि नित्या स्यात्। मिथ्यार्थस्य प्रतिभास[5]मानकालीनत्व-नियमात्। ननु अविद्यायाः प्रकाशः प्रकाशाभेद एव, तत्त्वज्ञानेन अविद्यानिवृत्तौ प्रकाशाभेदस्य निवृत्तावपि प्रकाशानिवृत्तेस्तस्य [6]नित्यत्वं अविद्याया विनाशित्वं चोपपद्यत इति चेन्न। प्रकाशाविद्ययोरप्यभेदप्रकाशमिथ्यात्वस्य अविद्यासत्यत्वस्य वा प्रसङ्गात्। भिन्नत्वे सत्यभिन्नसत्ताकत्वविवक्षायां घटप्रकाशस्य रसप्रकाशत्वप्रसङ्गः। अभिन्नसत्ताकत्वमिति बहुव्रीह्यर्थो यदि सत्ताया अभेदः तर्ह्यसिद्धिः। तत्र भिन्नत्वे सति अभिन्नसत्ताकत्वविवक्षायामात्माश्रयः। यदि तदभेदेन प्रतीयमानत्वं तत्सत्ताकत्वं तदा प्रतीतेः ब्रह्मतदन्यत्वयोः पूर्वोक्तदोषानतिवृत्तिः। नचाविद्यावच्छिन्नब्रह्म स्वरूपमविद्याप्रकाशः तस्याविद्याब्रह्मस्वरूपानतिरिक्ततया उक्तदोषानति[7]वृत्तेः॥

किञ्च—अविद्यावच्छेदो ह्यविद्यासंबन्धः तस्य तादात्म्यरूपत्वे दोष उक्त एव। ततोऽन्यत्वेऽपि तत्प्रकाशस्य स्वरूपतदतिरेकयोरुक्त एव दोषः। अविद्योपाध्यधीनब्रह्मप्रतिबिम्बस्य अविद्याप्रकाशत्वे बिम्बप्रतिबिम्बयोरभेदादुक्त एव दोषः। प्रतिबिम्बत्वं च उपाधिनिष्ठतया भासमानत्वम्। तत्र च भाने पूर्ववद्विकल्पदूषणयोः प्रसङ्गः। तन्निष्ठतया भासमानत्वं च ब्रह्मणोऽसिद्धम्। नहि अविद्यागतत्वेन ब्रह्म प्रतीयते। अविद्याकारवृत्त्यवच्छिन्नमविद्याप्रकाश इत्युक्तावपि उक्तदोषोऽनुसन्धेयः॥

इति सद्विद्याविजये अविद्याप्रकाशभङ्गः॥

---

१. अखण्डत्वसत्यत्वप्रसङ्गात्. २. अतोन्यत्वे. ३. प्रकाशश्च तस्य. ४. अविद्यापि न स्यात्. ५. कालसत्वनियमात्. ६. निवृत्तित्वम्. ७. वृत्तेरेव.

श्री

## सद्विद्याविजये अविद्यानिवर्तकभङ्गः ॥

किञ्च—अस्याज्ञानस्य निवर्तकासंभवात् अनिर्मोक्षप्रसङ्गः। तथाहि—किं चैतन्यमात्रं निवर्तकं उत वृत्तिप्रतिबिम्बितम्। किं वा वृत्त्युपहितम्। [1]किं वा वृत्त्यवच्छिन्नकारणताकम्। उताहो वृत्तिविशिष्टम्। अहोस्वित् [2]वृत्तिरेव निवर्तिकेति। नाद्यः—अविद्यायाः [3]कदाप्यसंभवप्रसङ्गात्। श्रवणादिवैयर्थ्याच्च ॥

न द्वितीयः—चैतन्यादधिकविषयत्वाभावे तद्वदेव निवर्तकत्वासंभवात्। [4]श्वैत्यानुमित्यनधिकविषयत्वेऽपि [5]श्वैत्यप्रत्यक्षस्य शङ्खपीतभ्रमविरोधित्वं दृश्यत इति चेन्न। अन्वयव्यतिरेकाभ्यां तत्रापरोक्षत्वपरोक्षत्ववैषम्यस्यैव निवृत्त्यनिवृत्त्योः प्रयोजकत्वकल्पनात्। एतेनैव तृतीयचतुर्थौ निरस्तौ ॥

नापि पञ्चमः—अन्वयव्यतिरेकाभ्यां वृत्तावेव पर्यवसानात् ॥

नापि षष्ठः—जडत्वात्। अन्वयव्यतिरेकाभ्यां वृत्तेरेव निवर्तकत्वम्। अज्ञानस्य ज्ञाननिवर्त्यताबुद्धिस्तु चैतन्यवृत्त्योरभेदाभिव्यक्तिनिबन्धनेति चेन्न। वृत्तेः चैतन्यादनधिकविषयत्वे दत्तोत्तरत्वात्। अधिकविषयत्वे मिथ्याज्ञानमोक्ष [6]साधनत्वाद्वैतहान्योरन्यतरप्रसङ्गात् ॥

ननु अज्ञानसाध्यभ्रमविषयविरोधिविषयज्ञानत्वमेव निवर्तकताप्रयोजकम्। नतु तत्त्वसाक्षात्कारत्वमिति चेत् किं तद्विरोधि। [7]अद्वितीयमिति चेन्न। तस्य स्वरूपानतिरेके दत्तोत्तरत्वात्। अतिरेके तज्ज्ञानस्यैव अविद्यानिवर्तकतया ब्रह्मज्ञानस्य अविद्यानिवर्तकत्वभङ्गः ॥

किञ्च—तत्प्रकाशस्य स्वप्रकाशत्वाप्रयोज्यतया तत्रावरणस्याकल्पनीयतया ज्ञानस्य तद्विषयत्वाभावेन तज्ज्ञानेन निवृत्तिरनुपपन्ना ॥

---

१. अथवा. २. वृत्तिरेवेति. ३. कदाप्यभावप्रसङ्गात्. ४. चैतन्यानु. ५. चैतन्य. ६. सन्धानत्व. ७. अद्वितीयत्व.

किञ्च---अद्वितीयत्वं न द्वितीयाभाववत्त्वम्। अन्यत्र तत्सिद्ध्यविरोधेन द्वितीयनिवृत्तेरसंभवात्। ननु [१]तत्रैव आरोपितस्य अन्यत्रासिद्धेर्निवृत्तिस्संभवतीति चेन्न। सन् घट इत्यभेदेन आरोपात् द्वितीयाभाववत्त्वस्य अभेदाविरोधितया तज्ज्ञानस्य निवर्तकत्वासंभवात् ॥

किञ्च—अज्ञानस्य कृत्स्नप्रपञ्चविरोधिविषयतया कृत्स्नमेव निवर्तेतेति कथं ज्ञानेन अज्ञानस्यैव निवृत्तिस्तन्निवृत्या इतरनिवृत्तिरिति मतोन्मेषः। एतेनाद्वितीयत्वं द्वितीयभिन्नत्वमित्यपि दत्तोत्तरम् ॥

किञ्च—द्वितीयाभेदे सन् घट इति प्रतीतिसिद्धे व्यावहारिके विद्यमाने कथं तद्भेदो व्यावहारिकः तत्र स्यात्। भेद एव व्यावहारिकः। सन् घट [२]इति नाभेदः प्रतीयते। किन्तु तादात्म्यम्। तच्च भिन्नत्वे सत्यभिन्नसत्ताकत्वमिति तु प्रतीतिव्याघातपराहतम्। भिन्नत्वस्य वा अभिन्नसत्ताकत्वस्य वा सन् घट इत्यत्रा प्रतीतेः ॥

अथ स्यात्—अद्वितीयत्वप्रकारकज्ञानं निवर्तकं अद्वितीयत्वं च स्वरूपमेवेति। तन्न—अज्ञानेन तदावरणे स्वरूपावरणप्रसङ्गेन [३]जगदान्ध्यापातः, अनावरणे च तद्विषयत्वाभावेन तज्ज्ञानेन [४]निवृत्त्यभावप्रसङ्गः। स्वरूपात्मकाद्वितीयत्वप्रकारक ज्ञानाभावोऽपि प्रतिबन्धाधीनः एतज्ज्ञानप्रतिबन्ध एव [५]ब्रह्मावरणमित्युच्यते इति चेन्न। तस्य ज्ञानस्य ब्रह्माद्वितीयमिति वाक्यसाध्यतया स्वप्रकाशाप्रयोज्यतया प्रतिबन्धकल्पनावैयर्थ्यात् ॥

किञ्च—अज्ञानं यद्यद्वितीयत्वज्ञानप्रतिबन्धकं तदा तस्मिन् जाग्रति कथमद्वितीयत्वज्ञानोदयः। कुतस्तरां तेनाज्ञाननिवृत्तिः। ननु शास्त्रबलात् शास्त्राधीनमेव ज्ञानं अज्ञानसहचरितज्ञानसमानविषयमप्यज्ञाननिवर्तकमिति चेन्न। मिथ्यार्थनिवृत्तित्वेन भ्रमविषयविरोधिप्रत्यक्षत्वेन च लोकसिद्धकार्यकारणभावमुलङ्घ्य कार्यकारणभावाङ्गीकारे ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या मिथ्यात्वकल्पनानुपपत्तेः ॥

---

१. तत्प्रकारारोपितस्य. २. इति तु नाभेदः—इतिमनागभेदः. ३. जगदभावेन तद्व्याघातः. ४. निवर्त्यत्वाभाव. ५. वरणमुच्यते.

किञ्च—ब्रह्मज्ञानस्य मूलाज्ञाननिवर्तकत्वे घटादिज्ञानानामपि तन्निवर्तकत्वप्रसङ्गः। ब्रह्मविषयत्वाविशेषात्॥

अत्राहुः—चैतन्यं न चक्षुरादिजन्यवृत्तिगोचरः। 'तं त्वौपनिषदम्' इत्युक्तत्वात्। नच मानान्तरगम्यत्वे उपनिषत्प्रमाणकत्वसंभवः।

'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।'

'पराञ्चि खानि व्यतृणात् स्वयंभूः।'

'तस्मात् परं पश्यति नान्तरात्मन्।' इत्यादि च बहुलमुपलभ्यते।

**नच**—'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते।' इत्यादिवार्तिकविरोधः। तस्य घटाद्याकारवृत्त्युदये सत्यावरणाभिभवात् स्वप्रभं सद्रूपं ब्रह्म घटस्सन्निति घटवद्व्यवहार्यं भवतीति औपचारिकघटादिवृत्तिवेद्यत्वपरत्वात्। आवरणाभिभावकत्वं च घटादिज्ञानस्य घटादिविषयत्वादेवोपपन्नम्। घटादेरप्यज्ञानविषयत्वात्। घटं [१]न जानामि घटज्ञानेन घटाज्ञानं नष्टमित्यवस्थाज्ञानानां घटादिविषयत्वानुभवात्। नच तत्रावरणकृत्याभावात् अज्ञानाङ्गीकारो न युक्तः। तद्भासकस्य तदवच्छिन्नचैतन्यस्याप्यावरणादेव तदप्रकाशोपपत्तेरिति वाच्यम्। उक्तभङ्ग्या जडस्य साक्षादज्ञानविषयस्य प्रतिक्षेपेऽपि जडावच्छिन्नचैतन्यप्रकाशस्याज्ञानेनावरणं ततो नित्यचैतन्यप्रकाश संसर्गेऽपि जडस्यास्ति प्रकाशत इति व्यवहारयोग्यत्वमिति परंपरया ज्ञानविषयत्वाभ्युपगमात् साक्षात्परंपरया वा यदज्ञानावरणीयं तद्विषयस्यैव ज्ञाने तदज्ञाननिवर्तक प्रयोजकशरीरनिवेशात्। नचैवं घटादीनामुक्तरीत्या मूलाज्ञानविषयत्वमपि स्यादिति घटादिसाक्षात्कारे सति मूलाज्ञाननिवृत्त्यापातः। फलबलात्तदज्ञानकार्यातिरिक्ततद्विषयविषयकत्वस्यैव तन्निवर्तकत्वे तन्त्रत्वात्। अथवा मूलाज्ञानस्यैव जडं न विषयः। अवस्थाज्ञानानामवच्छिन्नचैतन्याश्रितानां तत्तज्जडमेव विषयः। अन्यथा चाक्षुषवृत्त्या चन्दनखण्डे चैतन्याभिव्यक्तौ तत्संसर्गिणो गन्धस्याप्यापरोक्ष्यापत्तेः। तदनभिव्यक्तौ चन्दनतद्रूपयोरप्यप्रकाशापत्तेः॥

---

१. नजानामीत्यज्ञानेन घटज्ञानं नष्ट.

नच चाक्षुषवृत्त्या चन्दनतद्रूपावच्छिन्नचैतन्ययोरभिव्यक्त्या तयोः प्रकाशः, गन्धाकारवृत्त्यभावेन गन्धावच्छिन्नचैतन्यस्यानभिव्यक्त्या [१]तस्याप्रकाशश्चेति वाच्यम्। चैतन्यस्य द्विगुणीकृत्य वृत्त्यभावात्। एकद्रव्यगुणानां स्वाश्रये सर्वत्र व्याप्य वर्तमानानां पृथक् पृथक् गगनावच्छेदकत्वस्येव चैतन्यावच्छेदकत्वस्यैवासंभवाच्च। तेषां स्वाश्रयद्रव्यावच्छिन्नचैतन्येनैव शुक्तीदमंशावच्छिन्नचैतन्येन शुक्तिरजतवत् प्रकाश्यतया तस्याभिव्यक्तौ गन्धस्यापि प्रकाशः स्यात्। अनभिव्यक्तौ रूपादेरप्यप्रकाशतापत्तेः। नच गन्धाकारवृत्त्युपरक्त एव चैतन्ये गन्धः प्रकाशत इति नियमः। प्रकाशसंसर्गस्यैव प्रकाशमानशब्दार्थत्वेन असत्यामपि तदाकारवृत्तावनावृतप्रकाशसंसर्गे अप्रकाशमानत्वकल्पनस्य [२]विरुद्धत्वात् अभिव्यक्तस्य च गन्धोपादानचैतन्यस्य गन्धासंसर्गोक्त्यसंभवात्। तस्मात् यथा चैत्रस्य घटवृत्तौ तं प्रत्यावारकस्यैवाज्ञानस्य निवृत्तिरिति तस्यैव विषयप्रकाशो नान्यस्य। तथा तत्तद्विषयाकारवृत्त्या तत्तदावारकाज्ञानस्यैव निवृत्तेः न विषयान्तरस्यापरोक्ष्यम्। अनावृतार्थस्यैव संविदभेद आपरोक्ष्यमिति अभ्युपगमादिति प्रमातृभेदेन विषयभेदेनाप्येकत्र चैतन्येऽवस्थाज्ञानभेदस्य वक्तव्यतयाऽवस्थाज्ञानानां तत्तज्जडविषयत्वमिति घटादिवृत्तीनां नावस्थाज्ञाननिवर्तकत्वे काचिदनुपपत्तिः। नवा मूलाज्ञाननिवर्तकत्वापत्तिः। नचैवमपि जीवविषयाया अहङ्कारवृत्तेर्मूलाज्ञाननिवर्तकत्वापत्तिः। तस्याः स्वयंप्रकाशमानचित्संवलिताचिदंशमात्रविषयत्वात् सोऽहमिति प्रत्यभिज्ञाया अपि स्वयंप्रकाशचैतन्ये अन्तःकरणवैशिष्ट्येन सह पूर्वापरकालवैशिष्ट्यमात्रविषयत्वेन चैतन्यविषयत्वाभावादिति ॥

केचित्तु—घटादिवृत्तीनां तदवच्छिन्नचैतन्यविषयत्वमभ्युपगम्य—

'सर्वमानप्रसक्तौ च सर्वं मानफलाश्रयात्।
श्रोतव्येति वचः प्राह वेदान्तावरुरुत्सया ॥'

इति वार्तिकोक्तश्रोतव्यवाक्यार्थवेदान्तनियमविध्यनुसारेण वेदान्तजन्यमेव नियमादृष्टसहितं ब्रह्मज्ञानमप्रतिबद्धं ब्रह्माज्ञाननिवर्तकमिति न घटादिज्ञानात्तन्निवृत्तिप्रसङ्ग इत्याहुः ॥

---

१. तस्याप्रकाशचैतन्यमिति. २. विशुद्ध.

अन्ये तु—तत्त्वमस्यादिवाक्यजन्यं जीवब्रह्माभेदगोचरमेव ज्ञानं मूलाज्ञान-निवर्तकम्। मूलाज्ञानस्य तदभेदगोचरत्वादिति न चैतन्यस्वरूपमात्रगोचरात् घटादिज्ञानात् तन्निवृत्तिप्रसङ्गः। नचाभेदस्य तत्त्वावेदकप्रमाणबोध्यस्य चैतन्यातिरेके द्वैतापत्तेः चैतन्यमात्रमभेद इति तद्गोचरं घटादिज्ञानमप्यभेदगोचरमिति वाच्यम्। नहि अभेदज्ञानमिति विषयतो विशेषं ब्रूमः। किन्तु तत्त्वंपदवाच्यार्थधर्मिद्वयपरामर्शादिरूपकारणविशेषाधीनेन स्वरूपसंबन्धविशेषेण चैतन्यविषयत्वमेव तदभेदज्ञानत्वम्। यथाहि—'विशेषणविशेष्यतत्संबन्धगोचरत्वाविशेषेऽपि विशिष्टज्ञानस्य विशेषणज्ञानादिकारणविशेषाधीनस्वरूपसंबन्धविशेषेण तत्त्रितयगोचरत्वमेव समूहालंबनव्यावृत्तं विशिष्टज्ञानत्वम्। यथा च स्थाणुत्वपुरुषत्ववानित्याहार्यवृत्तिव्यावृत्तं संशयत्वं विषयतो विशेषानिरूपणात्, तथा घटादावपि सोऽयं घट इत्यादिज्ञानस्य स्वरूपसंबन्धविशेषेण घटादिविषयत्वमेव केवलघटशब्दादिज्ञानव्यावृत्तं तदभेदज्ञानं, अतिरिक्ताभेदानिरूपणात्। अभावसादृश्यादीनां अधिकरणप्रतियोग्यादिस्वरूपसंबन्धयुक्तानां अधिकरणेनाधाराधेयभावरूपसंबन्धविशेषः प्रतियोग्यनुयोगिभाव इत्यादिप्रकारेण स्वरूपसंबन्धेऽवान्तरविशेषकल्पनवत् वृत्तीनां विषयेऽपि संयोगतादात्म्ययोरतिप्रसक्त्या विषयैः विषयविषयिभावरूपसंबन्धवतीनां विषयविशेषनिरूपणासंभवे क्लृप्ते स्वरूपसंबन्ध एवावान्तरविशेषकल्पनेनाभेदज्ञानत्वादि परस्परवैलक्षण्यनिर्वाहाच्च। एवं च ब्रह्मज्ञानस्याभेदाख्यकिञ्चित्संसर्गगोचरत्वान[1]भ्युपगमात् न वेदान्तानामखण्डार्थत्वहानिरपीत्याहुः॥

अत्र न काचिदप्युत्प्रेक्षा चोद्यनिराकरणक्षमा—तथा हि—प्रथमद्वितीय तृतीयचतुर्थपक्षेषु घटादिज्ञानानां अखण्डाज्ञानसमानविषयत्वात् तन्निवर्तकत्वमपरिहार्यम्। अत्र यदुक्तं प्रथमपक्षे फलबलात्तदज्ञानकार्यातिरिक्तविषयत्वमेव तन्निवर्तकत्वे प्रयोजकम्। अतो घटस्य मूलाज्ञानकार्यत्वाभावात् तज्ज्ञाने, न मूलाज्ञाननिवृत्तिः, मूलाज्ञानकार्यत्वात् न तज्ज्ञानेन मूलाज्ञाननिवृत्तिरिति। तन्न। सोऽयमजागलस्तनात् क्षीराभिलाषः। अज्ञानविषयतत्त्वसाक्षात्कारस्यैवाज्ञाननिवर्तकतया दृष्टत्वेन कार्यगोचरत्वतदगोचरत्वयोः अप्रयोजकत्वात्। फलबलात्कल्पने तु मूला-

१. भ्युपगमोनवेदान्त.

ज्ञानस्य निवृत्तिरेव कल्पनीया। अन्यथा घटप्रकाशासंभवात्। नहि क्षुद्रमहापटाभ्यामावृतस्य क्षुद्रपटनाशमात्रेण प्रकाशो दृश्यते। किन्तु उभयनाशादेवाखण्डावारकाज्ञानस्य चावच्छिन्नावारकत्वमनिवार्यम्। अन्यथा अखण्डावरणासंभवात्। इष्टं च मूलाज्ञानेन घटावच्छिन्नचैतन्यावरणं फलबलादित्यादि वदतः॥

एतेन द्वितीयोऽपि पक्षो निरस्तः। मूलाज्ञानानां जडावारकत्वेऽपि तन्निवृत्तिमात्रेण प्रकाशासंभवात्। नहि अखण्डाज्ञानेनावृतं घटावच्छिन्नचैतन्यं स्वयमप्रकाशमानं घटप्रकाशनसमर्थम्॥

किञ्च—जडावरणकल्पने न मानमस्ति। नच चक्षुषा चन्दनखण्डज्ञाने गन्धाभानार्थं जडावरणकल्पनम्। अनावृतस्य प्रकाशसंसर्गः प्रकाशमानशब्दार्थ इति कल्पनवत् तदाकारवृत्त्युपहितसंसर्गः प्रकाशमानशब्दार्थ इति कल्पनात् प्रकाशसंसर्गाविरोधिनः कस्यचिदावरणपरिभाषामात्रेणासिद्धौ प्रकारान्तरेणापि इष्टसिद्धेः [1]सूपपादत्वात्॥

यश्च तृतीयपक्षे नियम उक्तः सोऽनुपपन्नः। नियमादृष्टस्यैवासंभवात्। नियमादृष्टं हि अन्वयव्यतिरेकानवगतकार्यसिद्धय एव कल्प्यते। अवहननादिनियमादृष्टं सातिशयतण्डुलादिमुखेन परमापूर्वजनन एवोपयुज्यते। इह चाविद्यानिवृत्तिरन्वयव्यतिरेकसिद्धकार्यमेवेति तादर्थ्येन कुतो नियमादृष्टसिद्धिः। अन्वयव्यतिरेकसिद्ध्यभावे तु कुतस्तराम्। तस्मात् वाक्यजन्यज्ञानादेव [2]मूलाज्ञाननिवृत्तिमङ्गीकुर्वता ज्ञानेनाज्ञाननिवृत्तिर्नान्वयव्यतिरेकसिद्धा। किन्तु श्रुतिसिद्धैवेत्यङ्गीकार्यम्। ततश्च न ज्ञाननिवर्त्यत्वानुपपत्त्या मिथ्यात्वसिद्धिः॥

यच्च चतुर्थपक्षे विषयविषयिभावविशेषकल्पनम्—तदनुपपन्नम्। प्रतीतिवैचित्र्यस्य विषयविशेषाभावस्य चानुभवसिद्धतया संशयादौ विषयविषयिभावरूपसंबन्धकल्पनेऽपि प्रकृते तादृशवैलक्षण्याननुभवेन तत्कल्पनायोगात्। नहि निर्विशेषस्वरूपमात्रगोचरज्ञाने संशयापन्ने तत्र संबन्धविशेषोऽनुभवसिद्ध इति युज्यते। नापि तादृशसंबन्धविशेषप्रयोजकत्वं समानाधिकरणवाक्यस्य युक्तम्। [3]अभिज्ञानाविषयीकृतस्य तत्त्वेदन्त्वसमानाधिकरणवाक्येन भानात्॥

---

१. सूपपादित. २. मूलाविद्या. ३. अभिज्ञानां विषयी.

अपि च यद्येवं संबन्धविशेषवत एव ज्ञानस्य निवर्तकता तर्हि घटस्सन् इत्यादौ कथं सत्प्रतीतिः । यदि सतो नावरणमिष्यते तर्हि कथमभेदस्यावरणम् । तस्य स्वरूपत्वात् । यदि चैवमप्यावरणानावरणव्यवस्था सदनावृतम्, अभेद आवृत इति । तदा घटज्ञानेन सदेव ज्ञातं नत्वभेद इति व्यवस्थासंभवात् किमर्था संबन्धविशेषकथा ॥

किन्त्वेवं व्यवस्थायां अनवच्छिन्नानन्दाप्रकाशेन तदावरणस्यावश्यकत्वात् अभेदज्ञानेन तन्निवृत्त्यसंभवाच्च नाभेदज्ञानेन मोक्षसिद्धिः । ननु अखण्डानन्दावारकस्य अभेदावारकस्य च एकत्वात् अभेदज्ञानेन अज्ञाननिवृत्तौ नानन्दाज्ञानसंभव इति चेन्न । एकाज्ञानपक्षे तत्तज्ज्ञानैस्तत्तदावरणनिवृत्त्यभिधानात् तन्न्यायस्यात्राप्रसरात् । अपि च प्रकाशानन्दाभेदानां स्वरूपत्वेऽपि यथा प्रकाशोऽनावृतः आनन्द आवृतः अभेद आवृत इत्युच्यते तदा अभेदाज्ञानस्यैव आनन्दाज्ञानत्वेपि अभेदज्ञानेन अभेदाज्ञानस्यैव निवृत्तिः न त्वानन्दाज्ञानस्येति कथं न स्यादिति ॥

इति सद्विद्याविजये अविद्यानिवर्तकभङ्गः ॥

श्रीः

## सद्विद्याविजये अविद्यानिवृत्तिभङ्गः ॥

अपि च अज्ञानस्य निवृत्तिरपि दुर्निरूपा। तथाहि—सा किं मिथ्या किं वा सत्या—आद्ये अनिर्मोक्षप्रसङ्गः। निवृत्त्युपादानभूताज्ञानस्य निवृत्त्या सहावस्थानस्यावश्यकत्वात् ॥

किञ्च—अविद्योपादानकस्य अविद्याविरोधाभावेन तत्राविद्यानिवृत्तिव्यपदेशः परिभाषामात्रमेवेति तत्त्वज्ञाने सत्यपि नाविद्यासाम्राज्यहानिः। द्वितीयेऽपि किं सा निवृत्तिः ब्रह्मस्वरूपादन्या, उत तदेव। आद्ये अद्वैतहानिः। भिन्नसत्ताकतया विरोधाभावादनिर्मोक्षप्रसङ्गश्च। एतेन पञ्चमप्रकारपक्षोऽपि निरस्तः। द्वितीयमप्यनेनैव निरस्तम्। अनादेर्ब्रह्मस्वरूपस्य साध्यत्वमप्यसंभवि ॥

यच्चेदमुच्यते 'यस्मिन्सति उत्तरक्षणे यस्य सत्त्वं यदभावे यदभावः' इति क्षेमसाधारणं साध्यत्वं ब्रह्मणि संभवत्येव। तत्त्वज्ञाने सति उत्तरक्षणे अविद्यानिवृत्तिः। तदभावे निवृत्तिरूपब्रह्माभावात्मिका अविद्येति। तन्न—ब्रह्मस्वरूपाविरोधिन्या अपि अविद्यायाः तदभावत्वासंभवात् ॥

ननु—अधिष्ठानस्य अध्यस्यमानाभावत्वाद्[१]भावप्रतियोगिनोर्भावाभावत्वाच्च, अविद्याब्राह्मणोः परस्पराभावत्वं वाच्यमिति चेन्न। अधिष्ठानस्य अध्यस्यमानाभावत्वे मानाभावात्। ननु—शुक्तौ रजताभावो न व्यावहारिकः। प्रातिभासिकप्रतियोगित्वात्। नापि प्रातिभासिकः। नासीदस्ति भविष्यतीति प्रतियोगिसमानकालीनत्वप्रतीतेः। अतोऽधिष्ठानमेवाभाव इति वाच्यम्। तच्च नाभावत्वेनैव कल्प्यते। किन्तु स्वातन्त्र्येणैव शुक्त्यादिरूपेण सिद्धं अभावव्यवहारालंबनतया कल्प्यत इति न प्रातिभासिकप्रतियोगित्वविरोधः। तस्मादधिष्ठानमेव अध्यस्यमानाभाव इति चेन्न।

---

१ अभावप्रतियोगिनोर्भावाभावत्वाच्च। इति पाठान्तरम्.

भावान्तराभाववाद इव तत्र क्लृप्तानामर्थानामेव प्रातिभासिकाभावत्वकल्पनस्य उचितत्वात। कथमन्यथा भूतलादौ न प्रातिभासिकाभावव्यवहारः॥

किञ्च—शुक्तौ रजताभावो न शुक्तिः। तत्र तदप्रवृत्तेः। अतस्तत्र विद्यमान रूपादिरेव रजताभावःस्यात्। अतो नाधिष्ठानमध्यस्यमानाभावः। [१]अस्तु वा तथा—तथापि नाध्यस्यमानं अधिष्ठानाभावः। अभावप्रतियोगिनोःपरस्पराभावत्वनियमोऽसिद्ध एव। अप्रयोजकत्वात्। घटाभावाभावव्यवहारस्य संप्रतिपन्नत्वात्। तस्यातिरिक्त विषयत्वकल्पने गौरवात्। अनतिप्रसक्तप्रतियोगिविषयत्वं कल्प्यते॥

नच अत्र तादृशव्यवहारं पश्यामः। येनाध्यस्यमानस्य अधिष्ठानाभावत्वं कल्पयेम। तस्मात् नोक्तसाध्यतासंभवः। अस्तु वा अध्यस्यमानमधिष्ठानाभावः। तथापि प्रतियोगिसमानकालीनस्य निवृत्तित्वकल्पनमुपहास्यमेव। अतो न ब्रह्म-स्वरूपमविद्यानिवृत्तिः॥

किञ्च—एवं सति ब्रह्मणो घटसाध्यत्वप्रसङ्गः। ननु—यदभावे यदभाव इत्यसिद्धमेव। संसारदशायां ब्रह्माभावरूपाविद्यासत्त्वेऽपि मोक्षे तदसिद्धेरितिचेत्। तत एवाविद्यानिवृत्तेरसाध्यत्वप्रसङ्गात्। यत्कालापेक्षया पूर्वकाले यस्मिन् सति तत्काले यस्य सत्त्वं तत्पूर्वकाले [२]तस्याभावे तत्काले यस्याभावः स एव तत्साध्य इत्यपि न। ब्रह्मणो घटसाध्यत्वप्रसङ्गादेव। पूर्वकालीनेनोत्तरकालीनस्य प्रयोज्यत्वं विवक्षितमिति चेन्न। जन्यत्वातिरेकेण प्रयोज्यत्वासंभवात्। साध्यत्वाभिमताभावस्य साधकत्वेन अभिमताभावप्रयोज्यत्वं विवक्षितमिति चेन्न। ब्रह्मज्ञानाभावस्य अविद्या-प्रयोजकत्वासिद्धेः। अविद्यानिवृत्तेर्ज्ञानजन्यत्वे सति हि ज्ञानाभावे निवृत्तेरनुत्पत्ते-रविद्यायाः सुखजीवनात् ज्ञानाभावस्य अविद्याप्रयोजकता वा स्यात्। प्रायश्चित्तस्य दुरितध्वंसहेतुत्वादेव हि प्रायश्चित्ताभावे दुःखसामग्रीसत्त्वात् प्रायश्चित्ताभावस्य दुःखप्रयोजकत्वम्। दुःखाभावस्य प्रायश्चित्तसाध्यत्वं च॥

किञ्च—अविद्या प्रकृतिरेव। ततोऽतिरिक्ता वा। अन्त्ये 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिविरोधः। आद्ये—'गौरनाद्यन्तवती सा जनित्री भूतभाविनी'

---

१. अस्तु वा—तथापि नाध्यस्यमानमधिष्ठानाभावः कल्प्यते। इदं वाक्यं नचात्र तादृशा-भाव इत्यस्यादौ वर्तते। २. तस्याभावात् एतत्काले.

इत्यविनाशित्वावगमान्न निवृत्तिसंभवः ॥

एतेन [१]यदुक्तं [२]उत्पत्तिक्रियाकर्तुः उत्पत्तिर्यथा प्रथमसमयसंबन्धमात्रसंबन्धी भावविकारः, तथा निवृत्तिरपि चरमसमयमात्रसंसर्गीभावविकारः। अत एव यथा पूर्वं पश्चाच्च उत्पत्स्यते उत्पन्न इति भाविभूतभावेन व्यवह्रियमाणाया उत्पत्तेः प्रथमसमयमात्रे उत्पद्यत इति वर्तमानत्वव्यवहारः, तथा पूर्वं पश्चाच्च निवर्तिष्यते निवृत्त इति भाविभूतभावेन व्यवह्रियमाणाया निवृत्तेः चरमसमयमात्रे निवर्तते नश्यति ध्वंसत इति वर्तमानत्वव्यवहार उपलभ्यते। निवृत्तेरनुवृत्तौ तु चिरशकलितेऽपि घटे इदानीं घटो निवर्तत इत्यादि व्यवहारस्स्यात्। आख्यातानां प्रकृत्यर्थवर्तमानत्वाद्यर्थाभिधायकत्वात्॥

ननु—आख्यातानां स्वस्वाभिहितसंख्याश्रयप्रकृत्यर्थकर्मकर्तृगतवर्तमानत्वाद्यर्थाभिधायकत्वं, स्वाभिहितप्रकृत्यर्थानुकूलव्यापारगतवर्तमानत्वाद्यर्थाभिधायकत्वं वाऽस्तु। तथा च [३]निवृत्तिर्न नित्या चिरचूर्णितस्य घटस्य तद्गततन्निवृत्त्यनुकूलव्यापारस्य चावर्तमानत्वात् नोक्तातिप्रसङ्ग इति चेन्न। आद्ये उत्पन्नेपि घटे उत्पद्यत इति व्यवहारापत्तेः। उत्पत्तिक्रियाकर्तुः घटस्य वर्तमानत्वात्। द्वितीये आमवातजडीकृतकलेबरे उत्थानानुकूलयत्नवति उत्थानानुदयेप्युत्तिष्ठतीति व्यवहारापत्तेः। आख्यातार्थस्य प्रकृत्यर्थभूतोत्थानानुकूलस्य यत्नरूपव्यापारस्य वर्तमानत्वात्। तस्मात् प्रकृत्यर्थगतमेव वर्तमानत्वाद्याख्यातार्थ इति। ध्वंसस्य स्थायित्वे चिर निवृत्तेपि घटे निवर्तत इति व्यवहारो दुर्वारः ॥

यदि च मुद्गरादिशकलिते घटे ध्वंसो नाम कश्चिदभावः तत्प्रतियोगिकःस्थायी भूतलाद्याश्रित उपेयते। तदा कपालमालापसरणे तदनपसरणेऽपि मणिकशरावादि कपालव्यावृत्तकपालसंस्थानविशेषादर्शने च किमिति स ध्वंसः प्रत्यक्षो न स्यात्। कपालसंस्थानादिविशेषादिना अनुमेयो घटादिध्वंसो न प्रत्यक्ष इति चेत् तर्हि तेन मुद्गरपातकालीनस्य उत्पत्तिवत् भावविकाररूपतया प्रतियोग्याश्रितस्य ध्वंसस्य अनुमानं संभवतीति न ततः पश्चात् अनुवर्तमानप्रतियोग्यधिकरणानाश्रिताभावरूपध्वंससिद्धिः। इह भूतले घटो ध्वस्त इति भूतले अधिकरणत्व[४]व्यवहारस्य इह

१. एतेन भवदुक्तम्. २. निवृत्तिर्नित्या. ३. निवृत्तिक्रियाकर्तुः. ४. व्यवहारत्वस्य.

भूतले घट उत्पन्न इतिवत् भावविकारयुक्तप्रतियोग्यधिकरणत्वविषयत्वोपपत्तेः। घटध्वंसानन्तरं भूतले घटाभावव्यवहारस्य घटापसरणानन्तरं तदभावव्यवहारवत् समयविशेषसंसर्ग्यत्यन्ताभावविषयत्वोपपत्त्या ध्वंसविषयत्वस्याकल्पनीयत्वाच्च। एवं सति घटोत्पत्तेः पूर्वं तदभावव्यवहारस्यापि अत्यन्ताभावेन चारितार्थ्यात्। प्रागभावो हि नास्त्येव। नन्वेवं प्रागभावाधारकालः पूर्वकालः ध्वंसाधार उत्तरकालः इति निर्वचनासंभवात्, काले पूर्वोत्तरादिव्यवहारः किमालंबनः स्यात्। घटादिषु प्रतियोगित्वादिव्यवहारवदखण्डकिञ्चिद्धर्मगोचरोऽस्तु। तस्मात् न पूर्वं प्रागभावः। न तत्र प्रध्वंसाभावः। मध्ये परं कियन्तंचित्कालं अनिर्वचनीयोत्पत्तिस्थितिध्वंसरूपभावरूपविकारवान् घटाध्यासः। एवं च अविद्यानिवृत्तिरपि ब्रह्मसाक्षात्कारोदयानन्तरक्षणवर्ती कश्चित् भावविकार इति, तस्य [1]मुक्तावनुवृत्त्यभावान्न तदनिर्वाच्यत्वे कश्चिद्दोष इति॥

[2]तदपि निरस्तम्। प्रकृते नित्यत्वश्रुतेर्मायाया एव प्रकृतित्वश्रुतेश्च। अपि च अविद्यानिवृत्त्यनन्तरं अविद्याऽस्ति न वा। आद्ये अनिर्मोक्षप्रसङ्गः। अन्त्ये नेत्यस्य कोऽर्थः। अभाव इति चेत् कोऽयभावः। ब्रह्मेति चेन्न। तस्य समयविशेषसंसर्गाभावत्वासिद्धेः। समयविशेषसंसर्गाभावे च नाभावत्वासिद्धिः। अविरोधात्॥

ननु सत्ताभेदप्रयुक्त एवायमविरोधः। स च नाभावत्वविरोधीति चेन्न। अनन्तरमपि विरोध्यभावासिद्ध्या अविद्यानुवृत्तिप्रसङ्गात्। ननु न ब्रह्माविद्याभावः। अविरोधात्। नाप्यविद्यानिवृत्तौ सत्यामविद्याभावः, नाप्यविद्याकालस्य भावाभावान्यतरत्वनियमेपि अविद्यानिवृत्तौ कालोऽपि निवृत्त एवेति न तन्नियमभङ्गोऽपीति चेन्न। शुकादिमुक्तेः पूर्वमेव वृत्ततया इदानीं कालाभावप्रसङ्गात्। तत्सत्त्वे च कालस्य भावाभावान्यतरत्वनियमभङ्गः॥

किञ्च—अनादित एव मिथ्यापरिणामानामनन्तानां सुखतत्साधनानां अनन्तानां निवृत्तीनां चायत्नेनैव अनवरतोत्पत्तेरपुरुषार्थक्षणिकैकव्यक्त्यात्मकनिवृत्त्यर्था

---

१. मुक्तौतदन. २. कश्चिद्दोष इति निरस्तम्.

महती बहुकालभृशदुःखसाध्ये श्रवणादौ प्रवृत्तिः किमर्था। निवृत्त्युत्तरकालं निवृत्त्यभावसिद्धेर्निवृत्यर्था प्रवृत्तिरुपपद्यत इति चेत् तर्हि सिद्धो निवृत्त्यनन्तरकालः ॥

अपि च—

'क्षेत्रज्ञः करणी ज्ञानं करणं तस्य चेत् द्विज।
उत्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्तते।'

इति तत्त्वज्ञानस्य मुक्त्युत्पादकत्वावगमात् मुक्त्यतिरिक्ताध्यासहेतुत्वकल्पनं न विदुषां हृदयङ्गमम् ॥

किञ्च—अविद्याया इवानेनैव वचनेन तत्त्वज्ञानस्यापि निवृत्त्यवगमात् मुक्तेः प्रागेवाविद्यानिवृत्तौ मुक्त्यनन्तरश्रूयमाणा तत्त्वज्ञाननिवृत्तिः कथं स्यात्। कथं च अविद्यानिवृत्त्या प्रपञ्चनिवृत्तिः। तस्या अपि भावविकारत्वेनाविद्यासाध्यत्वात् ॥

किञ्च—मुक्तिः साध्या, न वा, साध्यत्वे अतिरिक्तनिवृत्तेः साध्यत्वोपादानं व्यर्थम्। परमपुरुषार्थसाधनतया सुप्रसिद्धस्य तत्त्वज्ञानस्य अपुरुषार्थसाधनत्वापातश्च। असाध्यत्वे तत्त्वज्ञाननैष्फल्यम् ॥

ननु असाध्य एवानवच्छिन्नानन्दाभेदरूपः परमपुरुषार्थः, तस्यानादित्वात्। तथापि तत्त्वज्ञानस्य न पुरुषार्थपर्यवसानहानिः। कण्ठचामीकरन्यायेन पुरुषार्थाप्राप्तिं मन्यमानस्य तत्र सुहृदुपदेशेन कण्ठासत्त्यवगमे सति प्राप्तताबुद्धावप्राप्तताबुद्धिनिवृत्तिवदिहापि तत्त्वज्ञाने सति प्राप्तताबुद्धेरप्राप्तताबुद्धिनिवृत्तेश्च भावात्। तावन्मात्रेण पुरुषार्थपर्यवसानादिति चेन्न। कण्ठचामीकरसंबन्धाज्ञानवदिहाभेदानुभवासिद्धेः ॥

किञ्च—प्राप्तताज्ञानं न मोक्षदशायाम्। किन्तु तत्त्वज्ञानदशायामेवेति मोक्षस्य कथं पुरुषार्थता, स्वरूपप्रकाशस्यैव प्राप्तताबुद्धिरूपत्वे मुक्तिसंसारयोरविशेषः।

अप्राप्तताबुद्धिनिवृत्त्याऽपि न मोक्षस्य पुरुषार्थता। निवृत्तेस्त्वदुक्तरीत्या संसारकालीनत्वात् मोक्षदशायामप्राप्तताबुद्ध्यभावान्मोक्षस्य पुरुषार्थतेति चेत्—न। किमभावपदेन प्रतियोगिविरोधी कश्चित् बोध्यते, उत न। आद्ये अद्वैतहानिः। मिथ्यार्थानुवृत्तिप्रसङ्गो वा। न च ब्रह्मस्वरूपमनादितः संस्काराविनाभूतं कस्यापि विरोधीति वक्तुं शक्यम्। अन्त्ये कथं चोद्यस्य परिहार इति॥

यदुक्तं निवृत्तेरतिरिक्ताभावविकारत्वाभावे चिरनिवृत्तेऽपि घटे निवर्तत इति व्यवहारप्रसङ्ग इति। तन्न। धात्वर्थविशिष्टकर्तरि धात्वर्थरूपफलोपहिते व्यापारे वा वर्तमानत्वाद्यन्वयादिति॥

इति सद्विद्याविजये अविद्यानिवृत्तिभङ्गः॥

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्वयाथात्म्येन
तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन
रामानुजदासेन विरचिते वेदान्तविजये
सद्विद्याविजयः तृतीयः

## स्खलितशोधनम्, पाठान्तराणि च.

| पुटे. | पङ्क्तौ. | विषयाः |
|---|---|---|
| ३ | २ | स्थूलाकारविशिष्ट |
| ,, | ७ | हेतुत्वं चेति |
| ४ | ८ | सत एकत्वस्य कार्य |
| ,, | २२ | अङ्गीकाराच्च लय उक्तः |
| ५ | ५ | कथं भूतसृष्टिरुच्यते |
| ,, | ६ | इत्येतेषां भूतानां बीजानि |
| ,, | १३ | नामरूपयोः स्वपर्यन्त |
| ,, | १४ | व्याकरवाणीत्यन्वयः |
| ६ | ८ | अचेतने ज्ञानहीन इत्युक्ते |
| ७ | ३ | सङ्कल्पविषयताया |
| ,, | २१ | कार्यत्वमभिप्रेत्य तस्य साकार्यत्व |
| ,, | २२ | तन्मन इति |
| ८ | १ | (१) षष्ठखण्डेन। आप्यायकत्वमुपपादयत्याह—भूय इति। अप्ययकत्वमुपपादयति। सप्तम खण्डेन। |
| ,, | १३ | प्राणमेवोपश्रयते प्राणे निर्व्यापारस्तिष्ठतीत्यर्थः। |
| ९ | १० | सम्पत्तिग्रहणमित्यभि |
| ,, | १५ | सुप्तोत्थितः तज्ज्ञानं |
| ,, | १७ | जानन्तीत्येवभावः |
| १० | २ | ज्ञानोपादेयः |
| ,, | ६ | किं विवक्षितमित्यभि |

| पुटे. | पङ्क्तौ. | विषयाः |
|---|---|---|
| १० | ११ | आदेशम्। इति विश्रान्तिचिह्नं देयम्. अथ च विशिष्टोपादानत्वे षड्विधेत्यादि शिरोलेखनाक्षराणि न्यस्तव्यानि |
| ११ | १ | 'आत्मन आकाशः' 'यतो वा इमानि भूतानि' इत्याभ्याम् |
| १२ | ७ | कार्यसाधर्म्येण |
| ,, | १० | अत्र च तादृशा क्रिया |
| ,, | १२ | उपादानत्वम् इहापि |
| ,, | १९ | ब्रह्मोपादानत्वमिति |
| ,, | २० | तेच सद्विद्या |
| १३ | १७ | मात्रासाधारणम् |
| ,, | १८ | माया ब्रह्मणी |
| १४ | ३ | हेतुताया अपि |
| ,, | ७ | विसदृश वस्तुत्वादिना |
| ,, | १० | सति नान्यत्र |
| ,, | ११ | परत्वे ज्ञात, परत्वे च ज्ञात |
| ,, | १७ | संस्कृतस्य तदेवाव्यापकम् |
| १५ | ८ | ब्रह्मस्वरूपमेवेत्यङ्गीकारात् |
| ,, | १० | व्यावहारिकरूपेण भेदः |
| ,, | १९ | तदीयरूपमित्यङ्गीक्रियते। किन्तु निरूपमित्येव |
| ,, | २२ | ब्रह्मणोऽन्यत्वात् अनृत |
| ,, | २३ | मृत्पिण्डघटयोः |
| १६ | १४ | एवं पदत्रयम् |
| ,, | १५ | मृद्घटयोः इदं न |

| पुटे. | पङ्क्तौ. | विषयाः |
|---|---|---|
| १६ | १७ | मृत्तिकाग्रहणे |
| १७ | २ | कार्यद्रव्यभेद |
| ,, | १५ | नासीदित्यर्था |
| १८ | ८ | सङ्कल्पाः । तत्त्वादेव । नापीश्वरस्य । |
| ,, | ९ | भ्रमासम्भवात् |
| ,, | १२ | अश्रुतादिपदत्रयं श्रुतादिपदत्रयम् |
| १९ | २ | त्रीणिरूपाणीत्येव |
| ,, | ४ | सत्यत्वाद्विशिष्योक्त्यसम्भवश्च |
| २० | ४ | अनवस्था असत्त्वे उपादान |
| ,, | १५ | भव प्रसङ्गात् । इति |
| ,, | १६ | अत्रापि पक्षे |
| ,, | १९ | अन्योन्यं भेदस्सत्तावच्छेदकः |
| २१ | ३ | अधिष्ठानसत्तादात्म्य |
| ,, | ९ | कार्याभिन्नं ब्रह्म कारणमुपादानमभेदश्च |
| ,, | १२ | योनित्वमुपादानत्वमित्यत्रापि |
| ,, | १८ | तत्कारणमुपादानमित्यत्र |
| २२ | १७ | पुनरावृत्तस्वर्णपिण्डः |
| ,, | २० | सा च पिण्डाभावेऽपि |
| २४ | २० | सर्वकालीनत्व पर्यवसानेन । |
| २५ | ४ | साक्षिणा प्रतियोगि |
| ,, | ५ | ज्ञानानुभवासम्भवात् |
| ,, | ६ | प्रतियोगि विषयसापेक्षत्व |
| ,, | ७ | प्रत्यक्षमेव चाज्ञानं सामान्या |
| ,, | २३ | शास्त्राध्ययनेनाविशेष्यभूत |

| पुटे. | पङ्क्तौ. | विषयाः |
|---|---|---|
| २६ | ७ | ज्ञायत इत्यनुभवः |
| ,, | १४ | सामग्रीविरहोऽपि |
| २७ | ११ | इष्टतावच्छेदकं |
| ,, | १५ | तदर्थः तत्प्रागपि |
| ,, | २२ | मिति प्रयोगवत् |
| २९ | ६ | ज्ञाने कारणमिति |
| ,, | ७ | अवच्छेदकत्वं वक्तव्यम् |
| ३० | ८ | मेवाज्ञानाभेदज्ञानप्रति- |
| ,, | २२ | सुखप्रातिभासिका- |
| ३२ | १ | प्रतीतेरेव |
| ,, | २ | न ज्ञातानां |
| ,, | ५ | अर्थसत्त्वात् |
| ३३ | १ | न जानामीति |
| ,, | ९ | धीरुपपद्यते |
| ,, | १९ | सुषुप्तावनुभवेन विषय- |
| ,, | २२ | चेत् न इतः पूर्वं |
| ३६ | ४ | विवादाध्यासितत्वमित्यादि। विवादाध्यासितं प्रमाण |
| ,, | ८ | करणप्रतीति- |
| ,, | ९ | दृष्टस्ववेद्यगतवित्त्यभि |
| ,, | ११ | प्रथमविशेषण |
| ३८ | १ | ज्ञानवशादस्ति |
| ३९ | १ | स्वविषयगताज्ञात |
| ४० | १ | निरुच्यते नवा |
| ,, | १० | घटतद्ध्वंसयोः |
| ४४ | १० | पट प्रमाप्रागभावाति |

| पुटे. | पङ्क्तौ. | विषयाः |
|---|---|---|
| ४४ | ११ | पक्षीभूतघटप्रमा |
| ,, | १२ | रिक्तस्वाभाव |
| ,, | २३ | ज्ञानाविषयविषयकः |
| ४५ | ११ | कार्यस्वसमानाधि |
| ,, | १६ | इच्छादि प्रागभावनिवर्तक |
| ४६ | २ | ज्ञानं वा अत्र |
| ,, | २० | स्यात्र बाधितत्त्वात् |
| ,, | २१ | एतद्धटान्यत्व |
| ४७ | १३ | विरोध्यननुभव |
| ,, | १६ | निवर्तकत्वयोग्यतासाध्येति न धाराद्वितीया- |
| ४८ | ३ | मुक्तौ शरीराद्यभावेन |
| ,, | ,, | भिव्यक्तिर्मोक्ष इत्यत्रापि |
| ४९ | ७ | घटत्ववत् |
| ,, | १७ | प्रमाणपदेन न भ्रमव्यावृत्तिः |
| ,, | २२ | तदाश्रयतया बुद्धेः |
| ,, | २३ | वस्तूत्पादक........काशात्। (वाक्यमेतन्नास्ति) |
| ५० | ३ | तेषामेव दोषतया दोषान्तर |
| ,, | ८ | कारणमेव वा प्रागभावनिवर्तकत्वेन |
| ,, | १२ | स्वप्रागभावेत्यादि |
| ५३ | २० | प्रागभावरूपावरणसमानकालीन |
| ५४ | ५ | नान्तरेष्वपि |
| ,, | १५ | अथ-'द्वितीयतर्कदूषणम्' इति शिरोलेखो न्यस्तव्यः |
| ५५ | १० | स्वाभावातिरिक्तान्तःकरण |
| ,, | १३ | अत एव 'जन्येत्यादि' इत्यपि |
| ,, | २४ | केवलं प्रकल्प्यन्ते |

| पुटे. | पङ्क्तौ. | विषयाः |
|---|---|---|
| ५६ | ४ | अतीतक्षुद्रविषय |
| ,, | ९ | वृत्तिमादाय जन्यत्वो |
| ५८ | १२ | अर्थान्तरतातादवस्थ्यम् |
| ,, | २३ | प्रत्यक्षत्वे ज्ञान |
| ५९ | ६ | निवर्तकत्वेना |
| ,, | १३ | न च ज्ञानेनाज्ञानं निवृत्तं |
| ६१ | १ | दाहकत्ववत् |
| ,, | १७ | मानमपि निरस्तम् । |
| ६३ | १३ | ज्ञानातिरिक्त भिन्नप्रत्यक्षभावानिवर्तकज्ञानत्वात् |
| ,, | २२ | आद्यनिर्विकल्पकेति साधनवैकल्य |
| ६४ | १० | तृतीय हेतुरेवात्रापि द्रष्टव्यः । |
| ,, | ११ | तत्स्थप्रमाभावातिरेकिणः |
| ६५ | ५ | ज्ञानाजन्य |
| ,, | ६ | चेष्टातिरिक्त |
| ,, | ९ | प्रत्यक्षे न बाधसिद्धि |
| ,, | ,, | घटध्वंसाजनक |
| ,, | १६ | वृत्तित्वरहितावृत्तिधर्मा- |
| ,, | १७ | अनादिज्ञाननिवर्त्य |
| ६६ | ८ | वृत्योरव्याहतत्वात् |
| ६९ | १६ | सर्वसालक्षण्यस्य |
| ७० | १ | न च ब्रह्मणः परिणामित्वे |
| ,, | ८ | क्वचिदुपादानत्वं |
| ,, | २१ | तस्याः अनादि |
| ७१ | १५ | न तत्र मानम् । तादात्म्या |

## ॥ श्रीरङ्गक्षेत्रस्थमातृकासंवादेन *उपालब्धाः पाठभेदाः ॥

| पु. सं. | पं. सं. | पाठभेदः |
|---|---|---|
| १ | १२ | न चावान्तरार्थज्ञातव्यता |
| २ | ,, | गुरुकुलान्युपेत्येत्यर्थावगमात् |
| ,, | ८ | करणे घञ् |
| ,, | १४ | नियन्तृपरस्याक्षरपदस्य |
| ३ | १८ | ब्रवीत्विति । |
| ४ | १८ | सज्जायेतेति । |
| ६ | १० | विषयविषयिभाव्यता |
| ७ | २२ | तन्मन इति |
| ९ | ३ | अयमणिमेत्यर्थः |
| ,, | १२ | रसोऽहमेभिः |
| ,, | २० | समुद्रादागतोऽहमिति |
| ११ | ६ | प्रत्यासत्या उपादानस्यैव |
| १२ | ४ | मुरारिवचनोदाहरणम् |
| ,, | ६ | कारणत्वं जनयतीति |
| ,, | ११ | न च तादृशशृङ्गात् |
| १३ | ६ | संस्कृतेनैव सम्भवात् |
| १४ | २५ | " सङ्कल्पितकरणोक्तिप्रकरणं " इति विषयाभिधानं लेखनीयम् इति |
| १५ | १० | न च प्रातिभासिकव्यवहारिकरूपेण भेदः [व्यावहारिकभेदे अन्यरूपेण भेदः—इदं वाक्यं नास्ति] |

---

*इमे पाठभेदाः—श्रीरङ्गक्षेत्रस्थपाठशालापण्डितैः श्रीमद्भिः उ. रङ्गाचार्यैः निजमातृका संवादेन उपलब्धाः कृपया अस्मभ्यं प्रेषिताः.

| पृ. सं. | पं. सं. | पाठभेदः |
|---|---|---|
| १८ | १४ | मृत्तिकादिपदत्रयं इति पदत्रयमिति |
| २० | ९ | तद्विकार....साधारणत्वात् [इदं वाक्यं कुण्डलितम्, त्याज्यं वा नवा स्पष्टता न कृता] |
| ,, | ८ | विशिष्टाभेदस्य क्लृप्तत्वात् |
| ,, | ११ | सत्ताभेदाभावाच्च |
| ,, | १८ | दण्ड....त्वाभावात्, इत्यस्य स्थाने "दण्ड घटवत मृत्पिण्डभेदस्य सत्तावच्छेदकत्वात्" इति वाक्यमस्ति |
| २१ | २ | घटस्वरूपमेव गृह्यते |
| २१ | ३ | प्रतीतेरधिष्ठानतया |
| ,, | ९ | तस्मात् कार्याभिन्नं....दानं अभेदश्चाधि |
| २२ | २० | पिण्डाभावेऽपि |
| २५ | ४ | साक्षिणा प्रतियोगि |
| ,, | १७ | तद्गोचर ज्ञानग्रहणे—तद्गोचराज्ञानग्रहेण |
| २५ | २३ | शास्त्राध्ययनेनाविशेष्य |
| २७ | १ | जिज्ञासानुरोधेन ज्ञाने |
| ,, | ३ | ४विशेषज्ञानाभावज्ञानोत्पत्ति |
| ,, | ११ | तथाचावधारणत्वं इष्टतावच्छेदकं |
| २९ | ४ | १चेद्विवक्ष्यते |
| ३० | ४ | अज्ञानविषयस्यावच्छिन्न |
| ,, | २० | सिद्ध एवेति—तन्न |
| ,, | २२ | द्रव्यत्वानिर्धारणे |
| ३२ | ५ | अर्थसत्वात् |
| ,, | ६ | असाधुता अवश्यं वाच्या |

| पु. सं. | पं. सं. | पाठभेदः |
|---|---|---|
| ३७ | २१ | तथेत्यनवस्था, अनिवर्तकत्वे |
| ३८ | १४ | प्रमायां परोक्षवृत्तौ |
| ३९ | १० | जागरादौ भेदवादद्वैतवाक्यस्मरणानन्तरम् |
| ,, | १३ | जले अधोग्रत्व |
| ४० | २१ | तज्ज्ञानप्रतिबन्धक |
| ४२ | १५ | ज्ञानसिध्यर्थं |
| ४३ | १ | [२]तद्विषयपरकीय |
| ,, | ७ | [३]उक्तहेत्वोः....तयोर्धाराव्यावर्तक |
| ,, | १२ | रसाद्यावारकं प्रत्यपि |
| ४४ | १२ | प्रागभावातिरिक्तस्वाभावनिवर्तक |
| ,, | १३ | पक्षीकृतप्रमाया अधिष्ठान |
| ,, | २३ | विशिष्टज्ञानाविषय विषयक |
| ४६ | ११ | इच्छादिनार्थान्तरं व्यावर्तयितुं |
| ,, | १४ | [६]ज्ञानाजन्यप्रत्यक्ष |
| ,, | १९ | एतद् घटरूपभावान्यत्वस्य तत्र |
| ४८ | ३ | [१]शरीराद्यभावेन तदुत्पत्त्यप्रसङ्गाच्च .... व्यक्तिर्मोक्ष इत्यत्रापि |
| ४९ | ७ | पटत्त्ववत् |
| ५० | ७ | न च प्रागभावभेदात् |
| ,, | १२ | स्वभावेत्यादि द्वितीय |
| ,, | १७ | [३]दृष्टस्यापि |
| ५१ | ८ | [२]स्वसमानविषय संशय |
| ,, | १४ | स्वविषयवारकं सिद्धमेव भावत्वमत्र विमति |
| ५२ | ७ | [१]तदुत्पत्तिसमये |

| पृ. सं. | पं. सं. | पाठभेदः |
|---|---|---|
| ५३ | १ | १प्रयोजकत्वं न व्याप्यत्वात् |
| ,, | २० | न च तस्य प्रागभावरूपावरणसमानकालीनत्वात् |
| ५५ | ९ | साध्यसिध्यर्थंदेवदत्तगतपद....देवदत्तपदवैयर्थ्याच्च |
| ५६ | १३ | न च तन्निवृत्तेरपि तत्प्रागभाव |
| ५६ | २१ | किञ्च स्वसमानाधिकरणपदमत्र वाच्यं |
| ५७ | ११ | ४दृष्टान्तत्वसम्भवात् तस्योपादेय कारणत्वाभ्युपगम |
| ,, | २० | ७इष्टतावच्छेदक ज्ञानस्यैव इच्छा |
| ६१ | १२ | कारणे अनुत्पत्ति सिध्या—अनुत्पत्यसिध्या। |
| ६२ | १० | ३पूर्ववृत्ति |
| ,, | २० | स्वजननायोग्यजन्यत्व |
| ६३ | ७ | ४परिशिष्टभागस्यैव |
| ,, | १३ | विषयस्वाजन्यज्ञानातिरिक्त |
| ६४ | ४ | स्वजनक |
| ,, | १६ | प्रत्यक्षधर्माजनक |
| ६५ | १३ | ७एतदभावान्याज्ञानान्या भाव |
| ,, | १९ | अनादिज्ञाननिवर्त्य |
| ६६ | १० | ३प्रागज्ञानानुभवो |
| ,, | ११ | प्राथमिकज्ञानेनानाद्यज्ञानं तन्निवर्तते |
| ,, | २० | ६तन्निवर्त्यत्वानुभवयोच्च अविशेषत्वेऽपि |
| ६८ | १७ | तत्राद्यं ज्ञानस्येति |
| ,, | २२ | रूपानवभासानुप |
| ७३ | १ | ५यदुक्तपदद्वयं |
| ७५ | ११ | विद्यमानमेवावृणोति |
| ,, | १७ | २व्यवस्थापनात् |

| पृ. सं. | पं. सं. | पाठभेदः |
|---|---|---|
| ७६ | २ | तदप्राप्तेरसम्भवात् |
| ,, | ४ | सन्निकर्षादि रूपस्वकारणा |
| ,, | ५ | ज्ञानाभावभिन्न |
| ८० | १ | एव प्रसक्तिः |
| ८१ | ८ | [४]यच्चावरणं नास्ति |
| ,, | ९ | [५]नाप्यभिलपनं |
| ,, | २२ | चैतन्यावेद्यत्वस्यैव |
| ८३ | ६ | नत्त्वपरोक्षत्वमपि स्वप्रकाश |
| ८४ | १४ | वृत्तेरेव सम्भवात् |
| ९२ | ९ | [३]इतिवत्प्रतीति |
| ९८ | २३ | व्यवस्थानुपपत्तिरिति वाच्यं ? |
| १०६ | १३ | अखण्डाज्ञानेन |
| १०७ | १९ | निवृत्तिः |
| १०९ | १ | अजडत्वसत्यत्वप्रसङ्गात् |
| ,, | ३ | [४]अविद्यापि न स्यात् |
| ११० | १७ | अज्ञाननिवर्तकत्वभङ्गः |
| ११२ | ३ | अत्राधिष्ठान चैतन्यं न |
| ११३ | ४ | गगनावच्छेदकस्येव |
| ११४ | २० | प्रथमतृतीयचतुर्थपक्षेषु |
| ११७ | ४ | अविद्योपादानकत्वस्य |
| ११९ | ११ | [३]निवृत्ति क्रियाकर्तुः |
| ,, | २३ | अधिकरणाश्रिताभाव |
| १२१ | १२ | अपुरुषार्थसाधनत्वापादकत्वं च |
| १२२ | १ | प्राप्तताबुद्धिनिवृत्यापि |
| ,, | २ | पुरुषार्थतेति चेत्—किमभावपदेन |

श्रीयतिराज संपत्कुमार रामानुज मुनिभिः प्रत्यवेक्षिता

विक्रयाय सिद्धा ग्रन्थाः

---

(नागरलिपिः)

| | | | | | |
|---|---|---|---|---|---|
| १. | शृङ्गारप्रकाशः ३६ प्रकाशात्मकः—श्रीभोजदेवकृतः तत्र (२२–२३–२४.) प्रकाशाः (१९२५) | ... | ३ | ० | ० |
| २. | तापसवत्सराजनाटकम्, अनङ्गहर्षमातृराजकृतम् (१९२७) | ... | २ | ० | ० |
| ३. | काश्यपसंहिता, सर्वविषचिकित्साप्रतिपादिका (१९३३) | ... | ३ | ० | ० |
| ४. | श्रीपौष्करसंहिता, श्रीपाञ्चरात्रागम ग्रन्थः (१९३४) | ... | ५ | ० | ० |
| ५. | सद्विद्याविजयः (१९३६) | ... | १ | ८ | ० |
| ६. | विजयमङ्गल दीपिका | ... | मुद्र्यमाणा. | | |

(आन्ध्र लिपिः)

श्रीपाञ्चरात्रागमे—

| | | | | | |
|---|---|---|---|---|---|
| १. | पाद्मसंहितायाम् पूर्वभागः | ... | ४ | ० | ० |
| २. | ,, उत्तरभागः | ... | ५ | ० | ० |
| ३. | अष्ट श्लोकी—श्रीपराशरभट्टारककृता सव्याख्या | ... | ० | ४ | ० |

(सर्वत्र प्रापणभृतिः पृथक्)

आसूरि श्रीनिवासय्यङ्गार्यः,

श्रीयतिराजमठ,

मेलुकोटा, मैसूर्.